41. MSS seem to read *taṭajalābhillahari*-etc. and *lutakūla* etc. Perhaps it should be *taṭajalābhiḥ*, *bhallahari* and *lulitakūlataru* etc. *-taṭajalābhiḥ* is a separate expression adjective to

नोत्सवम् उत्सुकजलदेवतोपनीतनलिनीदलपुटकलशवारिपूरितालवालवलयैः परिहृतनिजनिजसमयेन सततमृतुगणेन संपादितसकलसंपद्भिरतुहिनकिरणकरैरप्यक्लिष्टबालकिसलयैरलिभिरप्यनाघ्रातगन्धकुसुमैः शकुनिकुलैरप्यशकलितफलैरनिलेनाप्यनाकुलितशाखाशिखैर्दिव्यर्षिकुमारवर्धितैरुद्यानतरुभिरुद्योतमानावसथं क्वचिद्विनीतशार्दूलपाल्यमानहोमधेनुकुलसंकुलशाद्वलोपशल्यं क्वचिन्निजपक्षपवनवर्धितबालभुजङ्गोपगूढकण्ठनीलकण्ठमण्डलाधिष्ठिततरुणतमालतरुषण्डं क्वचिदभ्यर्णवनीविहारनिर्गतजननसनीडनीयमाननिजस्कन्धाधिरोपितक्षुधितसिंहशावककरिकलभं क्वचिद्वनवराहदंष्ट्रासमीक्रियमाणनिम्नोन्नतभूभागं क्वचिदृक्षकुलोपहृतनिर्मक्षिकमधुगोलकमुदितमुनिकुमारिकावर्गं क्वचिद् वानरकरसंमार्जितसविधरूढकुटजकुसुमरजोराजिधूसरोटजाजिरं क्वचिदचिरप्रसूतहरिणीपुरोविकीर्णमरिचकिसलयमिश्रनवयवसं दिवाकरमण्डलमिव प्रकाशितमहातपस्फुरणं करिकर्णतालमिव बहुतरलताश्रितं ग्रीष्मदिवसमिव प्रौढतापसहितमालेख्यभवनमिव चित्रशिखण्डिमण्डलोद्भासितं किमपि तपोवनमवापतुः ।

तत्र च तौ दंपती जटिनौ वल्कलवाससावेकतानेन चेतसा पुमांसमाद्यं ध्यायन्तौ हायनानि कतिचित् कन्दमूलफलैः कतिचिज्जीर्णपर्णेन कतिचित् पयसा कतिचिद् भानुरश्मिभिश्च वर्तयन्तौ कदाचित् पञ्चानलमध्यवर्तिनौ कदाचिदासारप्लुतवपुषौ कदाचिदप्सु विहितावगाहावतिमहत् तपश्चेरतुः ।

तयोश्च भगवाननितरसुकरेण कर्मणा प्रसेदिवानशेषवैमानिकसेव्यमानमारूढविहगपरिबृढमुपदर्शितशङ्खचक्रलक्ष्माणं पद्मासहायमात्मानमदर्शयत् ।

[42]सुतस्य सकलजगन्नयनसुकृतफलमिन्दिराचक्षुरिन्दिन्दिरशरदिन्दीवरममन्दसौन्दर्य-

dīrghikābhiḥ. The next expression may be understood thus. *Bhallānām (bhallūkānām)*, *harinām*, *(kapinām)*, *pavanasya ca vihityā=vidhānena=kriyayā lulitāni yāni kūlatarukusumāni teṣāṃ dhūlibhir vāsitābhiḥ dīrghikābhiḥ*.

42. See the reference, in the second preceding paragraph, as *upendrasya pitarau* to *Aditi* and *Kāsyapa*. Thus the reference here as *sutasya* is to Viṣṇu, which is construed with *rūpaṃ* etc.

कन्दमतिकन्दर्परूपमस्पन्दपक्ष्मणा दृशा निरूप्य चित्रीयते स्म तन्मिथुनम्। अदितिस्तु वरदानोद्यते तस्मिन् विस्मृतापवर्गवाञ्छा तत्सदृशमात्मजं लब्धुमाचकांक्ष।

हरिरपि विज्ञाय तदीयमिङ्गितम् आर्ये हृदयेन यादृशमभिलषितवती तादृशमेव तनयं मानुषे जनुषि जनयिष्यसीति कथयन् विहायःपथे परिषदा सह दिविषदां तिरोदधे। तावेव दक्षसुताकश्यपात्मजौ यु(वामु)त्पन्नौ। अचिरेणैव कालेन त्रयेऽपि जगतामात्मोपमानमपश्यद्देवः स्वयमेव युवयोः पुत्रतामुपयास्यति। जाते च देवकीगर्भात् (तस्मिन्) तस्मिन्नेव समये कंसाय भोजपतये करं दातुमागतस्य कलिन्दजातीरवासिनस्तव सुहृदो नन्दगोपस्य गृहिणी यशोदा नाम दुर्गां दुहितरं जनयिष्यति। भवता तु विगलितनिगलबन्धनेन संहृतदिव्याकृतिमात्मजमादाय नन्दघोषं गतेन प्रसववेदनानिमीलितदृशो यशोदायाः शयने निधाय तनयमस्याः सुतेयमानेतव्येत्यभिधाय विदितवलभद्रजन्मवृत्तान्तौ च तौ विधाय शरदम्बुद इव सपदि गगनमुदपतत्।

अथ कतिपयवासरापगमे संपादनाय जीवलोकनयनानन्दसंपदः प्रवासनाय कंसमुखदनुजराजहंसानां निर्वापणाय सर्वामरमन्युदवशिखिनां भूयिष्ठतापहरणाय च भूतधात्र्या नवजलद इव दिवो देवक्या गर्भे भगवानवततार नारायणः। तस्य च गर्भस्थितस्योदयं प्रतिपालयन्त्याः श्रियः स्तनतटकर्पूररजसेव श्वसितानिलविप्रकीर्णेन सेवासंनिहितदिव्यशङ्खरोचिषेव प्रसरता विरहासह[43]कलशोदधिकान्त्येव समुपगतया पाण्डिमानमवाप तस्या वपुः। उदरे तनीयसी तमालदलकान्तिरन्तः प्रवेशमलभमाना नारायणनाभिनालीकमधुकरमालेव रराज रोमराजिः।

अन्तरमान्तीमसुररिपोरङ्गकान्तिमुद्वहदिव मुखेन श्यामचारुचूचुकं चकाशे कुचयुगलम्। अपहाय प्रमदवनविहारदोहलमुन्मदकलमयूरकलकलमुखरित-

43. Both the MSS read *cirahasaha*. I think it should be *virahasaha*.

तमालषण्डासु तरलतरतर्णकालोकनवलितकर्णगोकुलाधिष्ठितशाद्वलासु वृषभरटितोद्भ्रान्तवनदेवताकटाक्षकुवलयितदिक्षु वनराजिषु हृदयं विहर्तुमभिललाष। भर इति शिथिलितशिरीषकर्णपूरादनायासा[44]च्छिखिपिञ्छमवतंसयितुमुदभवद् वाञ्छा। वीणानिक्कणितादपि वेणुरवं श्रोतुमनिशं व्यसनमभूद् काम्यम्। [45]वापीविलासकमलोद्वहनादचलं धारयितुमाचकांक्ष करः। कंसस्तु कदाचिदालोक्य तां हरिगर्भामचल[46]गुहामिव विपिनगजो भूयसीं भियमभजत्। यदा नाम तामालोकितवान् तदा प्रभृति निरन्तरचिन्तापरायत्तचेताः संततमन्तःस्थितेन दैत्यारिणा नवलवलीकिसलयापाण्डुकपोलयुगलेन वदनेन जृम्भिकारंभतिम्यज्जलकणदन्तुरितपक्ष्मणा दृशा नर्तितोत्तरीयसिचयदेशैर्निश्वासमरुद्भिरनभिनन्दितपानभोजनेन दिवसव्यापारेण लब्धकशिमभिरङ्गैरनभिलषितैश्च परिजनालापैरनुजां निजामनुचकार दनुजाधिपः।

मन्दमन्दगतेरस्या(ः) गुरुगर्भभरश्रमालसमाननं विहगपतिरलक्षिताकृतिः पक्षानिलेन मृदुना वीजयामास। पत्युरुत्सङ्गभुवि सुप्तायाः शयनागारं सुदर्शनादीनि दिव्यायुधानि पर्यभ्रमन्। स्वप्नेषु खगपरिबृढरूढा दिवमासाद्य नन्दनतरुमुत्खातमानयन्ती रणजितबलमथनबला सहर्षगन्धर्वपुष्पवर्षाभिषिच्यमानमात्मानमपश्यत्। प्रबोधसमये च सह मङ्गलवचोभिरश्रूयत पाञ्चजन्यध्वनिः।

अथ सा दशमे मासि घनसंतमसमलीमसदिशि निशीथे शशिनीव जलधिवेला जगदानन्दनं जनार्दनं जनयामास।

तत्क्षणादेव सतां मनांसीव सकलद्रुमकुसुमान्यामोदमभजन्त। सुरसुदृशामिव दिशां मुखानि प्रसादमासेदुः। दिव्यर्षय इव दनुजप्रतापदहनानि

---

44. MSS read *anāyācchikhi*—etc. which should be *anāyāsācchikhi-*

45. MSS read *nāpivilāsa-* for *vāpivilāsa-*etc.

46. MSS read *ibhām iva* instead of *guhām iva*.

निर्वृतिं[47] भेजुः । दिशि दिशि जलधरपटलमिव मुखरितकुलगिरिकुहरं जगर्ज दिग्गजकुलम् ।

अथ तमहिपृष्ठभोगमिवारिष्टशयनमधिशयानम् उच्चावचमणिभूषणरोचिराचिताकारमिन्द्रायुधकिर्मीरमिव नवनीरदमवनीमवतीर्णं[48] कर्णिकारकमलकर्णिकार्पणवाससमासक्तबालातपमिव विहायसम् उटजनिवासिन्याः[49] श्रियो विहरणाय पुण्डरीकषण्डमिव नयनयुगलसंसृजा[50] रुचा सृजन्तम् अतिपाटलैः करतलैः शुभरेखात्मकानीव दिव्यानि शङ्खचक्रगदाधनूंषि धारयन्तं फलमिव तपस्तरोः सारमिव संसारस्य दिष्टिमिव दृष्टेः पितामहस्यापि पितरं चतुर्भुजं तनयमालोक्य विस्मयमयौ मनसि स्तुतिमयौ वचसि विकासमयौ चक्षुषि पुलकमयौ वपुषि मग्नाविवानन्दसिन्धावाप्लाविताविव....सुखहृदे तौ पितरौ[51] सुधावर्षैरवगाढाविव बभूवतुः । अनन्तरमानकदुन्दुभिरानन्दगद्गदया गिरा पुरातनं पुरुषमाबभाषे ।

देवदेव देवकीनयनानन्दकन्दलनकालमेघ मत्तः[52] कमपि न मन्ये धन्यमन्यं जगति यद्यापि सकलसुरासुरसिद्धसाध्यविद्याधरकिंपुरुषपरिषदभिलषितदर्शनमखिलभुवनवहनमङ्गलप्रदीपममुनैव चक्षुषा भवन्तमपरोक्षयामि । किंच प्राकृतसुतजन्मलाभादनुपमानमात्मानं मन्यन्ते जगति जन्तवः । मम तु न जाने जनयितुरपि जगतां जनकस्य कियानानन्दः । कियती कीर्तिः । कियद् वा

---

47. When construed with *divyarṣi nirvṛti* means *svāsthya*, and with *pratāpadahana* it means *nāśa*. *svāsthye nāśe ca nirvṛtiḥ* is the *Vaijayantīkośa*.

48. MSS read *avatīrṇaḥ*. I think it should be in the accusative here, to be construed with *tanayam* occurring later.

49. MSS read *uraja*- for *uṭaja*.

50. *saṃsṛjā* is in the sense of *saṃsargiṇā* = *sambaddhena*.

51. MSS seem to read *tau vitarunau* instead of *tau pitarau*.

52. MSS read *kālimeghamantaḥ kām api tam anye dhanamanyam*! What a work of the scribes !!!

भागधेयमिति । देवकी च प्रहर्षजलवर्षमुचं प्रमृज्य दृष्टिमिदमुदञ्जलिरवदत् । नाथ पुण्डरीकनयन नियतमदित्या रेणुकया कौसल्यया च[53] मया पुरा कृतं सुकृतं नाकारि यतस्त्वया पूर्वमवतारेषु नैवंविधं रूपमुपदर्शितम् । तदेतदासेचनकमपि नृशंसकर्मणः कंसादपोढशङ्काया मम कृते संहर्तुमर्हसि । किंच सकलमर्त्यालोकनागोचरप्रकारतेजोधरं मानुषाकारमप्रकटितबालभावं भवन्तमालोक्य कथं मदीयमात्मजमिव जगति विश्वसिति जन इति ।

तदनु तदनुरोधेन रूपमापदपरं वेषान्तरमिव शैलूषः पुरातनः पुरुषः । तं च संहृतदिव्याकृतिमुपदर्शितशैशवमालोक्य कोमलतरपाणिपादं रुदन्तमालोकयतोस्तयोर्मनसि विस्मयेन पदमदीयत । तदा च वसुदेवस्तामवादीत् । अयि द्रुहिणजन्मना मुनिना यदभिहितं तदल्पावशेषमखिलमालोकितम्[54] । तदस्य रुदितध्वनिमाकर्ण्य कारागृहद्वारपाला यावत् स्वामिने निजाय न निवेदयेयुस्तावदर्भकमादाय नन्दप्रियं व्रजामीति ।

देवकीं च मूर्तमिव भागधेयमङ्के निधाय पुत्रं प्रेमरसेनेव हृदयान्निस्सरता निर्भरानन्दप्रवाहपरिवाहेणेव स्तनकलशमुखस्रुतेन पयसा स्नापयन्तीं नयनाभ्यां नलिनदलकोमलाभ्यामर्चयन्तीं मुहुः कपोलयोश्चुम्बन्तीं मुहुः शिरसि जिघ्रन्तीं मुहुरालिङ्गन्तीं वत्स कदा तव वदनमुन्निद्रपुण्डरीकनयनं द्रक्ष्यामि । कदा सुधारसोद्गारिगिरः श्रोष्यामि । किमकारि तव यशोदया यद् वात्सल्यादङ्कपर्यङ्कशायिनं भवन्तं प्रस्नुतस्तनं पाययिष्यते । कति नाम दिनानि गोपिकावामनयनान्यस्पन्दन्त यानि निरूपयिष्यन्ति भवतः शैशवोचितानि चरितानि । धन्याः खलु ता व्रजवीथयो या या इतस्ततः करिकलभवत् पांसुषु परिक्रीडमानस्य तव दृश्यमानशङ्खपङ्कजानि पदानि धारयिष्यन्ति इति कथयन्तीं सत्वरमयि मुग्धे न

---

53. After this there is a superfluous *na* in the MSS. This must be a scribal mistake, as there is the *na* in *nākāri*.

54. MSS read *tad alpāvaśeṣamayitam ālokitam*.

किमपि जानासि । जायते कालातिपात इति वदतो हन्त भर्तुः क्लृप्तरक्षाविधिः सा कथंकथमपि तमर्भकमर्पयामास । वसुदेवोऽपि पाणिद्वितयशायिनं शार्ङ्गिण-मुरसा विशालेन बालं तमालमिव शैलस्तटेन धारयन् गलितनिगलबन्धनः सूक्तानि मङ्गल्यानि जपन्त्या देवक्या निभृतपदमाद्वारदेशमनुयातो निद्राविधेय-निखिलद्वाररक्षको निर्जगाम कारागृहात् ।

अथ मधुभिदुदयसंभवमानन्दबाष्पपूरमिव मुञ्चत्सु दूरमासारमम्बुवाहेषु गम्भीरगर्जितश्रवणभीताभिरिव भामिनीभिर्गाढमुपगूढे गूढोदरभवनभाजि पौरजने विरतजनसंमर्दविस्तृतेषु[55] विश्रान्तवीणावेणुमर्दलध्वनिषु संविशत्स्विव चत्वरेषु सौर-भोन्नेयसौधवातायनोद्गीर्णधूपद्विगुणैरगणयद्भिरिव गगनमभि विद्युदुद्द्योतं निशोरगी-निश्वासधूमनिभैस्तमोभिः कबलितासु रथ्यासु तुङ्गतरङ्गहर्म्यशृङ्गे प्रणालिकापाति-जलनिर्झरजालझरत्कारमुखरेण जानुदघ्नपयसा राजमार्गेण पित्रा परित्रासलोललोच-नेन नीयमानं निजनाथमनुगच्छन्नुच्छ्रितच्छत्रमण्डलानुकारिणा फणासहस्रेण वारयन् वारिधाराः सिषेवे शेषोरगः[56] । प्रभावतस्तस्य विघाटितकवाटयुगलमिन्दूदय-दलितदलपुटं कुमुदमुकुलमनुचकार पुरम् । निजमायानिघ्नचेतसि लिखित इव निश्चेतने निश्चलतारकचक्षुषि पश्यत्येव गोपुररक्षिणि जने नगरान्निर्गतस्य शौरेः कालियभुजङ्गदमनोपकृतेः प्रत्युपकर्तुकामेव मार्गं ददौ नन्दिनी कलिन्दस्य । वसुदेवस्तु तेन पार्श्वद्वयस्तिमितजलपूरेण तमालतरुकान्तारमध्यमार्गानुकारिणा करिकलभशिरोमौक्तिकप्रमाणसिकताकोमलतलेन सरितमतीत्य निरन्तरनिपतदा-सारधारमानकहृद्धेनुकाधिष्ठितोपकण्ठं संवेशविवशगोपजनं गोकुलं विवेश ।

तत्र च निवातनिश्चलप्रदीपे मधुमथनदर्शनोद्यतनयन[57] इव सूतिकाभवने स्थितां प्रसवसमयमूर्छामुकुलितदृशं मुदितरवमुखरमुखदुहितृकां यशोदामामीलित-

55. MSS seem to read *viratajanasamamandavisṛteṣu*.

56. MSS seem to read *meṣoragaḥ*.

57. MSS seem to read *madhumathanadarśnodavinayana iva*.

वारिरुहामभ्यर्णकूजत्कलहंसिका[58] मब्जिनीमिवापश्यत्। तस्याश्च शयने शनैर्निधाय शिशुम् आदाय कुमारिकां पुरोगतेन[59] वर्त्मना सद्म निजमाजगाम[60]। ततः पुरेव घटितेषु कालायससर्वकवाटेषु पुनरपि निगलितचरणयुगले च वसुदेवे देवकीशयनशायिनीं रुदतीमाकर्ण्य दुहितरं बन्धनागाररक्षका राज्ञे सुतोत्पत्तिमावेदयामासुः। स च तद्वचनं श्रुत्वा दण्डाहत इवोरगः सत्वरमुत्थाय शयनतलान्निद्रावशेषजिह्मतारकेण चक्षुषा ससंभ्रमं सावेगमाविष्ट इव ग्रहगृहीत इव मत्त इवोन्मत्त इव श्लथबन्धमन्तरीयं कुन्तलभरं चानियमं तत्क्षणप्रतिपन्नदौस्थ्यां धृतिमिव धारयन्तीं यष्टिमाददानो वदने वर्त्मनि च विसंस्थुलैः पदैर्बन्धनागारमगमत्।

दूरादेव देवकसुता तस्य पदशब्दमाकर्ण्य भयोद्विग्नहृदया किं कुर्म इति पृच्छन्ती भर्तारमुत्तानपाणिद्वयशायिनं शिशुमुपगृह्य[61] मुहूर्तमवतस्थे। सोऽपि प्रविश्य सूतिकाभवनं क्व वा स जीवितान्तकारीति कथयन् अनार्य किं फलमनया निहतया निषूदितनिखिलसुतशोकविह्वलायै देहि मे दुहितरमेकामिमामिति कथन्त्यास्तस्याश्चलात् करतलादाच्छिद्य बालामङ्गणभुवि शिलायामास्फालनायोपायुङ्क्त। तस्य च हस्तादपहाय बालिकारूपं सा कालिकेव नभसि दर्शिताकारा निजतेजः प्रसरशमितशार्वरान्धकारा ....दुर्वारदनुजकुञ्जरशिरःकूटकुट्टाककुटिलनखकरोटिमतिविकटगजघटाकारजलदवृन्दसंदर्शनजनितकोपमौंपवाह्यसिंहमधिरूढा मुनिगणहृदयसंहरणचरणशिञ्जितश्लाघ्यरत्नमञ्जीरकिरणरञ्जितचरणपङ्कजा रणदलितशुम्भगलासीमनिस्सृतरुधिररूषितमिव किंशुककुसुम्भकुसुमरागमंशुकं वसाना तुङ्गस्तनशिखरडोलायितमागुल्फलंबिलोलम्बकदम्बकानुबन्धिभिररविन्दैर्मकरन्दस्यन्दिभिरुद्भटमुण्डबलसुभट - मुण्डैरिव ग्रथितमुपवीतपदन्यस्तभुजङ्गफूत्कारमारुतम्लानकेसरं प्रालंबदाम बिभ्राणा

58. MSS seem to read *kalahaṃsikāmajjanīm.*
59. MSS appear to read *yaśogatena.*
60. The expression is not clear in the MSS.
61. MSS seem to read *upaśubhya.*

हरनिहतसिन्धुरासुरशिरोमौक्तिकारचितमन्तरान्तराकुचहरिचन्दनलुलितहारभुद्वहन्ती शबरोपहारपशुलोहितपानादिव पाटलतरमधरकिसलयं दधाना सृक्वपुटविसृमर-क्रूरदंष्ट्राङ्कुरकिरणखण्डशबलकुण्डलमणिरश्मिरज्यमानगण्डस्थला समिदनिशाकृष्ट-चापमौर्वीनिशामनाभ्यासादिव कर्णान्ताकृष्टमुष्टिः सिन्दूरतिलकबिन्दुसुन्दरमुन्मिष-त्कृशानुकपिशं चक्षुरुद्वहता ललाटेन संनिहितलोहिताङ्गेन शशधरशकलेन विभावरीव विभाव्यमाना सौदामिनीकडाराभिरायामिनीभिर्मयूखलेखाभिः खमखिलमिवोल्लिखन्ती पारिजातपल्लवपराजयापादकेन पाणिनैकेन[62] दैतेयपृतनापटलतिमिरबालमिहिरं (दवान)लशिखरावर्तवृत्तं चक्रम् इतरेण दरविकसितपङ्कजसंदेहकृद्भृङ्गझङ्कृतिच्छ-लेन शब्दायमानमिवात्मवाहनपरिभवशङ्किनिजहरिणाभययाचनायातशशांकशंकाकरं शङ्खम् अपरेण दृढघटितगरुडगरुदुज्ज्वलरुचिपिशङ्गपुङ्खमसङ्कुचदनुजमुखपङ्कजावली-विहृति ललितं शिलीमुखम् अन्येन महिषासुरविषाणनिर्माणमारोपितोरगगुणं चापम् एकेन निशुम्भशुद्धान्तताटङ्कातङ्कदायिनमभङ्गशौण्डीर्यभुजङ्गनिश्वासधूममति-कृतं कृपाणम् अपरेण विफलविमतायुधप्रसरं प्रमथचमूमुखरक्षातिलकमिव फलकम् केनचिदाबद्धचण्डरथकेतुदण्डचामरिकामसुरद्विपदशननिर्मितां गदाम् इतरेण दारुणपावकशिखरारुणत्रिशिखमखिलकूलंकषं शूलमुद्वहन्ती सकलजगत्संमोहनमा-याविदनुजततेरिन्द्रजाल[63]पिञ्छिका प्रणवशुक्तिमुक्तामणिरुपनिषदुदधिप्रवाललेखा चिदम्बरविलासकादम्बिनी कदम्बकान्तारकल्पलता विन्ध्यगिरिगुहाविहारकेसरिणी देवी ससंरंभम् अरे रे मूढ किं वा मया निहतया लभ्यते । दानवकुलदवदहनः पुण्डरीकनयनः पुरुषो जातस्तव जीवितान्ताय जागर्ति जगति कुत्रचित् इति दितिसुतपतिमभिदधती सपदि सुरगणेन साकं धाम निजं जगाम ।

---

62. From here the eight arms of Durgā and the weapons held therein are described respectively as *cakra*, *śaṅkha*, *bāṇa*, *cāpa*, *kṛpāṇa*, *phalaka* (shield), *gadā*, and *śūla*.

63. MSS seem to read *saṃmohanadāyibhir indrajāla*-etc. What is given in the text is my own guess.

कंसस्तु तस्या वचः श्रुत्वा विद्ध इव श्रवसि विशिखेन स्यूत इव शिरसि शूलेन शकलित इव हृदि शतकोटिना चिन्ताकुलो भूत्वा देवकीवसुदेवावुपसृत्य सोपग्रहं क्षम्यताभधुना । विस्मृतविवेकेन देवीवचनमनृतं मन्यमानेन मया नृशंसेनेव विशसिताशेषशिशुना युवयोर्यदपराद्धं तदखिलमपि विस्मर्तव्यमिति पादयोर्निपत्य विमुक्तशृङ्खलाबन्धौ विधाय यथापुरं समभावयत् । यशोदा च क्रमेण विगलितामनस्यमूर्छा कथंचिदुन्मील्य चक्षुषी हृषीकेशमरिष्टशयनशायिनं कलभमिव करेणुकालोक्य मुदमुदवहत् । तत्क्षणादेव नन्दस्य नन्दनोद्भूतिसंभृतप्रीतेरादेशेन सर्वतो निबध्यमानविविधांशुकतोरणश्रेणिसुलभसुरचापविभ्रमम्[64] उन्नम्यमानध्वजम् उच्चार्यमाणमङ्गलालापम् आगृह्यमाणपूर्णपात्रम् आवर्ज्यमानतैलधाराभिषिक्तसकलजनं[65] हारिद्र[66]रसोपलिप्यमानविपुलश्मश्रुभारभासुरस्थविरं मिथःप्रक्षिप्यमाणनवनीतपिण्ड-खण्डपङ्किलाखिलाङ्गणम् आपूर्यमाणशृङ्ग[67] वाद्यमानमर्दलं प्रवर्त्यमानकरताललयानु-

---

64. From here the expressions in nominative in neuter are adjectives to *gopakulam* occurring later.

65. This expression seems to refer to the custom that when a son is born in a family, the relatives (and friends too) have what is known as an "oil-bath". That is to say, they apply sesamum oil to the body and head and then have their bath and cleanse away the oil. This custom prevails even now to some extent in South India.

66. The custom of applying turmeric (extract obtained by crushing fresh turmeric if available, or by mixing turmeric powder in water and then applying it) to the body etc., described in this expression, seems to be prevalent among some people of the society. Many will have symbolical touch of the turmeric at least.

67. *Sṛṅga* seems to refer to a kind of hollowed instrument obtained from the horns of animals, which is blown on such occasions as this, among some sections of the people, particularly cowherds.

कूलनृत्यन्मधुपानमत्तजरतीकं मुच्यमानवत्सशतोल्लसनशोभितं गोपकुलमखिलमभवत्। प्रभातायां च यामिन्यां स्वयमपि हरिजन्ममहोत्सवाचरणदोहलिनि[68] सलिलोत्क्षेपणकेलिमिव कर्तुमखिलाभिरपि तारकाभिरपरमकूपारमुपगते शशिनि प्राभातिकपवनतरलासु वेल्लितस्तबकासु नृत्यन्तीष्विव लतासु विकचारविन्दविगलन्मधुशीकरदुर्दिनच्छलादानन्दाश्रुवर्षमिवोद्वमन्तीषु नलिनीषु प्रमोदादिव परस्परमालिङ्गत्सु रथाङ्गमिथुनेषु विविधकुसुमशीधुपानमत्ते सहर्ष इव गायति भ्रमरकुले कुलायमण्डलोड्डीनेषु कृतविरुतिषु मङ्गलशब्दमिवोच्चारयत्सु शकुनिषु क्रमेण चोदयाचलशिरश्चुम्बिनि बालमातपं किरति कुङ्कुमचूर्णमुष्टिमिव दिङ्मुखेषु दिवसपतौ (व्रज) पतिः पुरोधसोपदिष्टेन वर्त्मना स्नात्वा दत्त्वा बहून् व्रीहिकूटान् सवत्साः गाः स्वर्णजातं च द्विजातिभ्यः सुतमुखकमलदिदृक्षुरभितो निबन्धनीयपल्लवदामनिकुरुम्बम् अभिनवगोमयलेखाङ्कभित्तिपुटम् उभयभागवेदिकानिहितपूर्णकलशम् आकलितरङ्गवल्लीवलयचित्रलिप्ताजिरम् अजिरभुवि संगताभिरितरेतराकर्षणशब्दायमानशङ्खवलयाभिरंसदोलायितरत्नकुण्डलाभिः श्रुतिशिखरलंबमानविकटवालिकाभिरसकृदुपयुक्तताम्बूलरागरूषिताधररुचकचारुभिर्हरिद्रारसार्द्रललिताक्षततिलकविलसदलिकाभिरलिकुल[69]निलीनचिकुरपल्लवोद्भासिमौलिभिः सव्रीहिपात्रहस्ताभिः प्रज्वलितदीपिकाराजिराजमानभाजनधारित्रिव्रजवधूभिरध्युषितं सूतिकाभवनमगमत्। तस्य च द्वारभागे स्थितः प्रस्नुतस्तनयुगक्षरत्क्षीरसिक्तोत्तरीयवाससो मातुरङ्कपर्यङ्कादादाय रोहिण्या संदर्शितमुत्क्षिप्तताम्रपादं भास्वन्तमालोलतरं कोमलं महानीलं प्रसवसमयसंनिहितलक्ष्मीकं सहस्रनयनप्रेक्ष्यं नन्दनं विलोक्य नन्दः परं ननन्द।

---

68. The expression contains an *utprekṣā*. The poet fancies on the setting of the moon, to say that the moon also departed for the western ocean in order to observe, on the birth of Hari, a grand festivity in the form of a *jalakrīḍā* (throwing water over each other) in the company of his harem, the stars.

69. The expression after *alikula* is not clear in the MSS. What is given is only my guess.

अथ सूतकत्रासरावसाने वसुदेवनिदेशेन गर्गनामा पुरोहितः प्रातर्निर्गत्य मधुराया मधुमथननिवासदृश्यमानसकलकुशलपोषं घोषमुपागमत्। तत्र च व्रजपतिना बन्धुभिः सह प्रत्युद्गमनेन कल्पितातिथिसत्कृतिः सुखोपविष्टश्च विष्टरे मुहूर्तमिव स्थित्वा तमप्राक्षीत्।

अपि कुशलमायुष्मतः सुतजन्ममहोत्सवेनेति। सोऽप्यब्रवीत्। किं नाम कुशलं न सुवते विशेषास्त्वदाशिषां फलेग्रहयः। अन्यच्च सत्यमिदं संपत् संपदमनुबध्नातीति[70] यत् तस्मिन्नेव पुत्रोदयावसरे भोजनाथेन सुहृदपि निगलबन्धनतो निर्मोचित इति मम कर्णपथमायुष्मतीयं प्रवृत्तिरवतीर्णवती। पुरोघास्तु पुनरिदं जगाद। व्रजपते सोऽप्यमुना पुत्रजन्मना कारानिवासदुःखमिव पुरातनसुतापायशोकमप्यहासीदिति।

नन्दस्तु किं कारणमेतद्विमोचनस्येति तमपृच्छत्। स च तस्मै रहसि रौहिणेयजननादारभ्य मधुमथनोदन्तमखिलमपि मधुरानाथप्रसादान्तमाचचक्षे। नन्दस्तु तमाकर्ण्य विस्मयानन्दनिष्यन्दपक्ष्मणा चक्षुषा सुचिरं स्थित्वा सभय इव पुनस्तमप्राक्षीत्[71]। भगवन् निशम्य चण्डिकावचनमर्भकमिममसुरपतिः किमन्वेषयिष्यतीति। गर्गस्तु सस्मितं व्याजहार। भद्र सम्यक् त्वया पृष्टम्। तदपि निवेदयामि। यदा नाम नृपतिस्तौ निगलबन्धनतो निरमोचयत् तदैव निजगृहं प्रविश्य महाबलपराक्रमान् प्रलंबधेनुकारिष्टनाम्नः कपटव्यापारचतुरानसुरान् पूतनानाम्नीं दात्रीमप्याहूय विदितयोगनिद्रागिरो[72] विधाय भवद्भवनवर्तिनो भगवतः

---

70. Bāṇa says in his *Kādambarī*: *aho kalyāṇaparamparā; satyo'yaṃ janapravādo yad vipad vipadaṃ sampat sampadam anubadhnātīti*. (N.S.P Edn., 1948, Page 164)

71. MSS seem to read *adrākṣīt*.

72. It was Yoganidrā or Yogamāyā that was born as a *bālikā* to Yaśodā, and later appeared as Durgā in the presence of Kaṃsa. See Note 62 and the relevant portion. Also see the *Bhāgavata* X. 3. verses 46 & 48.

प्रकटितबालभावस्य कैटभारातेरन्वेषणार्थमादिक्षत्। चत्वारश्च ते जिघांसवः प्रतिविषयं प्रतिपुरं प्रतिग्रामं प्रतिघोषं प्रत्यचलं प्रतिवनं च दितिसुतविमतगवेषणाय जगति पर्यटन्ति। सुहृदपि वसुदेवस्त्वामेवमाह। नात्र स्थेयमायुष्मता। कंसाय दत्तसांवत्सरिककरेण विधिवत् कृतनामानमात्मजमादाय स्वयमेव गोष्ठं गन्तव्यम् इति। तत् त्वमपि सुहृन्निदेशमशून्यं विधेहीति (व्याहृत्य) विरराम।

अथ गगनमध्यमधिरोहति रोचिषां पत्यौ नन्दः ससुहृज्जनो नन्दनस्य नामकरणोत्सवाचरणाय स्नातः प्रसाधितो नवगोमयोपलेपहरितस्थण्डिलमन्तः-प्रदीप्तमङ्गलप्रदीपमश्वत्थपल्लवावृतमुखैः पूर्णकलशैरधिष्ठितमेकतश्च पवित्रमूर्तिभिः श्रुत्युच्चारणचतुरैर्द्विजन्मभिरलंकृतं भवनमविशत्। तत्र च विमलप्रच्छदपटा-च्छादितपीठिकानिषण्णस्य तस्य पार्श्वे यशोदा पुत्रमुपनिषदिव पुरुषं पुराणमुत्संगेन धारयन्ती न्यषीदत्। अनन्तरं च गर्गेण बहुमुखोच्चारितश्रुतिना पितामहेनेव धरणितलकृतावतारेण यथाविधि समापिते पुण्याहवाचनविधौ व्रजपतिरुच्चाटन-मन्त्रमिव दुरितस्य सुचरितपरिपाकमिव श्रुतेर्जन्मसाफल्यमिव जिह्वायाः सुधानि-षेकमिव हृदयस्य नायकमिव सूक्तिहारयष्टेराकर्षणचूर्णमिव संपदः कुञ्चिकामिव मोक्षद्वारकवाटस्य सूनोरम्बुजेक्षणस्य दक्षिणश्रवसि कृष्ण इति नाम प्रणवपूर्व-मुच्चारयांबभूव। हर्षजलाप्लुतनयनश्च तनयमुत्संगेन धारयन् शिरसि सुचिरमभ्यजिघ्रत्। गर्गस्तु सत्कृतस्तेन तत्रैव तं दिवसमनयत्। अपरेद्युः स्वमेव घोषं प्रस्थाप्य गोपपतिं भोजपुरं जगाम।

एकदा तु पूतना गोपकुलं प्रविश्य गोपिकारूपधारिणी सुतदिदृक्षया निर्गतायां यशोदायां कपटशिशुभावसुभगं वटदलमिव बालशयनमधिशयितं निहन्तुकामा कैटभारातिमासादितवती। आसाद्य च वत्सलेवाभिनीतहर्ष-विस्फारितचक्षुषा मुखेन किं बुभुक्षितोऽसीति पृच्छन्ती ददामि स्तन्यमिहागच्छेति सकृदास्फालनकणत्कारिपारिहार्यहारिणौ प्रसार्य करावुज्झितरुदितमूरीकृतस्मित-मुत्थातुमिच्छन्तमिव किंचिदुदञ्चितपाणिपादमादाय तमङ्केन धारयामास। कृत्वा

च शिथिलमुरसि दृढनिबद्धमुत्तरीयांशुकग्रन्थिमंसपर्यस्तवदना दक्षिणकरोदस्तशिरसस्तस्य वक्त्रे वामकराङ्गुलिलुलितचूचुकं स्तनमदात्। तदा च तस्याः स्तनमुभयपाणिपुटपीडितं पिबन् प्राणप्रयाणशङ्खमापूरयन्निव रराज राजीवलोचनः। तेन च पयसा सह पीयमानासुरलं मुञ्च मुञ्चेति कथयन्ती मुक्तघोरार्तनादा भीषणेन वपुषा कम्पयन्तीव भूतलं पपात पूतना। यशोदा तु निर्घातपातनिष्ठुरं निशम्य पतनध्वानभयविसंस्थुलपदं जरठखर्जूरजर्जरकरालवपुषं सिरालजङ्घाविडम्बितारालवीरुदाश्लिष्टतालभूमिरुहां पुरातनवसापानदूरोन्नतपृथूदरां मारुताध्मातभस्त्रानिभस्तनीं शाल्मलीशाखिशाखानुकारिबाहुमुत्कटदंष्ट्राविटङ्कसङ्कटास्यकन्दरामन्धकूपनिभचक्षुषीम् अचिररोचिःकडारकुटिलकचनिचयाम् असुरकुलोत्पातकालिकामिव रुधिरमुद्वमन्तीमुत्तानशायिनीमुद्वीक्ष्य तां भीतापि तदङ्कपर्यङ्कशायिनमादाय शिशुमुदीरयन्ती सकलभुवनपावनान्याम्नायसारभूतानि नाम्नां शतानि मधुरिपोरलिकभुवि करीषचूर्णेन रक्षामकार्षीत्। स कदाचित् पूतनाप्राणपवनपानसर्पशिशुर्यशोदया शकटस्याधः शायितः क्षुधितः किल रुदन् कोकनदकोमलाताम्रेण (करेण) मणिघर्घरिकामुखरौ चरणावुदक्षिपत्। तयोरुत्क्षेपमात्रेण पर्यस्तमहावसानमिव विघट्टमानचक्रद्वयम् अनलमिव विकीर्णकालजालं संवर्तमिव युगपरिवृत्तभयंकरं विरक्तमिव मुक्तसकलधुरं सवेदनमिव विकृतघोरारवं शकटमालोक्य सर्वे च विस्मयं भेजुः।

नन्दभवने च स तस्मिन् जगत्यभ्युदयेन वर्धमानः कदाचिदङ्कुरितकतिपयदशनशोभिना संसक्तस्तन्यशीकरेणेव वदनकमलकेन मुदमालोकयतामुदपादयत्। कदाचिच्छुक इव कोमलैरनतिस्फुटाक्षरैरालपैः श्रुतिसुखमापादयन् स गोपिकाकरतलेषु विचचार। कदाचित् कृतजानुचङ्क्रमणकेलिर्वृषभ इव विरचितगभीरकण्ठध्वनिरितस्ततः सभयाभिनयमपसर्पन्तीराभीरसुन्दरीरनुससार। कदाचित् स्तन्यपानकौतुकी मातुर्दधिमथनविघाताय सविभ्रमभ्रमितमन्दरोऽपि कलशोदधे[73] र्भ्रमन्तं करयुगेन कथमपि मन्थानमग्रहीत्। कदाचिदवलम्बितजननी-

73. When construed with Mandara *Kalaśodadhi* means

कराङ्गुलिर्द्वित्राणि पदानि निदधानस्त्रैविक्रमं चरितमनुससार। क्रमेण च ज्यायसा रौहिणेयेन क्षितितलदत्तपदेन यमुनापूर इव जह्नुदुहितृप्रवाहेण (सहित:) संजज्ञे।

स कदाचित् सकलपाशच्छेदहेतुरुलूखले नवनीतचौर्यकुपितया जनन्या दाम्ना न्यबध्यत। दृढदामनियमितोदरश्च तदा वासुकिनिबद्धमध्यस्यानुचकार मन्दरगिरेः। तदनु सलीलमुलूखलमाकर्षन् दाम्ना जातपीडन इव रुदन् रोदनातिशयलोहिते रक्तोत्पलपलाशसोदरे कज्जलकलिलबाष्पसलिलकलङ्कितबहिर्भागेन पाणिना मृद्गन्नङ्गणभुवि जानुचरो रिङ्खणविधिमाचचार दामोदरः।

तत्रैव पुरा नारदामर्षेण यमलार्जुनतामुपगतयोर्मणिग्रीवनलकूबरयोः शापभङ्गाय तयोरन्तरे जगाम जलजेक्षणः। गच्छंश्च तिर्यग्गतोलूखलाकर्षणनिभात्[74] ककुभावुभावभांक्षीत्[75]।

व्रजपतिरित्थमुत्पातजातभीतिः कुलवृद्धैः सह संमन्त्र्य सकलमपि गोपवृन्दं बृन्दावनगमनाय संदिदेश। ततश्च सर्वतश्चलद्भिरारोपितस्थविरबालयोषिज्जनैरधिष्ठिताज्यदधिदुग्धभाजनैर्बलीयस्तरबलीवर्दयुगलजवव्यग्रसारथिभिः शकटैः संकटपुरोभागः पृथुलस्कन्धविन्यस्तविविधधौरेयवैवधिकः पश्चाद्भागप्रचलदुत्सिक्तवत्सकुलैः खुरधूलिपूतदिग्भिः कैश्चित् कलशोदधिकल्लोलधवलैः कैश्चिल्लवणोदधिलहरीमेचकैर्विन्ध्यधातुच्छुरितरेवातरङ्गताम्रैः कैश्चिज्जह्नुतनयोर्मिसंभिन्नकालिन्दीवीचिकर्बुरैरन्यैरप्यनेकवर्णैर्गीतैरिव ऋषभानुगतैस्तारागणैरिव सरोहिणीकैर्दिव्यर्षिभिरिव कपिलानुषङ्गिभिररण्यैरिव फलिनीसहितैः पुरोगामिगोपालकाकारितैरहमहमिकया

Kṣirasamudra, and in the context of *dadhimathana* the expression may be understood as *Kalaśaḥ udadhir iva*. *Vaijayantikośa* notes *kṣirodaḥ kalaśodadhiḥ*.

74. *nibha* is a synonym of *vyāja*. *nibhaṃ ca kapaṭo'striyām* is the *Vaijayantikośa*.

75. *kakubha* is a synonym of *arjunavṛkṣa*.

धावद्भिर्गोधनैर्धरित्रीतलं पवित्रीकुर्वन् व्रजः क्रमेण गन्तुमुपचक्रमे। नन्दश्च नन्दनौ शकटमारोप्य रोहिणीयशोदाभ्यामङ्केन धार्यमाणौ परिपालयन् धन्विभिरन्वीयमानः प्रावर्तत प्रस्थातुम्।

तदा च निजदयितानुरोधशिथिलितमन्दमन्दगमनानां वल्लवीनां पाणिपल्लवपरस्पराहतिभुवा शङ्खकङ्कणखणत्कारेण ससंभ्रमोत्कर्णहरिणगणाकर्णितेन शकटचक्रचीत्कृतेन प्रतोदव्यथाविहितवल्गनानां श्रमोपचितफूत्कारमिश्रैरनडुहां कण्ठघण्टारवैर्धेनुकानुधावनकृतौ श्येनकूजितानुकारिणा गोपशूत्कारेण सालशिखरारूढसंभ्रान्तवनदेवतानिशमितेन शृङ्गध्वनिना सविधगिरिगुहागर्भनिर्भरोदितप्रतिश्रुता मिथः कलहायमानानामुक्ष्णामुदारकण्ठरटितेन मुहुरभ्यर्णतरलतर्णकालोकनवलितकन्धराणामन्योन्यशृङ्गसंघट्टनिनदानुगामिना च खुररवेण गवां मुखरितमखिलमपि भुवनमभवत्।

व्रजपतिरपि व्रजन्नुपान्तपल्लीनिवासिभि र्भिल्लचमूपतिभिरुपहृतानि वन्यानि फलानि मधूनि मयूरपिञ्छानि च स्वीकुर्वन् क्रमेण नभसो मध्यमध्यासेदुषि सवितरि सकलर्तुपरिष्कृताभोगमितस्ततः प्रवृत्तकालिन्दिनीसेकपूरादिव बहलश्यामलतमालकृतमालैः परिपाकपतितफलरसात् पिच्छिलतलतालशालिभिः करिकर्णतालताण्डवतरलपर्णहिन्तालसंतानैरविरलगुलुच्छसंछन्नमातुलुङ्गसङ्गिभिः पल्लवकलितलतिकालिङ्गितललिताङ्कोलकोमलैः प्रियङ्गुमञ्जरीपुञ्जसंचलितचञ्चरीकचारुभि र्मरिचलतानिकुञ्जखञ्जन्मिहिरमरीचिभिः खञ्जरीटमिथुनाधूतमधूकमधुगन्धिभि र्निचुलमुचुलिन्दनिचुलित[76]कुन्दकुरुविन्दैरभिनवमाकन्दकन्दलास्वादमोदमानकलकण्ठकलालापमुखरितोपकण्ठैरीषदुन्मिषितकुसुमशिरीषशोभिभिरुद्भूतकेतकीसूचिसूचितचातकामोदैरामोदमानयूथिकाशीधुशीकरासारशीतलैः कूजितानुमितकुरवनिगूढकुररैः फलहरणकलहकुपितकपिकुलाकुलितनालिकेरपालिभि र्मुकुलालंकृतवकुलैः कलविङ्क-

---

76. MSS seem to read *niculamaculakunda*. Perhaps it should be *niculamuculinda*.

केलिसंकुलकक्केलिभिः [77]क्रमुककुहलिकाधूलिविसरधूसरितभूपरिसरैः कोयष्टिकाधिष्ठितक्रोलयष्टिभिरपरिमितकुसुमपटलपाटलीपटलैः विंकटवटविटपिचिपिटितगगनद्राघिमभिर्द्राक्षालतोपवननिद्रायमाणपथिकजनैः नन्दनैरिव नन्दनद्रुमाणां (मि)त्रैरिव चैत्ररथशाखिनां सहोदरैरिव वेलामहीरुहाणां बन्धुभिरिव विन्ध्यविटपिनां दायादैरिव दण्डकापादपानां निरन्तरैस्तरुभिरतिगहनं क्वचिल्लाङ्गूललग्नचकितचमरीगणरेचकभ्रमणपरिहृतकीचकारण्यं क्वचित् कलहावभग्नकलभदशनाङ्कुरशङ्काकरकरिदलितोज्झितकरीरशकलनीरन्ध्रं क्वचिदपोद्धतक्रोडदंष्ट्रामुखोद्घातमुस्ताग्रन्थिस्थपुटसिन्धुतटं क्वचिद्वासरप्रौढिसंतप्तकासरगाढावगाढकासारं[78] क्वचिदपचेलिमकपित्थफलकवलनप्रभूतहिक्कभल्लूकभूरिबुक्कारभयंकरं क्वचिदचिरप्रसूतमहिषीजिह्वालिह्यमानतरलतर्णकाकीर्णं प्लवगबलमिव गजगवयशरभसहितम्[79] इन्द्रमिव हरितपत्त्रथाधिष्ठितं रविरथमिव काञ्चनारचक्रशोभितम्[80] इन्दुमण्डलमिव निरन्तरामलकरचितरुचिम्[81] अहिमसमयारविन्दमिव कपिशतामुक्तकेसरकर्णिकारहितशोभं शक्रसैन्यमिवाध्यासितानेकपामरं वीणाप्रकाण्डमिव सप्रवालककुभं दशवदनानीकमिव परिणतजाम्बवदर्पिताच्छभल्लं धनदनगरमिव सुघटितमरतकरुचिसालदर्शनीयसंनिवेशं विवेश बृन्दावनम् ।

---

77. *Vaijayantīkośa* notes : *kuhaliḥ pūgapuṣpikā*.
78. *kāsara* means a buffalo, and *kāsāra* a pond.
79. Gaja, Gavaya, Śarabha etc. are the characters associated with Sugrīva in the *Rāmāyaṇa*.
80. When construed with *Raviratha*, the expression means *kāñcanamayāraviśiṣṭacakra*, and when connected with Bṛndāvana *Kāñcanāra* means Kovidāra tree, and *cakra* the *samūha*.
81. When construed with Indumaṇḍala the expression is to be analysed as *nirantara*, *amala*, *kara*, *cita* and *ruci*, and in the case of Bṛndāvana it is to be as *nirantara*, *āmalaka*, *racita*, and *ruci*. In the subsequent expressions too similar *sabhaṅgaśleṣas* are intended.

तस्मिंश्च मनोहरोद्देशे समन्तादवस्थापितैरनोभिरार[82]चितप्राकारमण्डल-प्रकारम् उपहृतहरितकुशपलाशपूलसंछन्नपर्णशालासहस्रम् अचिराभ्यर्णनिबद्ध-तर्णकम् उपान्तकल्पितानल्पगोष्ठम् उत्तम्भितोदारपल्लवमयतोरणाधिष्ठितद्वारचतुष्टयम् आकलितबलिविधानं घोषमकारयत्। तत्र शैशवोचितचरितौ सुतावुपलालयन् बन्धुवर्गेण सह सुखमुवास। प्राप्ते च सप्तमे वर्षे स बालः सप्तलोकपालकः क्रमेण वत्सपालो बभूव। प्रतिदिवसमग्रजन्मना सह निर्गत्य मत्तमयूरध्वनि-मुखरितहरिति वने हरिणगणविहारहारिणीषु शाद्वलासु स्थलीषु चारयन् वत्सान् सवयोभिराभीरदारकैः सह कदाचित् कन्दुकव्यापारेण कैश्चित् नियुद्धेन कैश्चिन्नृपचरितविडम्बनेन कैश्चिदुत्प्लवनेन कैश्चित् सिन्धुसंतरणेन कैश्चिद् विहरन् क्वचित् करिकलभ इव गैरिककृताङ्गरागः संचरन् गिरिकन्दरासु क्वचिन् मयूर इव रचितपिञ्छमालाभरणस्तरूनारोहन् क्वचिन् मधुकर इव कुसुमगन्धवासिततनुर-न्वेषयन् मधूनि क्वचिन् मृगपतिरिव विहरणश्रान्तस्तरुतलनिकुञ्जानधिवसन् क्वचिद् वंशस्वनानन्दितानि नैचिककुलानि[83] रचयंश्चचार चक्रायुधः। एवममुना क्रमेण नव हायनान्यनैषीत्।

अथ कदाचिदुद्दण्डपुण्डरीकच्छायानिवासिनो राजहंसान् कतिचित् प्रस्थापयन्ती दिक्षु कतिचिदतिनिभृतपदान् विदधती स्फुरत्पुरोवातविधुतशिखान् शिखिनः कतिचिन्निर्वापयन्ती कतिचिदुन्मदानातन्वती कलकलमुख-मुखरितहरितो वाहिनीः कतिचिदवनिभृतां कटकेषु प्रवर्तयन्ती काश्चिन् निरुद्ध-प्रसरा वितन्वाना गर्जितगभीरमुखरथा[84] चित्रचापकधारिणी[85] वरूथिनीव मदनस्य

---

82. *anas* means a *śakaṭa*.

83. *naicikakula* means *gokula. uttamā goṣu naicikī* is the *Amarakośa*.

84. When construed with *prāvṛṭ ratha* means Cakravāka.

85. When construed with *prāvṛṭ citracāpaka* seems to be intended to convey the meaning of *megha* (*citracāpa* standing for rainbow).

पयोधरोत्सेधहेतुराकलिततरुकदम्बकोत्कलिका यौवनावस्थेव विपिनश्रियः कृतपथिकसंचारविरतिरन्धकारितदिङ्मुखा निशीथिनीव कमलाकरमीलनस्य घनसलिलपूरपूरितसकलभूवलया हरिनिद्राप्रदायिनी[86] संवर्तवेलेव सागरविजृम्भणस्य प्रकटितवनमालिकाप्रसाधिकेव देवकीसूनोः प्रावृडाविरभूत् ।

प्रत्येकमखिलहरिन्मुखग्लपनगोपेन स्तनयित्नुभिः कवलितास्तत इतःस्फुरन्त्यो बहिर्दिनमणिदीधितय इव व्यद्योतन्त दिवि विद्युतः । जलनिधिसलिलेन सह गलितममलमुक्ताफलपटलमिव करकानिकरं वियति जलमुचो मुमुचुः । घनसमयाकृष्टविद्युत्कृपाणलतिकाविदारितनिदाघदेहगलितनवशोणितकणिका इव भुवमशोभयन्त शक्रगोपपङ्क्तयः । दिशि दिशि विकसन्ति केतकीकुसुमानि जलधरसमयस्य घोरघर्मविजयार्जितानि यशसामिवाङ्कुराणि बभुः । शिशिरतरपुरोमारुतापातभीत इव ज्वलितवियोगज्वलनानि क्षणमपि च न जहौ विरहिजनमनांसि मकरध्वजः । नीरन्ध्रनीरदनिरुद्धमिहिरमहसि निमीलितहरिति जाते जगति केवलं चक्रवाकमिथुनस्य घटनविघटनाभ्यां दिनरजनीविभागमजानीत जनः ।

अथ तेषु तटिद्दण्डताण्डवोपदेशदेशिकेषु[87] सुरकोदण्डशिल्पिषु मधुमथनस्वापनास्त्रमन्त्रेषु मकरध्वजतन्त्रपालेषु नूतनजीमूतनिचोलितदिनमणिमुकुरेषु दिनहिमदीधितिच्छविषु पथिकसरणिघातकेषु चातककुलचाटुकारेषु कुड्मलितकुटजविटपिषु कन्दलितकन्दलारण्यबन्धुषु विकसितशिलीन्ध्रगन्धिषु कूलंकषसिन्धुपूरेषु लोलम्बलोलकलिंकाकरम्बितकदम्बतरुषु तरुणतृणच्छन्नकच्छभागेषु निर्झरझरात्कारिशि-

---

86. Viṣṇu is said to go to sleep during rainy season. See the *Meghasandeśa: śāpānto me bhujagaśayanād utthite śārṅgapāṇau*, and also the comments of Pūrṇasarasvatī on this, who quotes the following from *Kūrmapurāṇa*: *kṣīrābdhau śeṣaparyaṅke āṣāḍhyāṃ saṃviśeddhariḥ, nidrāṃ tyajati kārtikyāṃ tayoḥ sampūjayeddharim.*

87. From here the expressions in locative case are adjectives to *nabhomāsavāsareṣu*, occurring later.

खरिषु कुररकुलकुशलापहारिषु वारिधाराहतिसुखितवनलुलाययूथेषु[88] कुलायगतनिभृतशकुनिषु मालतीकुसुमशीधुवासितनिशीथिनीमुखेषु गिरिगुहागूहमानजलदरवचकितकपिषु ककुभरजोराजिधूसरनभस्सु नभोमासवासरेषु कदाचिद् अग्रजेन हलिना विना जनार्दनो गोपालकुमारैः सह वृन्तच्युतनीपकोरकोपमानशक्रगोपशबलासु सलिलपूरसंस्तवशैवालितास्विव शाद्वलासु स्थलीषु गोकुलानि चारयन् क्वचिदनिलवलभ्रमितमुखरघनघरट्टघट्टनभ्रष्टतारकाक्षोदमतिक्रतम् अभितः केतकीपरागवृष्टिमम्बरवासचूर्णवृष्टिमाशङ्कमानः क्वचित् कालायसमेचकचक्रच्छायमेघसंछन्नं वज्रनिर्घोषपतनभिया कवचितमिव गोवर्धनमचलमवलोकयन् क्वचित् पुनरपि विमुक्तमुदकमादातुमवनितलकृतावतारमिव नववारिवाहनिभमिभयूथमीक्षमाणः क्वचित् पाकविशिष्टकेसराग्राणां केतकीकुसुमानामन्तर्निविष्टमूर्धभिरलिकुलनिर्विष्टशेषमामोदमाकुलितनयनमाजिघ्रद्भिरनाकर्णितासु मत्तमयूरैः[89] केकासु दत्तकर्णः क्वचिदभ्यर्णवनदेवताकर्णकार्मणमन्त्रेण[90] मृदुना वेणुनादेन मृगवृन्दान्यानन्दयन् वृन्दावनभुवि विजहार ।

तत्र चैकदा सहचरैरननुगतः पुरः प्रवहन्तीमदावदहनप्लोषेऽपि दग्धकूलपादपामकठोरातपेऽपि जलचरविमुक्ततप्तजलां कलिन्दजां ददर्श ।

दृष्ट्वा च किमिदमिति विस्मयस्तिमितचक्षुषः पुरस्तादस्य सपदि स्रोतसस्तस्मादुत्थाय विकचातसीकुसुमनिभया शरीरच्छायया नवघनसंछन्नमिव गगनमातन्वती तिमिरनिचयखचितानीव दिङ्मुखानि रचयन्ती नीलोत्पलमयमिव मेदिनीमाकलयन्ती तमालमयानिव तटतरून् विदधती अञ्जनमयमिव गिरिचक्रं कुर्वती नवफेनपटलधवलं दुकूलद्वयमुद्वहन्ती पद्ममयीव पादयोर्मृणालमयीवोरुयुगले पुलिनमयीव नितम्बभूमावावर्तमयी नाभिमुद्रायां चक्रवाकमयीव कुचयोस्तरङ्गमयीव बाह्वोरुत्पल-

---

88. *lulāya* is a synonym of *mahiṣa*.

89. MSS seem to read *mattamayūrakekāsu*. *mattamayūraiḥ* seems to be intended by the author in the context.

90. *kārmaṇamantra* means a magic spell.

मयीव दृशोः शैवलमयीव केशहस्ते[91] हंसमयीव गतौ दुहिता भूभृतः कलिन्दस्य सवेदनेव परिम्लानवदनारविन्दा मन्दमागत्य मन्दाकिनीजन्मभूमिसंदर्शनकुतुकादिव पपात पादाम्बुजे ।

उत्थाय च घर्माभितप्तकलहंसरवगद्गदया गिरा कृताञ्जलिरवादीत् । देव देवकीनन्दन नन्दगोपनयनानन्दसिन्धुचन्द्रोदय दयानिधे निधेहि मयि दृष्टिम् । दुष्टः कश्चन कालियो नाम विषधरः कमपि ह्रदगर्भमधिवसानो ममामय इव[92] प्रवृद्धिमापन्नः संतापमधिकमापादयति । तदेतत् प्रशमनक्षमं विभज्जयतु भवानिति[93] ।

मधुरिपुरपि करुणापूरतरङ्गताडनतरलैरपाङ्गैर्विकसितसरसिजदलशबलामिव तस्यास्तनुमादधानः सस्मितमिदं जगाद । अयि शमनभगिनि पश्य तावदन्तः प्रविश्य सम्प्रति ह्रदादस्मादालोलितांसः कलभ इव मृणालमद्य कालियं मर्दयामीति तां व्यसृजत् । तिरोहितायां च तस्यां रोहिणीसुतावरजः कमपि रोधसि प्ररूढमनिलचटुलकिसलयैरविरतैराह्वयन्तमिवारोहणायात्मानमाम्नायमिव शाखाशतकरम्बितं कदम्बतरुमारुरोह । आरूढे च तस्मिन् स पादपः सपुलक इव मुकुलैः सहर्षबाष्प इव दलपुटगलितैर्वर्षजलबिन्दुभिः सानन्दनृत्त इव च चलता विटपपटलेन तत्क्षणं ददृशे ।

यदुपरिवृढस्तु दृढनिबद्धपरिकरः पृष्ठप्रेङ्खितवेणिरास्फोट्य बाहुमण्डलमारचय्य सिंहनादम् आकुञ्चिताङ्घ्रिद्वयकम्पमानकदम्बतरुशाखः किंचिदानमितपूर्वकायः कालियोत्पातपिशुनकालमेघ इव दूरमुत्प्लुत्य महति ह्रदे सरभसं न्यपतत् ।

तस्माच्च निजभुजतुलितगिरिणा तेन संक्षोभ्यमाणपयसः कालकूट इव सागरतः कालिन्दीसलिलवासवासनयेव कालिमानमुद्वहन् उरगनगरार्गलादण्डदीर्घेण दिगन्तवेतण्डशुण्डानुकारिणा दण्डधरबाहुसुहृदा तत्कालोपभुक्तभुजङ्गकन्या-

---

91. Amara notes: *pāśaḥ pakṣaś ca hastaś ca kalāparthāḥ kacāt pare*. See also Note 95.
92. MSS seem to read *adhivasāno maya iva*.
93. MSS seem to read *praśamānakṣaṇaṃ vibhajyatu*.

कुचकुम्भकुङ्कुमरजःकषायितोदरेण धवलबिन्दुसंतानशबलपृष्ठभागेन महता भोगेन [94]भाययन् ग्राहान् मायूरच्छत्रमण्डलाकृतिरुन्मस्तककोपपावकशिखानुकारिमणिमरीचिदुर्निरीक्षैरुन्मज्जनरभसलग्नजरठबिसभङ्गशङ्काकारिदंष्ट्राङ्कुरभयंकरैर्दुर्विषहविषाग्नि-धूमपल्लवोपमानजिह्वावलयलिह्यमानसृक्वपर्यन्तैः परिणतगुञ्जाफलारुणेक्षणावलिभिः फणाफलकैरुदगादुरगाधिपः ।

पुरतः स्थितमसुररिपुं रे रे तिष्ठ तिष्ठेति कथयन्नुदस्तहस्तसंपुटानुकारिणा फणामण्डलेनास्फालिताननाम्भोजमायामिना भोगपाशेन दृढसंदानितवपुषमुद्दामदंष्ट्राविटङ्कसङ्कटाधूतसृक्वपुटैरुद्भ्रान्तविषपृषद्भिर्मुखैर्ददंश दशनायुधः ।

तस्य च विसर्पता विषरसेन विच्छायकायकान्तिः किंचिदिव विवशतां जगाम गरुडध्वजः । आभीरदारकाश्च सुहृदमितस्ततस्तमन्वेषयन्तः सरसि कालियव्यालेन शशिनमिव राहुणाभिभूतमालोक्य मुक्तकण्ठमाक्रन्दन्तः सत्वरमागत्य घोषभर्तुरावेदयामासुः ।

आकर्ण्य सोऽप्यतर्कितोपनतमाभीलमशनिनेव शिरसि ताडितो हा हतोऽस्मीति प्रलपन् निखिलेनापि व्रजनिवासिना जनेनानुसृतः पुरतो धावद्भिरर्भकैरुपदिश्यमानमार्गः परित्यक्तनिजनिजभवनव्यापाराभिस्त्वरिततरमापतन्तीभिर्गतिवशविक्षिप्तशङ्खवलयाभिः लावण्यजलधिवीचीरिव भुजलता धारयन्तीभिः पृथुतरनितम्बलम्बमानशिथिलबन्धकेशपक्षाभिः[95] केलिगिरिमयूरीभिरिव मन्मथस्य वलितस्तनकलशपर्यस्तानि क्षितिरजोधूमराण्यंशुकाञ्चलानि स्रोतांसीव सरिद्भिराकर्षन्तीभिरञ्जनक्लेदजनितमलिनिमभिरविच्छिन्नपातैरश्रुभिर्यमुनापयोभिरिव सिञ्चतीभिरन्तिकमार्गतरुमूलानि सहस्रशो गोपिकाभिरनुगम्यमानया पदे पदे परिस्खलन्त्या

---

94. Either *bhāpayate* or *bhīṣayate* is not correct in this context. Only *bhāyayati* is the idiomatic form. Hence *bhāyayan*. See Pāṇini's rule *bibheter hetubhaye* etc. etc. and the *Siddhāntakaumudī* on the relevant rules.

95. *keśapakṣa* means *keśakalāpa*. See Note 91.

रोहिणीधार्यमाणया[96] हा वत्स नन्दनवनोत्सव हा गोपिकोत्संगलालित हा गोपकुलालंकारभूत परिहृतपूतनादिकृच्छ्रस्य ते किमिदमापतितमद्य ? मया क्षुद्रपुण्यया श्रुत्वा पुरतः क्षुतं भवनाद् वनाय निर्गच्छन् भवान् न वारितोऽभूत्; अयि भगिनि रोहिणि तव दुःस्वप्नेन फलितमविलम्बितम्; अदक्षिणेक्षण प्रतिक्षणममन्दस्पन्दमसि धन्यम्; भवति बृन्दावनवनदेवते किमेतदुचितं भवत्या हतशैशवचापलेन सरितमवतरन्तमर्भकमुपेक्षितुम ? मातः कलिन्दनन्दिनि कलशोदधिवल्लभे दधिकलशशतोपहारेण तोषयिष्यामि भवतीम्; अनुस्वार द्विजिह्वविषवह्निविह्वलं बालमाश्वासय जलतरङ्गमारुतैः; इति विविधं विलपन्त्या यशोदयानुगम्यमानस्तदैव सरित्तीरमाजगाम।

ह्रदमध्ये च करालकालियव्यालवेष्टितं बालमासन्नविषवल्लिवेल्लितस्तम्भतरुणतमालोपमानं तमालोक्य निर्भरोदीर्णमूर्च्छानिमीलितेक्षणस्तरुरिव तटभुवि लतया तत्क्षणं दयितया सह न्यपतत्। तत्र च तौ दम्पती ससंभ्रमोपसृतेन बन्धुजनेन शिशिरजलकणोक्षणैः अंशुकाञ्चलव्यजनपवनैश्च मुहुराश्वासितावुत्थाय सकललोकलोचनोत्सवेन वत्सेन विनामुना किं फलमुपलभ्यते दग्धदेहधारणेन ? तदावयोरपि प्राणानिलेन पारणं करोतु धन्यः पवनाशन इति ह्रदावगाहाय कृतोद्यमौ निवार्य निजानुजाभिमुखो भूत्वा कामपालः[97] साकूतमिदमवादीत्। नाथ पुण्डरीकनयन सकलजनहृदयंगम किमधुनापि प्राकृत इव बालभावेन भुवनविहितवरं भुजगपतिभोगशायिनमात्मानं नावबुध्यसे ? तदुत्तिष्ठ। सम्प्रत्येवमवस्थिते भवति कम्पते बलवदखिलोऽप्ययं लोक इति। तच्छ्रुत्वा मधुरिपुरुन्मीलितलोचनः सपदि विमोचितनागबन्धः कराभ्यामवनमय्य नृत्ताचरणकौतुकी मध्यमं शिरः फणिपतेरध्यारुरोह। तदनु दर्शनायातवैमानिकसंकुले नभसि विस्मयस्तिमितचक्षुषि पश्यति वल्लवजने ताटङ्काननपवनताडितेषु नदत्सु यमुनातरङ्गवाद्येषु मणिकिरणकिसलयोपहारभाजि नागफणारङ्गभूमौ ननर्त नारायणः।

96. This and the similar expressions in the instrumental are to be construed with Yaśodayā, occurring later.

97. Kāmapāla is Balarāma.

नृत्यतश्च तस्य चरणनिकुट्टनरभसादमर्ष इव शकलीभवति फणमणिगणे रुधिर इव मुखेभ्यो निरर्गलं गलति गरले मान इव म्लानिमानमुपयाति महति भोगे सृक्वपर्यस्तयमलजिह्वालतागहनो विह्वलतामयासीदाशीविषः।

अत्रान्तरे च निशम्य निजपतिविनिपातमतिरभसगतिपरिश्लथनिर्मोकनिर्मलांशुकशून्यीकृतां सदेशाश्चूडारत्नमरीचिनिचयविरचितायत्नरक्तसिचयावगुण्ठनविलासा निर्दयकरतलताडितकुचतटत्रुटिताहारमुक्तामणिद्विगुणितगलदश्रुबिन्दुसंततयो भूषणशिञ्जितविस्फीतकरुणाक्रन्दितनिनादाः समागमन् नागयोषितः।

आगत्य पुरस्तादश्रुकणविस्रगन्धिनि विसृमरविषबिन्दुचन्द्रकच्छुरिते पयसि तरङ्गमिव प्लवमानं चिरकालसलिलदूषणरुषेव कल्लोलैरुल्ल(ल)द्भिरभिहन्यमानम् उत्तानविवृत्तधूसरोदरमासन्नवर्तिभिरावर्तैः कुण्डलीक्रियमाणकायम् ईषदवनम्रतया पराजयव्रीडितमिव प्रविविक्षुमिव बलिभवनमुपरतप्रायं प्राणनाथमुपसृत्य हा नाथेति क्रन्दन्त्यः कदाचिदासक्तफेनशकलेन वपुषि परामृशन्त्यः कदाचिदुन्नमय्य मुखानि चुम्बन्त्यः कदाचिच्चक्षुषि चक्षुर्निदधानाः कदाचित् किंचिदिव स्फुरति हृदये स्पृशन्त्यः प्रसरद्भिरश्रुपूरैरुत्कूलयन्त्य इव कालिन्दीमतिचिरं रुरुदुः।

सर्वाश्च ता मधुरिपोर्यमुनातरङ्गपवनापनीयमानाननश्रमस्य पुरतो निधाय भर्तारं भगवन् निखिलजगदवनजागरूक जगतीभारावतारणविहितजने जनार्दन जात्या क्रूरतया दर्पान्धतया च यदमुना यमुनाजलविहारिणि त्वय्याचरितं तदखिलमपि क्षमया विस्मरतु देवः। किंच त्वद्वाहनगरुडगरुदञ्चलचलनमात्रादपि त्रस्यन्नसौ बलिमधुकैटभेषु को नाम काकोदरो यद् देवेन महता प्रयत्नेन चरणाभ्यामेवमाक्रान्तः। तदिदानीमपह्नुतोत्सेकस्यास्य जीवितप्रदानादविरहितमङ्गलाभरणास्तनोतु नः स्वामीत्यभिधाय पादयोरपतन्।

देवोऽपि दयमानमना देवकीसूनुरमृतरसवर्षिणा विलोकनेनैव भुजगपतिमजीवयत्। सोऽपि प्रत्यागतासुरुत्थाय सविनयघटिताञ्जलिर्व्यजिज्ञपत्। स्वामिन् कारणमानुष विष्टपत्रितयसृष्टिवेलायामेव भगवता गन्धो वसुन्धराया जाड्यं जलस्य

दाहो दहनस्य तीक्ष्णता तिग्मरश्मेः क्रौर्यमाशीविषाणामुत्पादितम् । मयापि तेन मूढमनसा देव एव यत्किंचनकारिता दर्शिता । तदधुना प्रसन्नहृदयो भूत्वा मद्भ्रातरमनन्तमिव मामपि संततमाज्ञाकरं करोतु देव इति । सोऽब्रवीत् ।

भद्र काद्रवेय भगवतो भास्वतः सुता भगिनीयमन्तकस्य भवदीयविषानुषङ्गेण मुह्यति महिषी महोदन्वतः । तदस्याः सरभसमुत्थाय मच्चरणतलाञ्चितशिरा गरुत्मतोऽपि न त्रस्यन् बन्धुवर्गेण सह सिन्धुनेव पश्चिमं प्रयाहीति । फणिपतिरपि यदाज्ञापयसीति कृतप्रणामस्तथैवाकरोत् ।

हरिरपि यमुनाहृदगर्भनिर्गतः सत्वरमहमहमिकया प्रत्युद्गतैर्विस्मयानन्दविस्फारितलोचनैर्बन्धुभिर्नन्दप्रभृतिभिरालिङ्गितः कैश्चिच्छिरसि चुम्बितः कपोलभुवि कैश्चिद्भिनन्द्यमानमहिमा कैश्चिद् रोहिणीयशोदाभ्यामपि दूरप्रसारितकराभ्यां गाढमुपगूढः पदे पदे दुष्टाशीविषदष्टेष्वङ्गेषु सुहृद्भिरामृश्यमानो दर्शनोत्कण्ठिताशेषविट्प्रजं व्रजमयासीत् ।

अपरेद्युर्यथापुरं गोकुलानि पालयन्तौ बलकृष्णौ निहन्तुकामः प्रलम्बः[98] परिगृहीतगोपालदारकाकृतिराजगाम । कृष्णस्तु तं जिघांसु[99] र्मित्रमङ्गीचकार । गतायां च कालकलायां विजिहीर्षया हृषीकेशः सकलमपि गोपवर्गं द्विधा विभज्य प्रलम्बसुहृदमात्मानमेकत्र प्रधानमकरोत् । अपरत्र श्रीदामसहायमग्रजन्मानम् । उभयेऽपि द्वन्द्वीभूय परस्परमाभीरकुमारा जयपराजययोर्वाह्यवाहकलक्षणां[100] कन्दुकक्रीडामारेभिरे । आरब्धायां च तस्यां सर्वेऽपि कृष्णपक्षे वर्तिनः प्रमुख एव

---

98. Pralamba is an *asura*.

99. The *Bhāgavata* has the following : *taṃ vidvān api dāśārho bhagavān sarvadarśanaḥ, anvamodata tatsakhyam vadhaṃ tasya vicintayan.* (X.18.18)

100. For this *krīḍā* see the following verse from the *Bhāgavata* : *ūcerur vividhāḥ krīḍā vāhyavāhakalakṣaṇāḥ, yatrārohanti jetāro vahanti ca parājitāḥ.* (*Ibid.* X. 18.21.)

पराजयं भेजुः। इतरे तु युगपदारचितसिंहनादमुखरगोवर्धनशिखरिगह्वरमुखाः तैस्तैर्वचोभिरधिक्षिपतो निजनिजप्रतिद्वन्द्विनः करतलावलम्बितजानुभागानास्फाल्य पराङ्मुखारुरुहुः। प्रलम्बाश्चोहुः[101]। रोहिणीतनयः प्रलम्बमारुरोह। श्रीदामा च दामोदरम्। सर्वेऽपि ते प्रतिद्वन्द्विभिरुह्यमाना भाण्डीरनामधेयमवधिभूतं न्यग्रोधमासेदुः। प्रलम्बस्तु तमपि वनस्पतिमतिक्रम्य मुहुरुल्ललन् मुहुर्विहितभाषितः प्रतिकूलमलमिति वारयन्तमपि बलभद्रं प्रबलतया सलीलमुद्वहन्नतिदूरं जगाम।

गच्छंश्च परिगृह्य निजाकृतिमुत्पातनीरदनिकायमलिनच्छायकायकान्तिरतिविपुलकपोलडोलायितकपालकुण्डलेन श्मशानदहनज्वालाकलापकपिलश्मश्रुणा लम्बाधरधारिणा विशङ्कटारालदंष्ट्राकरालेन घोरघोणेन रथचक्रवृत्तचक्षुषा बभ्रुरोमभ्रुगा सिंगलालिकेन बर्बरस्थूलकेशेन शिरसा नभश्चरभयं जनयन्नन्तरिक्षमुदपतत्। उत्पतन्तं च तं रोहिणीसूनुर्गिरिमिव शतकोटिना शतमन्युरुदूढमन्युरतिनिष्ठुरया मुष्ट्या दृढसंताडितशिरसमपगतासुमसुरं वसुधायामपातयत्। अपातयंश्च परपरिमलमिलदलिकुलहलहलितमुखरममरकुसुमवर्षं सहर्षं सह महिषीभिः सर्वे सुपर्वाणः।

एकदा तु बलानुजः सुबलश्रीदामप्रभृतिभिः फलाभिलाषिभिः सुहृद्भिरभ्यर्थितो वृन्दावनैकदेशे दूर एव दर्शनीयमन्तःस्थितस्यासन्नमृत्योर्धेनुकासुरस्य रुधिरपानदोहलेन वेतालजालमिव संमिलितं कालायसालानपटलमिव विपिनमदावलानाम् इलाभारसुग्नभुजगपतिनिश्वासधूमषण्डमिव पातालबिलनिर्गतमुत्तालपवनतरलितदलकलमुखरम् इतस्ततः पतितैररुणमेचकच्छविभिरमररिपुचर्वितोज्झितनृशिरस्संघातशङ्काकरैर्मिथः कलहकुपितकपिकुलप्रहरणीकृतैर्वनदेवताकेलिकन्दुकैः फलैरुपेतमूलं विवेश तालवनम्।

---

101. *ūhuḥ* seems to be intended here as an intransitive in the sense of *jagmuḥ* (like *vahatsu vāsareṣu* etc.) The members of the victorious party (that were carried on the back by the vanquished) went on hanging heavy on the carriers (*pralambamānāḥ*).

तत्र च मुसली सलीलमुरुघट्टनेन कांश्चित् तलताडनेन कांश्चिच्चरणचलनेन कांश्चिद् अरत्निनिर्घाटनेन कांश्चिन्मुष्टिघातेन कांश्चित् तालानपातयत्। तेषां च पततां निर्घातघोरमाकर्ण्य निर्घोषमुत्कर्णः (खररूपधारी धेनुकासुरः) प्रधावन्नतग्रीवः प्रकम्पिताशेषवनचरकुलेन गलगुहाकुहरनिरर्गलवाहिना क्रमोपजायमानह्रासेन द्राघीयसा निर्ह्रादेन नितान्तमचलरन्ध्राणि रुन्धानो विकटसटापटलधू (न) नो-(द्धूतमूर्तिः) (†) [समेत्य तरसा प्रत्यग् द्वाभ्यां पद्भ्यां बलमुरसि निहत्य स खरः परिससार। पुनरपरौ चरणौ बलाय प्रक्षिपति तस्मिन् बलः स तं गृहीत्वा प्रपदोर्भ्रामयित्वा चिक्षेप तालाग्रे भ्रामणत्यक्तजीवितम्। तत् सुमहत् कर्म निशाम्य विबुधादयः पुष्पवर्षाणि मुमुचुः[101-a]।]

अथ प्राप्ते काले वर्षणप्रतीक्षया इन्द्रयाकरणार्थमुद्यतेषु गोपेषु तान् यशोदानदन इदं जगाद। (*) [102]किमस्माकममुना [102-a]अकर्षकजनानाम-भिवर्षेण। एष नः पुरस्ताद् गोवर्धन इति यथार्थनामा शैलः परं दैवतम्।

(†) इतः परं मातृकायां धेनुकासुरसंबन्धिकथाभागस्य अंशो दृश्यते। भागवतरीत्या स कथाभाग एवं भवति। (संपादकस्य)

(*) किमस्माकम्—इत्यादिर्वक्ष्यमाणभागः पूर्वदर्शित—विकटसटापटलधूननेत्यादि-वचनानन्तरमनुस्यूनतया मातृकायां लिखितो लभ्यते। परं तु भागस्यास्य धेनुकासुरवृत्तांतेन नास्ति कोऽपि संबन्धः। अयं च भागः भागवतरीत्या इन्द्रयागकृतोद्यमानां गोपानां तन्निवारणप्रदर्शककथान्तर्गत इतिस्पष्टं ज्ञायते। (संपादकस्य)

101-A. The portion within square brackets is supplied by the Editor.

102. The concluding portion of the Dhenukāsura's story, and beginning part of the *Indrayāgodyama* story are missing in the MSS. The portion from *kimasmākam amunā* is found in the MSS continuously with the expression *vikaṭasaṭāpaṭaladhū (...) no* (......) which in fact belongs to the *Dhenukāsuravṛttānta*, whereas *kimasmākam* etc. belongs to the other story. Probably the scribe of the Grantha MS, through oversight skipped over one or two folios of the previous MS from which he copied. The expression *vikaṭasaṭā*–etc. was perhaps the ending of a particular folio (say folio 30-b), and the expression

तथाहि तस्य चोपकण्ठभाजि वृन्दावने कन्दमूलफलाशिभिरुपयुक्तनिर्झरजलैस्तटतरुतलवर्तिभिः शाद्वलसंचारिगोधनैः सुचिरमुषितमस्माभिः। तदिदानीमेभिरध्वरोपकरणै[103]रयमेवाराध्यतामिति।

अथ ते सर्वेऽपि तथेति तस्य वचनमभिनन्द्य नातिदूर एव बलिमथनप्रवृद्धं हरिमिव गिरिरूपेण परिणतं[104]प्रावृट्पयोदवृन्दमिव शरदभिभूतिभयादेकत्रावस्थितम् अभिनवतमालनीलया यामुनयेव वनलेखया गाढोपगूढमूलम् उत्तुङ्गवरणशोभिभिरुन्मदगन्धगजसंकुलैः सगर्वगन्धर्वचारुभिर्हरिणलोचनालोकलोभनीयोद्देशैर्महद्भिः कटकैरधिष्ठिताभोगम् अभ्यन्तरप्रसृतमणिदीपिकाप्रकाशपेशलैरन्तःप्रवृत्तमृगनाभिपरिमलामोदिभिरामोदमानभोगिकन्याविहारिभिर्गुहागृहैः परिष्कृतम् अतिकालव्यालसंबन्धैरभ्रगङ्गानुषङ्गिभिरासन्नतुहिनदीधितिभिः पशुपतिमिव सहस्रसंख्यैः शिरोभिरुद्भासमानं पुरहरनमित इति कनकगिरिं दशवदनभुजवरोर्मिचलित इति कैलासम् अगस्त्यचरणाक्रान्त इति विन्ध्यम् असुरमथनकरभ्रमित इति मन्दरमप्यपहसन्तमिव निर्झरध्वनिभिः कन्दरमुखैरतिचित्रपत्रवल्लीपरिष्कृतं स्तनमण्डल-

---

kimasmākam etc. was not the beginning of the next folio, but of second or third next folio (say of 32-a, or of 33-a).

102-A *akarṣakajanānām* should be the expression in the context. See the following from the *Bhāgavata*:

vaiśyas tu vārtayā jīvet.....................
kṛṣi-vāṇijya-gorakṣā kusidaṃ turyam ucyate,
vārtā caturvidhā tatra vayaṃ govṛttayo'niśam.
(X.24.vv.20 & 21)

103. MSS read *adhvakopakaraṇaih.* I think it should be *adhvaropakaranaih.* (meaning that the items were intended for the purpose of performing the *Indrayāga* in the context).

104. From here, the expressions in accusative singular (Masculine) are adjectives to Govardhanaśaila, occurring at the end of the description.

मिव भुवः पर्यास्तरत्नजालं विहारहर्म्यमिव भुवनलक्ष्म्याः पातालपङ्कह्रदमूलं नालमिव गगननलिनस्य गोवर्धनं शैलमासेदुः।

ततश्च तमतिप्रीतचेतसः सहस्रकलशवर्जितैः पयोभिरभिषिक्तमभ्यर्च्य शिरसि कुसुमपटलेन कटकोपलपटलराशीकृतघृतनिर्झरीभिरन्यैरिव शिखरैरुद्भिन्नैरन्नकूटैराराद्राधयामासुः। विधिवदभिमन्त्रितेन हविषा हुतहुतभुजां द्विजातीनामाशिषः प्रतीच्छन्तो यमुनासलिलस्नपितानि हरिद्रानुलेपभाञ्जि शृङ्गशिखराबद्धविविधशरत्कुसुमदामानि गोकुलानि पुरतः प्रस्थापयन्तः शकटाधिरोपिताभिर्गायन्तीभिः कृष्णबालचरितानि गोपिकाभिरनुगम्यमाना मङ्गलवादित्रशृङ्गकाहलध्वानानुमुखरीकृतदरीमुखं ग्रहनक्षत्रमण्डला इव सुमेरुमचलं प्रदक्षिणीचक्रुः।

कृष्णस्तु रूपमपरं परिगृह्य विनिर्गतो गुहायाः गोवर्धनोऽयमिति विस्मयस्तिमितचक्षुषा मौलिनिवेशिताञ्जलिना स्तुवता घोषजनेन वीक्ष्यमाणः क्षणेन सकलबलिं बुभुजे। व्रजौकसोऽपि प्रभ्रष्टचेतसो देवकीसुतपुरःसरा निजनिजमाशमाशिषुः[105]। तावच्च निजबलिविहतिममृष्यमाणेन किल बलभिदा संदिष्टा[106]श्चिरकालकारागारनिवासवासनयेव मालिन्यमुद्वहन्तो नन्दनतमालषण्डा इव चण्डानिलरभसपातिताः कालागुरुधूपराशय इव दिक्पालनगरनिर्गताः श्रूयमाणमृदङ्गमधुरध्वनयो नृत्तमण्डपा इव विद्युताम् अपरिमितकरकाकुलितगर्भाः पानीयनिलया इव चातकानाम् आतपशमनहेतवो धारागृहा इव धराया नवपङ्कमलिनवपुषो नववगहा इव गगनपल्वलस्य सकलोदधिसलिलसंभृता मणिकलशा इव महीभृदभिषेकस्य प्रकटितकपोतपालिच्छवयः प्रासादा इव नभश्श्रियो विच्छित्तिमदासारधारिणः सेनाकरिणः संवर्तकचक्रवर्तिनः शक्रायुधशालायमानाः प्रावर्तन्त संवर्तकधूमयोनयः। क्रमेण ते विद्युन्मयमिव दिक्चक्रं गर्जितमयमिव गगनं धारामयानिव धराधरान्

105. MSS seem to read *ninijamāsamāsiṣuḥ*. *āsi ṣūḥ* is the form in Aorist of the root *aś* to eat. "Others ate their food" is the meaning.

106. From here, the expressions in Nominative plural are adjectives to *saṃvartakadhūmayonayaḥ* (i.e. *pralaya-jalada*...), occurring later.

जलमयीमिव जगतीं निर्घातमयमिव निखिलं वितेनिरे। तेषां च तत् क्षणोत्कूल-महार्णवौघमतिकृता जलपूरेण पूर्यमाणोदकाश्रय[107]मापात्यमानपाटलपर्णशालं भिद्यमानभित्तिपातजाताक्रन्दशिशुबृन्दमुटजाङ्गणानीयमानवार्धकम् अतिशिशिरपवनवेपमानजरतीकं निर्घातपातभीताङ्गनालिङ्ग्यमानयुवलोकमाहूयमानबान्धवमाकर्ण्यमानरुदितं निन्द्यमानव्रजम् [108]इतस्ततः पलायमानवृषभाधिष्ठितगोष्ठतरुमूलम् आसारवारणानुद्रुतिदूनधेनुकं निजनिजक्रोडनिलीयमानवत्सकममितोपलवर्षशकलितशकटकूटसंकुलं गोपकुलं बभूव।

कृष्णस्तु निजमखविघातजातकोपवासवोपपातितमालोक्य गोपकुलोपप्लवम् उपजातदयस्तन्निवारणाय प्रकोष्ठनिष्ठुराघातशिथिलबन्धमन्तर्निष्यन्दमानगैरिकरसमकरन्दमरविन्दमिव करिकलभः करेण लीलया गोवर्धनं शैलमुदहार्षीत्।

उन्नम्यमानश्च तेन गोत्रभिदं जेतुमुत्पतन्निव शिलोच्चयो ददृशे। तदनु यदुपतिः प्रायेणानेन [बलभिदा] विहताराधनतया सामर्षमयमुन्मूलितो [गोवर्धनो] भवेदिति [संदेहापनोदनाय] विस्मयाक्षिप्तचेतसः सर्वत्रजौकसः सावेगमाबभाषे। भो भो मा भैष्ट भद्राः। यथेष्टमस्मिन् गिरिश्वभ्रे गोधनैः सममासताम्। अहं तु भवतामुपरिनिपतदासारवारिं शिखरिणामुना वारयामि इति। तेऽपि प्रहृष्टमनसस्तदादेशमन्वतिष्ठन्। अनन्तरमुत्तुङ्गशृङ्गलङ्घितवियदङ्गणमचलमनुकलं तर्जयन्त इव[109] तटिल्लतातर्जनीभिः कुहनावराहघोणघोरघातविघट्टमानजलधिलहरीघुमघुमाघोषपोषणेन

---

107. MSS seem to read *pūryamāṇam udarārayam*. What is given in the text is only my guess.
From here, the expressions in Nominative singular (in Neuter) are adjectives to *Gopakulam*.

108. MSS seem to read *nindyamānabhirajñam*. Perhaps it should be—*vrajam*.

109. From here, the expressions in Nominative plural (Masculine) are adjectives to *ambhomucaḥ*, occurring later.

K—6

भायन्त इव निर्घोषेण सामर्षकलशभवहुंकारनिपतन्नहुषभुजङ्गशङ्काकरैः शङ्करजटाजूटवाटिकावतरदमरसरिदम्बुवेणिकानुकारिभिरतिजवनपरिवहपवनपात्यमानजम्भारिभवनतोरणमणिस्तम्भाकृतिभिरनुगतदम्भोलिपातैर्धाराकदम्बकैः प्रजहुरम्भोमुचः। अनेन क्रमेण सततमभिहन्यमानोऽपि जलधरजलधोरणीभिरुपलशकलेनापि धरणीधरस्तदा न चस्खाल। अलीकगोपालपालकोऽपि केवलमेकेन बाहुना कन्दुकमिव शैलमुद्वहन् पदात् पदमपि न चचाल। वल्लवाश्च वल्लभाभिः सह तस्मिन् गिरिश्वभ्रे तेषु तेषु प्रदेशेषु मणिप्रदीपप्रकाशपेशलेषु भूगृहगर्भेष्विव सुखेन निवसन्तः क्षणमिव सप्तरात्रमनैषुः। ततश्च केतकीवनैरप्यनभिलषितविद्युदुद्योतेषु शिखण्डिभिरप्यनभिनन्दितस्तनितेषु चातकैरप्युद्वेजनीयवर्षवारिषु निष्फलप्रयत्नेषु लज्जयेव पाण्डुतामश्नुवानेषु यथागतं गतेषु संवर्तकवारिवाहेषु वलभिदुपलभङ्गभासि निर्मलीभवति नभसि नभस्थलावतीर्णाभिरतुहिनकिरणदीधितिभिराश्यानकर्दमायां क्षितौ देवकीसुतनिदेशादाभीरास्तस्मादचलविवरप्रदेशादग्रतश्चलितशाक्वरप्रसाधनैर्गोधनैः सह सहर्षं निर्जग्मुः। स्तूयमानमहिमा च बन्धुतया यथापुरं पुरातनः निजकरतललेखामुद्रिताभोगमूलं शैलमस्थापयत्।

अतिक्रान्तेषु केषुचित् वासरेषु कदाचिदपराह्णवेलायामनुगतः सवयोभिराभीरैर्यदृच्छया गोवर्धनमचलमध्यारुक्षत्[110]। तस्मिंश्च कस्यचिन्निशितशुकतुण्डखण्डितफलरसजम्बालितोपकण्ठस्य जम्बूतरोरधस्तान्नवकुवलयकान्तिमुषा निजावयवरोचिषा नीलोत्पलायमानायामिव शशिमणिदृषदि निषण्णः पूर्वदिशि दत्तदृष्टिर्दूरादेवापतन्तं स्वाराज्यलक्ष्मीविहारसौधस्य[111] सुरवाहिनीपुलिनकूटस्य रजतगिरेरिव

---

110. *adhyārukṣat* is the Aorist III. 1, of *adhi* + *ā* + *ruh*.

111. From here, some of the expressions in genetive singular (Masculine) are adjectives to Airāvatasya, and some are to the items like *rajatagiri*, *śvetadvipa* etc. which the divine Airāvata is imagined to be by the poet in the context.

वियति कृतविहृतेः श्वेतद्वीपस्येव वियद्विष्णुपदीमुपजग्मुषः[112] शरदभ्रस्येव वाहनीकृतस्य शेषमिवैकधुरावहत्वसख्योपनतमायामिनं हस्तमुद्वहतश्चतुर्दन्तशृङ्गाटके बलिमिव कमपि वमथुमवकिरतो[113] विमलकर्णशङ्खरुचिनिचुलितं[114] विभ्रमचामरभ्रमकरं दानधारायुगलमपि धवलमिव धारयतो निशितसृणिघातनिस्सृतरुधिरबिन्दुरूषितेनेव सिन्दूरितेन शिरसा घुसृणरजश्छुरितशारदाकुचतटश्रियं प्रकटयतो गजपतेरैरावतस्य वर्णपरिस्तोमबन्धुरं स्कन्धमधिरूढम् आतपनिवारणार्थमभिमुखधृतेन सुरवेतण्डशुण्डानुकारिणा नमुचिनगरगोपुरमणिकलशमण्डितेनातपत्रेण किंचिदिव संछाद्यमानवदनाम्भोजमुत्तानवारणश्रवणतालपवननर्तितस्तनदुकूलाभ्यां रम्भातिलोत्तमाभ्यामुद्धूयमानेन भुजबलहठहृतबलवृत्रयशोनिभेन चामरयुगलेन शोभमानपर्यन्तं पश्चाद्भागाधिरोपितया स्कन्धावसक्तललितवालव्यजनया मेनकया दत्तां कुञ्जरकर्णपुटविलगिताङ्कुशेन सलीलमंसदेशप्रसारितेन पाणिना वीटिकामाददानम् इतरेण च विविधमणिमयोर्मिकागभस्तिचित्रिततलेन [115]लस्तकग्रहणलग्नस्वचापवर्णेनेव करिकुम्भपीठविन्यस्ते प्रशस्तशोणिम्नि वामपादे रक्तनलिनदललोभलीयमानमलिकुलं वारं वारं निवारयन्तम् अनुक्षणोत्क्षिप्तसिन्धुरकरोदरशूत्कारमारुतोद्धूतकेसरपरागधूसरितनयनशतपक्ष्मराजिं कर्णस्रजमासन्नसेवाचतुरायास्तुम्बुरुदुहितुरुत्तंसितवीणागर्भिताञ्जलेरंसभुवि सप्रसादं नयन्तं वासवमालोकयामास। आलोक्य च नमुचिरिपुरसौ मानुषत्वेन विस्मृतमाहात्म्यमाशङ्क्य मामुपलासारवारकेण भूधरोद्धरणकर्मणा परीक्ष्य कंसासुरनिधनविधौ प्रवर्तयितुमागत इति चिन्तयत्येव तस्मिन्नमरपतिरभ्रसिन्धुसलिलपूर्णसौवर्णकलशहस्ताभिः पटलनिहितमाल्यांशुका-

112. MSS seem to read here *śvetadvipasyeva dvipādam upajagmuḥ !!!*

113. Amara notes, in the context of elephant, as *vamathuḥ karaśīkaraḥ*.

114. *niculita* is from the Denominative of *nicula*, which is a synonym of *nicola* (i.e. veil).

115. Amara notes : *lastakas tu dhanurmadhyam*.

भरणधारिणीभिरप्सरोभिरनुगम्यमानः क्रमेण गोवर्धनमाससाद । तत्र च संज्ञानिरुद्धगमनप्रसाराकुञ्चितजानुमुखादभ्रमूर्तेरवतीर्य निवारितनिखिलराजोपचारविधिरुपसृत्य देवकीसूनुं यदुकुञ्जरं कथयितुमिवाविर्भूते[116] नोरुतरोरुभरमन्थरपदविन्यासं गमनमातन्वता लक्ष्मीविस्रम्भविहरणायेव विस्तीर्णमुरःस्थलं कलयता रागसागरनिधा(ना)येव हृदयस्य गभीरतामापादयता सुरपतिपुररक्षार्थमिव भुजार्गलायुगलं दीर्घमारचयता सकलभुवनभरणायेवांसकूटं पृथूकुर्वता सरस्वतीप्रमोदायेव वदनस्य कामपि कमलकान्तिमुत्पादयता दनुजयशोहंसभर्त्सनायेव स्वरस्य नवजलदध्वानमन्द्रतां दिशता निरवधिकरुणापूरस्वैरचारायेव विलोचनयुगं विशालतां नयता जयिनेव[117] वयसा प्रसाधितावयवमालोक्य सुचिरमामोदशालिना नयनजालेन[118] चरणयोरर्चयन्निव वनकमलसहस्रेण पुरःपर्यस्तमुकुटेन मूर्ध्ना प्रणनाम । प्रणमन्तं च तमालिङ्ग्य निवेशयामास निकटे कैटभारातिः ।

स च हर्षविकचनयनः सविनयमिदमकथयत् । यदुवर्यावधार्यताम् । अनवरतनिपतदासारवारणोदस्तगोवर्धनेन त्वया रक्षितायां गोत्रायां गोलोकदेवतादेशेन सर्वासामपि गवामाधिपत्ये भवन्तमभिषेक्तुमागतं मयेत्यभिधाय लब्धानुमतिः[119] अप्सरोभिरुपनीताभिस्तपनीयकलशावर्जिताभिर्जाम्बूनदाम्बुरुहकेसरविसरवासिताभिरद्भिर्गोविन्द इत्युपेन्द्रमभ्यषिञ्चत् । अभिषेकानन्तरं च दिव्याम्बराभरणकुसुमधारिणममरमिव सकलफलप्रदायिनं तमुद्वीक्ष्य सप्रश्रयमब्रवीत् । देव धरणीतलकृतावतारेण कियन्तं कालमस्मदीयपदे दौस्थित्यहेतोरखिललोककण्टकस्योग्रसेनसूनोरुद्धृतौ विलम्ब्यते भवता इति ।

---

116. The expressions in Instrumental singular, like *āvirbhutena* etc., are adjectives to *vayasā*, occurring later.

117. MSS seem to read *nayanena payasā* (or *sapayasā*). What a work of the scribe !! Perhaps it should be *jayineva vayasā*.

118. MSS seem to read *nayanajalena*.

119. MSS seem to read *baddhānumatiḥ*.

कृष्णस्तु कृतस्मितः प्रत्यवादीत्। वज्रिन् यथाभ्यधायि त्वया तथैव। किं तु न खलु दनुजविभुरस्यां व्रजभुवि निवसन्तमन्तकमात्मनो मनाक् जानाति। तदस्मै देवकीगर्भावतारादारभ्य मदीयमुदन्तमावेदयितुं श्वः प्रातरेव नारदः प्रस्थापनीयस्त्वया मथुराम्। तदनु स्वनाशमाशङ्कमानः कंसो येन केनचिदुपायेन साकमग्रजेन मामानाययिष्यति निजां राजधानीम्। तदानीमात्मनो मनोरथं सफलमवेहीत्यभिधाय विबुधावासगमनाय सुरनायकमादिदेश।

सोऽपि तत्क्षणमाधोरणाढौकितमारुह्य वारणपतिं यथागतेन वर्त्मना दिवमगमत्। गच्छतस्तस्य गमनानुकूलनिक्वणदैरावतघण्टारवश्रवणचकितैरिव हरिभिराकृष्यमाणश्चरमगिरिशिखरमवततार दिवसकरः। गोविन्दोऽपि गोवर्धनगिरेरवतीर्य वंशस्वनावर्जितानि प्रस्नुतस्तनभरक्षरद्धाराशमितखुररजांसि गोधनानि पुरस्कृत्य गोपिकाजनेन मार्गप्रहितचक्षुषा प्रतिपालितागमनमहोत्सवं वात्सल्यात् सत्वरापतितजननीजनं हुंकाराकर्णनोत्कर्णतर्णकं व्रजं वव्राज। क्रमेण च विकासिताशेषतामरसः शेषशायिपुरुषनाभिनलिनमिव विकासयितुं वासरपतिरपरमाससाद सागरम्। अम्भोरुहाणीव निमिमीलुरलिकुलमलिनिमच्छुरितानि हरितां मुखानि। कुमुदानीव दूरविक्षिप्तपत्राणि विजघटिरे झटिति चक्रवाकमिथुनानि। विरहदहनार्चिष इव दिवसनिभृतदीप्ता जज्वलुः प्रकाममोषधयः। अथ प्रशान्तघोरघर्मवासरे तामरसशर्महारिणि सन्ध्यापयोधरकदम्बरज्यमानककुभि शमितरविग्रावदावशिखिनि निजनिजकुलायनिलीनशकुनिकुलमूलशाखिनि विघटितपथिकजनसंचारे पञ्चायुधसुहृदि जलदकाल इव विलसति प्रदोषसमये दिशि दिशि विसृमरतिमिरवलाहकविसृष्टकरकानिकरनिभो नभसि वितस्तार तारकाप्रकरः। कुत्रचिदागत्य दिनविगमविहारकौतुकी घनगगनतरोः किसलयमिव कबलीचकार सन्ध्यारागमन्धकारगन्धद्विपः। ततः प्रभूते[120] इव भूधरगुहागर्भे वर्धित इव मदपयसा वनभव-

120. The expressions in Locative singular, like *prabhūte*, etc., are to be construed with *andhakāre* (*gāḍham upagūḍhe*).

करिषु धृत इव कुलगिरिकटकोत्सङ्गेषु विरचितरिङ्गण इव हरिदङ्गणेषु कृतपद इव यमुनातटकाननस्थलीषु कलितालाप इव कुमुदमधुमदामोदमुखरेषु मधुकरकुलेषु प्रवृद्ध इव निर्वाणपूषपाषाणदहनधूमेषु तरुण इव वनलताभवनेषु मदनशरपरवशाशेषु चेतसा निशयोपगूढे गाढमन्धकारे क्रमेण चोद्गच्छता चन्द्रालोकेन चरमेतरगिरिशिखरे ज्वलदोषधिरोचिषेव प्रकाशतामाससाद शातमखं शनैराशामुखम् ।

कतिपयशशिकिरणाङ्कुरधवलपूर्वभागमेकदेशदृश्यमानकुसुममिव केतकीषण्डमम्बरमशोभत । अनन्तरमुदयतटकदम्बकापतितः कालियमिव कालिन्दीपयसि माधवो नभसि तिरस्कृताम्बुजद्युतिना पादेन कुतिमिरमशेषं मर्दयन् शुशुभे मृगलाञ्छनः । अमृतफेनपिण्डपाण्डुरावर्तचक्रमिव कौमुदीनदीपूरस्य कुमुदिनीनाथमण्डलं ददृशे । क्रमेण चिरविरहिततारागणपरिरम्भणविरचितकुतुक इव वियदङ्गणं व्रजति रजनीपतौ प्रबुद्धशिखिमण्डलश्रूयमाणमृदङ्गमधुरध्वनिषु वर्धमानेषु गोवर्धनशशिमणिग्रावनिर्झरेषु स्मयमानयूथिकाशीधुशीकरेषु वनदेवतानिश्वासपवनवासितेषु निधुवनरभसश्रान्तशबरसुन्दरीवृन्दानुनन्दितागतिषु मन्दं मन्दं प्रवहत्सु वृन्दावनमातरिश्वसु निजकौशलभङ्गकौतुकानङ्गविरचितकोदण्डशिञ्जिनीरवानुकारिणि कैरवाकरविहारिणामुन्मिषति मधुलिहांश्च मञ्जुनिर्ह्रादे मधुरिपुरपरिमितचन्द्रिकापातचारुणि विरहविधुरचक्रवाकचरणमृदितवनलताकुसुमधूलिपुलिनमृदुनि यामुने रोधसि गोपिकाजनेन सह रन्तुकामश्चलदङ्गुलिकिसलयावृतविवृताशेषसुषिरमीषदिव मुकुलिताधरेण साचीकृतचक्षुषा मुखेन वेणुमवादयत् ।

तदा च वादयति वेणुमस्मिन् यादववंशाभरणे पुलकितमूलच्छलादलक्ष्यन्त वनशाखिनः । मन्दमन्दमान्दोलनापदेशेन सशिरःकम्पा इवादृश्यन्त वीरुधः । प्रचलिततरङ्गहस्ता हर्षादिव ननर्त यमुनापगा । निबिडनिमीलितनयनाः सुखमुकुलितलोचना इव विरेजिरे सरोजिन्यः । कुमुदविशदहासाः सहर्षभराकारा इव षट्पदावारनिभादभासन्त कुमुदिन्यः । इन्दुरपि हिमजलबिम्बमिषादानन्दजमिव

बाष्पमुदवमत्। अथ सर्वा अपि गोप्यस्तेन मृदुना वंशस्वनेन संवननमन्त्रेणेव मकरकेतोरपहृतमनसः परिहृतनिजनिजव्यापारा लघूकृत्य लज्जां स्वीकृत्य धीरभावमनादृत्य मानमविगणय्य गुरून् विहाय च सहायचिन्ताम् आकृष्यमाणा इव कान्तारभूरुहान्तेषु विहरता ज्योत्स्नापूरेण सरभसमुपसृत्य भुजङ्ग्य इव हरिचन्दनं पर्यवारयन्। तदा च सादरवनदेवताकल्पितानल्पवनपल्लवतल्पशालिषु मधुकरकुलतुमुलकलहविधुतविचकिलकलिकोपहारहारिषु परिसरसुखशयितशुकशारिकानिकायेषु लतागृहेषु तनुतरङ्गवनपवनधूतकेतकधूलिवासितासु ज्योत्स्नाविशदोत्तरच्छदासु वननदीपुलिनशय्यासु अन्तःप्रसुप्तमृगनाभिगन्धनिर्हारिषु ज्वलितरत्नदीपेषु स्फटिकशिलापट्टशयनाधिष्ठितेषु प्रासादगर्भचारेषु[121] गोवर्धनकन्दरेषु च कृतबहुरूपपरिग्रहो रमापतिरखिलमपि रमयामास रामाजनम्।

गोवर्धनसविधभुवि रुदितध्वनिमिव कस्याश्चिदाकर्ण्य[122] हे कालिके मम पांसुकेलिसख्या राधयैव तया भूयते। शार्वरिके सर्वाभिः सह गत्वा तन्मुखेन दयितोदन्तमवगच्छामः। (इति) प्रियसखि राधे किमिदमनाथेव रोदिषि। कुतस्त्वदासंगदुर्ललितो जनः सख्या सुचिरमिह मया मनोहरेषु देशेषु विहृत्य मामप्येकाकिनीं विहाय निष्करुणो गतवान् इत्येतांश्चान्यांश्च (आलापान्) दयारसार्द्रहृदयः प्रदर्शयितुमात्मानमासाद्य चन्द्रातपावदातं कलिन्दजापुलिनतलं पुनरपि विशुद्धवर्णस्वरं वेणुमवादयत्। ततश्च ताः सर्वा अपि गोपयोषितः सकलश्रुतिकार्मणं वेणुक्वणितमाकर्ण्य हरिण्य इव निर्गत्य तस्मादरण्यगर्भादालोलतारकेक्षणाः क्षणादहमहमिकया मुकुन्दमुपजग्मुः। तत्र कापि दूरे निरीक्ष्य कृष्णमम्बुदमिव शिखण्डिनी ननर्त। काचिन्निरस्य वंशं हृदयदयितस्य मदनज्वरौषधमधरमदयमधयत्। काचिल्लतावेष्टितकेन स्फुटपुलकाङ्कुरसंनाहमाततान

121. *Cāra* is a synonym of *aṅgaṇa* here.

122. *akarṇya* is also be construed with *ity etāṃś cānyāṃś ca*, occurring subsequently.

पुंनागम् । काचिन्नासाग्रनिहिततर्जनीका रोषोपहितमदिरामदलोहितिका लोभनीयलोचनत्रिभागेण दष्टदशनच्छदेन वदनेन्दुना यदुकुलतिलकमभर्त्सयत् । काचिदशो(का)त्मानमेनं निक्कणितमणितुलाकोटिना चरणतामरसेन ताडयामास । काचित् पुनरपगमशङ्कया प्रवेणिकया चरणयोर्बबन्ध यदुकुञ्जरम् । काचिदग्रपदचुम्बितक्षितिरंसनिवेशितबाहुरुरसिजतटदृढपीडितवक्षसो भर्तुरुत्पक्ष्मचक्षुषा मुखाम्बुजेन वक्त्रताम्बूलमग्रहीत् । स च ताभिराभीरभामिनीभिस्तत्कालोचितया रासक्रीडया रन्तुमुपचक्रमे ।

परस्परकरग्रथनचारुणा तेन यदुनायकाध्युषितमध्येन मुक्ताहारेणेव गोपिकामण्डलेन मण्डितोपकण्ठा महतीं श्रियमवाप यमुनापगा । सर्वतः प्रवृत्तरासलीलारसायत्तचेतसा[123] परस्परपदाम्भोजसंमर्दशब्दशब्दायमानमणितुलाकोटिरणितप्रबुद्धकालिन्दीकूलकलहंसयूथेन गतिवशविमुक्तमूकत्वरशनामुखरजघनभुवा स्तनतटताडितहारदण्डेन प्रकोष्ठडोलायमानपारिहार्यहारिणा चटुलतरकुण्डलाहतकपोलभित्तिना गीतरवाहूतहरिणबृन्देन पृथुनितम्बमणिशिलाबन्धशालिना सालेन विलासनगरस्य लावण्यपूरहरितेनालवालेन यौवनतरोरुन्मिषितरागसंपदा परिवेषेणेव सौन्दर्यचन्द्रमसः सततपरिभ्रमचतुरेणावर्तमण्डलेन शृङ्गाररसप्रवाहस्य गोपिकाचक्रवालेन सह रममाणं रमारमणमालोकयन्तः चिराय चक्षुषोरनिमेषतासफलताममन्यन्त नभसि दिविषदः । स तु जातु पङ्कजदृशां प्रमोदमापादयितुं द्वयोर्द्वयोरन्तरे निवसन् वक्षोविलोलहारश्चिरं विजहार । प्रवृद्धे च रासे विधौ सविधगतदयितपरिरम्भणपरवशात्मानः श्रमजलकणजालतारकितगात्रयष्टयः प्रसृमरनिश्वासमारुतोत्कम्पितकुचकलशा रभसशिथिलकबरभारहरितापराङ्गभागाः पर्यस्तकर्णपूरकुमुदकेसरपरागधूसरकपोलोदराणि दरमीलितलोचनारविन्दानि वदनानि धारयन्त्यः सुरतावसानलक्ष्मीमभजन्त गोपसुन्दर्यः ।

123. From, here the expressions in Instrumental singular, are adjectives to *gopikācakravāla* occurring later.

अत्रान्तरे सुधांशुरपि बृन्दावनभुवि गोपिकावृन्दपरिवृतं युदुपुङ्गवमीक्षमाणः स्वयमपि रिंसुरिव तारकाभिरपरगिरिमेखलागहनमवजगाहे। कृष्णस्तु रतिरासकेलिखिन्नमाभीरयोषिज्जनं घोषं प्रति प्रस्थापयामास। तावच्चटुलचकोरकुलचञ्चुपुटपीयमान इव तनिमानमुपगतवति मन्दमन्दवे महसि, विभातवेलाबालविद्रुमलतावितानायमानेन तेजसा सान्ध्येन हरिहयहरिति रहितायाम्, अभिमुखीभवत्सु मिथोविधुतविरहविधुरिमसु रथाङ्गमिथुनेषु, विमुञ्चति वनलताकुञ्जभाजि केतकीकुसुमधूलिपुलिनशयनानि कुञ्जरकुले, निधुवनविरतिप्रसुप्तवनचरमिथुनप्रबोधपटहेषु रटत्सु कुटिलमरण्यकुक्कुटेषु, प्रत्यूषसि परिगृहीतवृषभाकृतिररिष्टः[124] कालायसखण्डच्छविरञ्जनगिरिगण्डशैल इव जङ्गमत्वमुपगतः कलिरिव कलितकायपरिग्रहः पापनिकाय इव [125]विग्रहवानतिविकटककुदकूटपिहितककुदन्तरालः करालगललम्बिनीमभिनवकम्बलनिभां सास्ना[126]मुद्वहन् उद्वान्तफेनशीकरासारेण नासाविवरविनिस्सृतसधूमनिश्वासमरुता पुराणपद्मरागमसृणालोकलोचनेन मुखेन दारुणः परिपुच्छयमानो[127] गोष्ठं विवेश।

तत्र च कुलिशनिशितखुरशिखरावस्करणविधुरां मुहुराजिघ्रन् भुवमभितः, चिरविहितकलहविमुखानुक्ष्णः क्षणेन तक्षन्, नैचिकीराघ्रातवालमूलः काश्चिदाक्रम्य

---

124. This portion deals with the *Ariṣṭāsuravadha*.

125. MSS seem to read *pāpanikāyavīcigrahavān*. Bāṇa says in his *Kadambarī*: *sahodaram iva pāpasya...śabarasenāpatim apaśyam* (N. S. P. edn., 1948, page 69).

126. MSS read *kambalanibhāsām udvahan*.

127. MSS read *dāruṇaparipicchīyamāna* !! This is the usage of the present participial form from the Denominative verb, derived according to the rule *pucchabhāṇḍacivarāṇṇiṅ*. See also the *Vārtika* in this context: *pucchād udasane vyasane paryasane ca. paripucchayamānaḥ* means "hurling (violently) the tail around."

परिपीडयन्, काश्चिद् वलितनिजविषाणमण्डलः खण्डयन्,काश्चित् परुषरोम्णा पुच्छेन ताडयन्, काश्चिद् उद्धतहरवृषभरटितेन कण्ठध्वनिना विध्वस्तगर्भा विदधानः सुचिरमवतस्थे। तदवस्थं तमप्रतीकारदारुणमवलोक्य सकलमपि कृष्ण कृष्णेति गोपवृन्दमाचक्रन्द। मुकुन्दस्तु तमाक्रन्दमाकर्ण्य गोष्ठमभ्यापतत्। तत्र च मध्ये गवां नवाम्भोदमिव निवसन्तम् अन्तकमहिषमिव वृषभतामुपगतम् असकृदवनितलदारणोदञ्चितैकचरणमाह्वयमानमिव योद्धुमात्मानं छद्मककुद्मन्तमुपसृत्य बाहुमास्फोटयत्। तेन च भुजास्फोटनिस्वनेन जातक्रोधो निष्कम्पककोडो निश्चलोदस्तलाङ्गूलो निभृततारकेक्षणमग्रतः प्रसारितोदग्रशृङ्गायुधः शार्ङ्गधन्वानमभ्यद्रवत्। सोऽपि सोत्सेकमभिद्रवन्तं लीलया विषाणयोर्विधृतं परितश्चिक्षेप दूरमुक्षाणम्। क्षिप्तश्च पुनरपि क्षितेरुत्थितः क्षिप्रमभियायी बलरिपुणा भुजवलितकन्धरारन्ध्रदुःखनिष्क्रान्तजीवितो विदधे। हते च तस्मिन्नसुररिपुर्मुदितहृदा परिषदा स्तूयमानमहिमा त्रियामावृत्तान्तसंस्मृतिस्मेरवदनारविन्दाभिराभीरसुन्दरीभिर्नयनशुक्तिपुटैरापीयमानः स्वभवनं जगाम।

तदनु सकललोककुशलावहोदयो वल्लवावासादुदधेर्भगवानिव हरिर्दिगन्तरप्रचारचतुराः पुरस्कृत्य गा निरगात्। निर्गत्य शिखिपिञ्छपिनद्धमौलिभिरागृहीतवेणुभिः सवयोभिः प्रतिच्छन्दैरिवात्मनः प्रसाधिताभ्यर्णं बृन्दावनं प्रविश्य जानुद्वयसयवसासु यमुनाकच्छभूमिषु गाश्चारयन् ऐच्छिकरुचिताभिः क्रीडाभिः कञ्चित् कालमनैषीत्। क्रमेण वियदातपत्रकलशे वितपति जगति सवितरि पीतपयस्सु तरुमूलशायिनीषु धेनुषु कलिन्दजारोधसि कस्यचिन्न्यग्रोधशाखिनश्छायामण्डले सुखासीनैर्वेणुरवश्रवणदोहलिभिरभ्यर्थितः सुहृद्भिरब्जनयनः सव्येन समग्रन्यासचारुणा चरणेन तिष्ठन्नितरस्य तिर्यक्कुञ्चितजानोरङ्गुष्ठमुखेन मुद्रयन्नुर्वीम् ऋज्वायतोर्ध्वकायः किंचिदिव वामांसभागवलिताननेन्दुर्दक्षिणकपोलपर्यस्तमणिकुण्डलो दरमुकुलिताधररुचकमुवमरुणिमानं मूर्तमिव रागमुद्वमन् कमलगन्धिवदनपवनपूरितान्तरालममरकरनखकिरणशबलमर्चितमिव कुसुमाञ्जलिभिरनिलतरलबालकिसलयानुकारिभिरङ्गुलीभिरावृण्वन् विवृण्वंश्च सुषिराणि वेणुमवादयत्।

अथ प्रथमवैणविके वादयति वेणुमित्थम् आरादर्धजग्धयवसगर्भवदनधेनुवर्गमामीलिताक्षसुखितोक्षकम् अतरलश्रवणतालमातङ्गम् अचपलचमरम् अतिहृषिततनूरुहरङ्कुम् उत्कर्णकगोकर्णम् उज्झितरोमन्थरोहितमवहितमहिषम् अगणितसुषुप्तिसूकरम् अस्पन्दबालशार्दूलं परिहृतसंचारपञ्चाननम् अचञ्चलचञ्चरीकम् ऊरीकृतमूकभावशुकम् उत्कण्ठनीलकण्ठम् अनिमेषनयनभुजगम् अनाकुलनकुलम् अनादृतक्रीडचिक्रोडम् आनन्दमन्थरवलीमुखं मन्दमन्दगामिकलिन्दजासिन्धुकं[128] कन्दलितद्रुमविटपं द्रुतगोवर्धनोपलमखिलमपि बभूव वृन्दावनम्। तस्य च सद्वंशसंभव-

---

128. MSS seem to read: *kalindajāsindhukalinditadramāviṭapadrutagovardhanopalam.* What is given in the text is my guess.

By the expression *mandamandagāmi*-etc. the author perhaps wants to convey (1) that even the stream reduced the speed of its flow in order to listen, as it were, to the music of the flute played on by Kṛṣṇa, (2) that the branches of the trees in the area got fresh sprouts (horripilation ?) by listening to the divine music and (3) that the rocks of the Govardhanagiri too were shedding *ānandabāṣpa* on hearing the music. One is reminded of Bhavabhūti's statement.

api grāvā rodity api dalati vajrasya hṛdayam though it was in a different context. See the Introduction. Bāṇa draws a nice picture of how animals were listening to the music when Mahāśvetā was playing on the *Vīṇā* in the *Śivasiddhāyatana*. See this:

atimadhuragitāvakṛṣṭair dhyānam ivābhyasyabdhir niścalakarṇapuṭair mṛgavarāhavānaravāraṇaśarabhasiṃhaprabhṛtibhir vanacarair ābaddhamaṇḍalair ākarṇyamānagītānuviddhavipañcīghoṣām etc.

(N. S. P. edn., 1948, page 284)

मपि[129] सनिषादम् अद्वितीयमपि पञ्चमोपेतं मधुनिष्यन्दिनमपि पावनं वेणुनिक्वाण-माकर्ण्य विस्मयाननविधेयचेतसश्चिरं व्रजौकसश्चित्रगता इव गतस्पन्दमवतस्थिरे ।

अत्रान्तरे मधुरेशनिदेशतः केशिनामा दानवः प्रविश्य वृन्दावनमुररीकृत-तुरङ्गाकृतिर्भर्त्सयन् वत्सान् प्रधावयन् धेनुकुलं धिक्कुर्वंश्च शाकरान् यानाय यदुनायकमभिदुद्राव । अथ दूरादेवापतन्तं चरित इव वपुषि (भीषणं) पापकृताविव खुरे क्रूरं वैर इव गले दीर्घममर्ष इव श्रवसि निश्चलं हेषित इव केसरे परुषं जीवित इव वालधौ चलम् अचलजीवजङ्गममालोक्य तुरङ्गमं व्रज-पतिकुमाराः सुहृदः सर्वेऽपि गृह्यताम् (अयं) सहसा यमालयं नीयतामिति मिथो बभाषिरे । अरिष्टहन्ता तु पश्यत तावत् सहसा यमालयमेव नीयत इति निवार्य तान् संमुखमागच्छते तस्मै सलीलमतिष्ठत् ।

स च तमुपसृत्य हेषमाणः परिवृत्य सत्वरमुदञ्चिताङ्घ्रिरूर्ध्वमुरसि प्रजहार । चरणप्रहारपरिहारगाढमन्युश्च मूढः पुनरपि तं द्रष्टुमनाः प्रसारिता-यतग्रीवः प्रकटितकठोरवदनं व्याददद्[130] वदनमभ्यापतत् । कृष्णश्च तस्य वक्त्रकुहरे तमालशाखानुकारिणं बाहुमाशु प्रावेशयत् । प्रविशंश्च तदा तदास्यवल्मीकं प्राणानिलाहरणलालसो भुजग इव बभौ चतुर्भुजस्य भुजः । तेन च प्रवृद्धिमासेदुषा मनोरथमिव मातुलस्य दैतेयं द्विधा विदधे ।

अथापरेद्युरपरोदधिपयसि सकलसरोरुहकुशले फलिनीफलरोहितत्विषि तिरोहिते तिग्मरोचिषि प्रवालपाटलिमपाटच्चरे वरुणदिङ्मुखस्य प्रचुरयति चारुताम्, अधररुचक इव नवयावककान्तिभाजि सन्ध्यारागे, विसृमरतिमिरभरधुरीणस्य

---

129. There are three *Virodhābhāsas* in this expression. See the Introduction for the illustrations of *arthālaṃkāras*.

130. The *parasmaipada* in *vyādadad* is according to the rule *āṅo do'nāsyaviharaṇe* (I. 3. 20.)

नभस: श्रमसलिलकणगण इव स्फुरति तत इतस्तारकानिकरे, प्रदोषमातङ्गमद-जलस्रोतसि मलिनयति निखिलमवनितलमलिपटलमेचकतमे तमसि, श(र्क)रिल-देशनिविशमानमृगयूथे शकुनिकुलकलकलकलाकुलकुलायशाखिनि वृन्दावने दूराध्ववहनश्रान्तवाजिना रथेनाक्रूर: प्रत्युटजमुद्दीपितदीपिकालोकलोहिताङ्गणम् आवासयष्टिशिखराधिरूढकुक्कुटकुलम् अतिललितगोपिकागीतानुषक्तमुसलध्वनिमुखरम् (एकत्र), मन्दिरकृतविहारडिम्भकदम्बकविडम्ब्यमानकृष्णबालकक्रीडम् अपरत्र कैश्चित् सनामग्राहमाहूयमानै: कैश्चिदुन्मुक्ततर्णकालोकनविहितहर्षहुंकारै: कैश्चित् स्तनंधयवत्सदेहलेहनवलितकन्धरैर्नैचिकीकुलैराकुलान्तरं घोषमाससाद ।

तत्र चैकगोष्ठभुवि सीरिणा सहावस्थितमुपरिधृतवलमथनधनुषमभिनवजलधरमिव धरणितलकृतावतारम् उद्धूतधूलिधूसरावयवमालिङ्गितमिव प्रेम्णा वसुधया सुरभिगन्धलोभलोलमधुलिहम् अहिमकरकरग्लपितविविधकुसुमकेसरम् आजानुलम्बिनीं वृन्दावनदेवतोपहृतां वनमालामुद्वहन्तम् आलिप्तगोवर्धनगैरिकद्रवेण संक्रान्तलक्ष्मीचरणलाक्षारसेनेव वक्षसोपशोभमानम् अस्तमुपगच्छता रविणा द्यावापृथिव्योर्विभक्तमातपमिव निक्षिप्तं नवकर्णिकारगौरं वासोयुगं वसानम् अभ्यर्णदुह्यमानधेनुदुग्धधाराध्वनिमाकर्ण्य निजभुजबलवलितमथनगिरिपरिभ्रमणपूर्यमाणपयस: क्षीरसागरस्य घुमघुमिकारवमनुस्मरन्तम् अन्तिकस्थितैरारचिताञ्जलिपुटै: भद्र भवता वर्धिता यमुना[131] फलिनी जाता प्रात: प्रसूता नर्मदा मिथ: कलहायमानैरुक्षभिरनुसृता भागीरथी बलोपलालिता ललिता वृषभेण सायमाक्रान्ता समुच्छूनसदापीनभारा धरित्री प्रसविष्यति पञ्चषैरेव दिवसैरिति गोपालकैरावेद्यमानं गवामुदन्तमाकर्णयन्तम् उपजातविस्रम्भतया समीपस्थितमुत्कर्णकोशमुदस्तलाङ्गूलमुक्षाणं ज्योत्स्नावदातवर्णसास्नायां तरलितनखरमुखेन पाणिना सलीलं कण्डूयन्तं पुरुषं पुराणमद्राक्षीत् ।

---

131. The expressions occurring here as Yamunā, Narmadā, Bhāgirathī, Lalitā, Dharitrī etc. are the names given to some cows in the context.

दृष्ट्वा च दूरादेवावतीर्य रथादुत्तमाङ्गधृताञ्जलिरुपसृत्य बलकृष्णावक्रूरोऽहमिति कथयन्नष्टाङ्गस्पृष्टभूतलः प्रणनाम। उभावपि कृतप्रणामं तमुत्थाप्य गाढमालिलिङ्गतुः। आलिङ्गितश्च ताभ्यां पुण्यकृतां शिरसि वर्तमानमात्मानं मन्यमानो नन्दभवनं जगाम। तावता च कालांशेन नातिचिरान्निवेद्यमानमाकर्णयितुमिव मथुरावृत्तान्तम् अभ्यन्तरादम्बुधेराससाद वासवीयां दिशं निशीथिनीनाथः। उत्थिते च नभसि शर्वरीशङ्खताटङ्कशङ्काकृति पङ्कजातङ्ककारिणि शशाङ्कमण्डले विशदामृतफेनपिण्डपाण्डुना क्षीरोदेनेव पुरुषोत्तमदर्शनागतेनेव ज्योत्स्नापूरेण पूर्यमाणे जगति चन्द्रोदयार्घसंपादनायेव धारयन्तीषु पयांसि गोवर्धनगिरिशिखरशशिमणिदृषत्सु शशधरकरकृत्तपातिते तमसीव विभाव्यमाने यामुने स्रोतसि निजपतिपरिरब्धयामिनीस्वेदपृषतेष्विव[132] कुमुदशय्यासु निपतत्सु षट्पदेषु तरङ्गिते सरोऽम्भसि निद्रायमाणनलिनीनिश्वासपवन इव प्रवृत्ते मातरिश्वनि गरिष्ठगोष्ठस्थलशायिनीषु संविशन्तीषु निजदेहवलितकन्धरासु धेनुषु क्रमेण मन्थररोमन्थकर्मणि निमीलत्पक्ष्मचक्षुषि निद्रामाद्रियमाणे ककुद्मत्कुले कृष्णस्तु कृताहारमागृहीतताम्बूलमग्रजेन सममङ्गणवेदिकायामासीनमपगताध्वश्रममक्रूरमप्राक्षीत्।

भद्र कच्चित् कुशली मम कृते सुचिरमनुभूतनिगलबन्धनस्तातः। कुशलिनी वा जननी मद्विरहजनितशोकविधुरा। कीदृशस्तयोरुपरि राज्ञो मातुलस्य प्रसादः। किमर्थमत्र भवतायातमिति। स तु सप्रश्रयमब्रवीत्। देव जगतामपि जनयितुस्तव पित्रे किं नाम कुशलमनुयुज्यते देवेन। तथापि यदनुयुक्तं तत् सर्वमावेदयामि। श्रूयताम्। पूर्वेद्युरुदिते भगवति पूर्वहरिन्मुखविशेषके चूषिताशेषतमसि तामरसहाससंपादनविदूषके पूषणि मणिमण्डपिकाध्यासिनि समस्तसामन्तमौलिरत्नदीपराजिरचितनीराजने राजनि सहसैव विहायसोऽवतीर्य दिवसमुखेऽपि निजदेहप्रभया

132. MSS read *yāminīso preṣiteṣviva* !!!
See the Introduction.

चन्द्रातपावदातमिव तं प्रदेशमापादयन्नेणपाणि[133]पादपङ्कजप्रणयी मुनिर्वीणापाणि-राजगाम।

आगतं च तं दृष्ट्वा दूरादेवासनादुत्थाय भोजपतिरनूत्थितेन राजकेनानुगम्यमानः प्रत्युद्गम्य कृतप्रणामः परिजनोपनीते कस्मिंश्चित् तपनीयपीठे निवेश्य विधिवत् सपर्यया पर्यतोषयत्। तस्य द्रुहिणसूनोर्निर्देशेन निजमेवासनमभजत। अथ मुहूर्तमिव स्थित्वा प्राञ्जलिरप्राक्षीत्। भगवन्नितः पूर्वमेव भवता किमप्यदृष्टपूर्वमायोधनमालोकितं भवेद्यदि तत् प्रहर्षविस्तारितविलोचनं विकचकमलोपमानमाननमालोक्यते। नाधुनापि निमीलन्ति नीपकुड्मलाभानि प्रत्यवयवं पुलकमुकुलानि। असावपि न विश्राम्यति शिथिलजटाकलापबन्धः श्लाघाशिरःकम्प इति। एवं पृष्टश्च तेन स तपोनिधिः सचमत्कार इवाब्रवीत्। राजन् सम्यगज्ञायि भवता। अद्य खलु प्रातरेव कैलासनाथमिन्दुचूडामणिं देवमभिनन्द्य भुवनत्रयैकसुभटं भवन्तमाशिषाभिवर्धयितुमागच्छन्नन्तरा वृन्दावनभुवि कठोरकण्ठध्वनिभरितककुदन्तरेण ककुद्मदाकृतिना केनचिदरिष्टनाम्ना सुरद्विषा सह विश्वंभराभारावतारविहितावतारेण

---

133. Eṇapāṇi means Śiva, and the expression *eṇapāṇipāda-paṅkajapraṇayi* conveys that Nārada was a devotee of S'iva. See p. 11 line 3 (*hṛdayasthitagauripati* - etc.). See also line 11 on this page. The following verse from the *Śivānandalaharī* mentions Śiva as having a *mṛga* (i.e. *eṇu*) in His hand:

karalagnamṛgaḥ karīndrabhaṅgo
ghanaśārdūlavikhaṇḍano'stajantuḥ,
giriśo viśadākṛtiś ca cetaḥ-
kuhare pañcamukho'sti me kuto bhīḥ. (verse 44)

It is not clear whether this is a figurative reference to what is conveyed in the verse 22 of the *Mahimna-stava* (*prajānāthaṃ nātha prasabham abhikaṃ svāṃ duhitaram, gataṃ rohidbhūtāṃ riramayiṣum ṛśyasya vapuṣā*/etc.,) or to some other episode. I am unable to get further details.

भवतो भागिनेयेन नन्दव्रजवासिना बालेन बाहुमात्रायुधेन भगवता गरुडध्वजेनारब्धमदृष्टचरमाश्चर्यमदर्शमाहवम् इति ।

स तु सभयसंभ्रमं मथुरापतिरात्मविनाशशङ्की भगवन्नावेदय । मया जातमात्रनिहताखिलापत्यस्य कुतस्तस्य सूनुरित्यपृच्छत् । सोऽपि विस्मित इव किमिदमेतावतापि कालेन न विदितं भवतेत्यभिधाय नासाग्रनिहिताङ्गुलिः क्षणमिव स्थित्वा प्रथमं कथितबलभद्रजननोदन्तः क्रमेण देवस्य देवकीगर्भावतारादारभ्य सर्वमपि सविस्तरं वृत्तान्तमावेदयत् । श्रुत्वा च तं वृत्तान्तमभिभूतो भिया विकुण्ठितो विस्मयेन विषयीकृतो विषादेन क्रोडीकृतश्च क्रोधेन पर्याकुलत्वमगमत् । तदनु प्रथममिमौ देवकीवसुदेवौ तदनु कुरुविद्वेषिणौ हन्मीति सत्वरमुत्खातखड्गयष्टिमुत्थाय प्रयान्तमभिमुखमागत्य स तपोनिधिरेनं साभ्यर्थनं न्यवारयत् । ततस्तौ दम्पती दनुजपतिरतिक्रूरतया पुनरपि निगलितचरणौ विधाय बन्धनालये निदधे । तावच्च तस्य सेनापतिः केशिनामा दनुजसूनुरुत्क्षिप्त इव पराङ्मुखीभूतया नियत्या दत्तहस्तावलम्बन इव स्वयमेवोपनतेन मृत्युना सत्वरमुत्थाय देव बहोः कालादमरसमरोद्यतानामसुरचमूचयानामग्रतः स्थातुमपारयन्निद्रामिषेण लवणोदधौ निमग्नः । स्वयमेव दैवादसाववनिमवतीर्णः । तदिदानीमेव पूतनानिधनपातकिनमेनमाभीरयोषिदभिसारदुर्ललितमृषभाकृतेररिष्टस्य हन्तारमशस्त्रवधयोग्यमहं तुरङ्गमो भूत्वा द्विधा विधास्यामि इति प्रतिज्ञाय कृतप्रणामो नृपाय निरयासीत् । नारदोऽपि नरनाथ साधयामि केशिनः केशवस्य चाहमाहवमालोकयितुमिति यथागतेनैव पथा जगाम । सेनापतिविजयवार्तोपलंभाय [134]जङ्घाकरिकानादिश्य गगनकमलमणिकर्णिकायमाने सवितरि नरपतिरभ्यन्तरं प्राविशत् । तत्र च निर्वर्तिताह्निकविधेरर्धयामावशेषिणि वासरे सायास्थानमण्डपिकागतस्य सविधस्थितगायनीगीयमानं गीर्वाणराजविजयमाकर्णयतः कुवलयापीडस्य कुञ्जरपतेर्मदोत्पत्ति-

---

134. Amara notes: *jaṅghālo'tijavas tulyau jaṅghākarikajāṅghikau.*

मावेदयन्तमाधोरणं पारितोषिकेण मानयतस्तस्य दूराध्ववहनश्रान्ताः सभयमुपसृत्य जाङ्घिका भुजङ्गपुङ्गवानुकारिणा [135]भवद्बाहुदण्डेन द्विधा कृतं केशिनमाचचक्षिरे।

अथ तस्य [136]दनुजबलनाशहेतुरुत्पातसन्ध्यारागोदयस्य रञ्जिताशेषहृदया नववसन्तलक्ष्मीरधरपल्लवस्फुरणस्य तस्य स्फुरितपुलककदम्बकापूर्वप्रावृट् घोराट्टहासगर्जितोत्पत्तेः विधुतमुखसरोरुहा नूतनमारुतोद्गतिर्भ्रुकुटिलताभङ्गस्य असोढतेजस्विमण्डलमूर्तिरभिनवनिदाघसंपत् स्वेदसलिलोद्गमस्य कम्पिताखिलाङ्गपरिणतिरिव दर्पस्य कापि कोपविकृतिराविरासीत् । अन्तःप्रभूतदुर्विषहामर्षपावकोष्मणि वदने स्थातुमशक्तयेव निर्गतया गिरा मुखराणि हरिन्मुखानि कुर्वाणो बभाषे गीर्वाणरिपुः ।

सद्यः सज्जीक्रियताममरसमरसिन्धुयानपात्रं रथः । सम्प्रत्येव बृन्दावनं वनं गत्वा साकं प्रलम्बरिपुणा बृन्दारकपुरं नेष्यामि केशिहन्तारम् इति । अनन्तरमुत्थाय चाणूरो नाम कश्चिदग्रणीर्मल्लवर्गस्य साञ्जलिर्व्यजिज्ञपत् । राजन् पुरा पुरन्दराशाक्रमणसमयेऽपि न कदापि रागमुदवहन्मुकुलितविबुधवधूवदनपङ्कजद्युतिरयं मुखचन्द्रमाः । उद्धृतानेकभूभृदुद्धरणवेलायामपि निवारयतो न निरगमन्निश्वासमारुतः । किमधुना तृणाङ्कुरस्येव लघीयसोऽस्य कृते सकलजगत्प्लोषोचितमाविष्करोषि रोषानलं मिथः । यदि त्वमाहितोद्यमो भवसि (तर्हि) [136-a]डुण्डुभविजिगीषया ताडयतु समरडिण्डिमं गरुडः । प्रथयतु [136-b]पल्वलमथनाय मन्दरगिरिर्गरीयांसमादरम् । प्रकटयतु नलस्तम्बेरमः [136-c]सनालोद्धरणसंनाहम् । अपि च

---

135. Akrūra is narrating to Kṛṣṇa what was stated to have happened earlier. *Bhavadbāhu* refers to Kṛṣṇa's *bāhu*.

136. The expressions in Nominative singular are adjectives to *kopavikṛti* occurring later.

136-a. *ḍuṇḍubha* is a poisonless snake.

136-b. MSS read *pallava*. Perhaps it is *palvala*.

136-c. The reading is not clear in the MSS. What is given here is only my guess,

[136-d]रणपटहरते चलितसकलकुलगिरौ गोपालबालकजयाय निर्गते दिक्पालजेतरि त्वयि किं प्रवक्ष्यन्ति नित्यमा[136-e]जानसिद्धयुद्धबहुलबाहुमभिमानिनो जगति राजानः। तदलममुनोद्यमेन। चिन्त्यतां कश्चिदिह तदानयनोपायः। तमानीतमग्रतस्ते नियुद्धेन मर्दयिष्यामि विद्विषमिति। इति श्रुत्वा च वचस्तस्य वचनमवनीपतिः सुचिरमात्मन्येव सम्यग्विचार्य मामन्तिकस्थितमाहूयेदमब्रवीत्। भद्र दानवपते श्रुत एव भवता नारदोदीरितः कोऽपि वृत्तान्तः। प्रायेण मूढास्ते शतमखमुखा मखभुजो ये जिताः पूर्ववृजिनेषु[137]। अधुना मधुकैटभहानिमात्रगर्वितमश्रान्तनिद्राजडं गरुडध्वजमवतारयन्ति स्म मद्विजयदुराशया धरायाम्। सोऽपि को नाम सकललोकपालकालानलायमानस्य महतो मदीयभुजदर्पोष्मणः। तथापि क्षुद्रोऽप्यहिरिवाराति-[137-a]र्निहन्तव्य इति नीतिविदः कथयन्ति। अतस्त्वयैव नन्दव्रजवासिनो देवकीसूनोः सभ्रातृकस्यानयनाय यतितव्यम्। अन्यच्च भवन्तमन्तरेण चतुरं मन्त्रविचारे भाजनं भर्तृभक्तौ द्वितीयं कर्तृत्वे तत्परं परातिसंधानेप्यपरं कमपि न पश्यामि।

श्वोभूते च पवनजवनवाजिना रथेन गोकुलं गत्वा मद्वचनात् त्वया वसुदेवसुतावेवं वक्तव्यौ यथा भवद्भ्यां नन्दगोपकुमाराभ्यां धनुर्मखावलोकनार्थमाभीरैः सममागन्तव्यमिति। भवतापि भोजविषयवर्णनेन मथुरासौन्दर्यकथनेन पौराङ्गनाजनविलासहरणेन चातिसंहितौ बालतयोपजातकौतुकौ (तौ) नूनमागमिष्यतः। आगतौ च तौ मल्लयुद्धदर्शनापदेशेनानीय रङ्गद्वारभुवि हस्तिपकेनामुना चोदितेन कुवलयापीडेन पीडयिष्यामि। यदि तौ वञ्चिततदीयरदनौ रङ्गभुवं गतौ तदानीमिमौ मद्भुजद्वितयनिर्विशेषौ मल्लप्रवरौ चाणूरमुष्टिकौ निष्ठुरेण मुष्टिप्रहारदारुणारंभेण नियुद्धेन हनिष्यतः। तदनु तदनुगामिनमखिलमपि तं

136-d. MSS seem to read *apivaraṇāpiṭaharate*.

136-e. MSS read *ājānasidhyāddha*-etc.

137. MSS read *ārjiteṣu*.

137-a. See also what *Kāmandanītisāra* says; *aṇunāpi praviśyāriś chidreṇa balavattaram, niḥśeṣaṁ mārjayed rājyaṁ yānapātram ivodakam.*

(Ānandāśrama edn. 1958; p. 292)

नन्दप्रमुखमाभीरवर्गं जीवन्तमेव शूलेष्वारोपयिष्यामि। तौ च देवकीवसुदेवौ निजात्मजानुगामिनौ विधाय स्थविरमपि राज्यकांक्षिणं पितरं निहत्य कृत्वा च निर्यादवां भुवमविभज्य भोक्ष्ये भवता सहेति। अहमपि निसर्गरोषणस्य तस्यानुरोधेन दिदृक्षया च युवयोस्तथेति प्रत्यश्रृणवम्।

तावच्च दनुजपरिबृढोदीरितमतिकठोरमिमं वृत्तान्तमाकर्ण्य जातमन्युरिव शुशोण रोचिषामीशः। तदनु दनुजभर्तुः सत्पथच्युतः प्रणश्यत्यवश्यमिति निदर्शयतीव स्वयमात्मानमस्तमुपगते गतमहसि गभस्तिमालिनि, कोपोपरक्तदृष्टिरोचिश्छटास्फुरणकडारेष्विव दृश्यमानेषु सन्ध्यापयोदशकलेषु, अमर्षघर्मोदकबिन्दुदन्तुरं वपुरुडुनिकुरुम्बचुम्बिनि विडम्बयत्यम्बरे, क्रोधाट्टहासखण्डेष्विव लक्ष्यमाणेषु गृहवापिकाकुसुदषण्डेषु, स्पष्टायां च भ्रुकुटाविव बद्धान्धकारलेखायां रजन्यां स्वभवनमयासिषम्। तत्र च त्वदीयमुखचन्द्रदर्शनस्पृहापरिग्रहेर्ष्ययेव निद्रा जनं जातु नयनपथमवातारयत्। प्रत्यूषस्युत्थाय सारथित्वरितवाजिना रथेन त्वदभ्याशमभ्यागमम्। इतः परं देव एव वेत्तीति वचसो न्यरंसीत्।

तदनु तदनुजरिपुराहूय नन्दमिदमवदत्। अद्य खलु शरणागतधरणिरमणमणिकिरीटकिरणकिर्मीरचरणाम्भोजस्य भोजपतेरादेशादक्रूरोऽयमशेषानपि चापयज्ञदर्शनाय मथुरां नेतुमायातः। तदिदानीमेव सज्जीक्रियन्तां दधिघृतकलशोपायनानि। प्रातरेव गन्तव्यमधिष्ठितोदारशकटैरस्माभिरित्यभिदधदेवाक्रूरबलभद्राभ्यां समं शयनागारमयासीत्।

तत्क्षणादेव गोपिकाः कर्णाकर्णिकयाकर्ण्य मधुमथनगमनवृत्तान्तं प्रज्वलितविरहनिर्वापणायेव कुचशिखरपतनविशरारुभिरश्रुबिन्दुसंततिभि र्हृदयदेशमाप्लावयन्त्यः पुङ्खानुपुङ्खनिपतितकुसुमशरशरक्षेपणायेव निरायतान्निश्वासमारुताननवरतमुद्गिरन्त्यः प्रियप्रस्थानपरिरंभणरभसभङ्गभयादिव प्रस्खलद्भिर्वलयैः शून्यीक्रियमाणबाहुलताः कुमुदिन्य इवोन्निद्रा एव दिवसागमनमनभिलषन्त्यो[138] यामिनीमनैषुः।

138. MSS read *abhilaṣantyaḥ*. Perhaps it should be *anabhilaṣantyaḥ*, which is suitable in the context.

क्रमेण च परिहृतगगनविहारे पारावत इव वरुणनगरगोपुरविटङ्कमुपगतवति तारापतौ, निजदयितविरहविधुरास्विव धूसरच्छायासु क्रशिमानमश्नुवानासु तारकासु, दिवसदिवसकरागमनप्रतीक्षणपरास्विव दूरोल्लसितारविन्दनयनासु नलिनीषु, बलकृष्णावुत्थाय विरचितदिवसमुखोचितक्रियाकलापौ पुरस्तात् प्रस्थाप्य नन्दप्रमुखमखिलमपि गोपवर्गं तत्पूर्ववियोगविह्वलाभ्यां रोहिणीयशोदाभ्यामागृहद्वारमनुगतावक्रूरसारथी रथमारुह्य गोकुलान्निर्जग्मतुः ।

अनन्तरं च व्रजे मञ्जुभाषिणि[139] त्वरिततरमागत्य विलोकय लोकलोचनोत्सवं जनम् । जानामि भवतीं मन्दमन्दगामिनि मन्दारिणि त्यज्यतामियमुपजायमानस्तनघनप्रवृद्धिः । अंशुमति किं शुचा कतिपयैरहोभिरागमिष्यामीति तेन कथितमग्रतो यशोदायाः । मधुकरिके मधुरिपुरसौ मथुराङ्गनापाङ्गनिगलितः कथमागमिष्यति । कलापिनि अलमलमालापेन निरीक्ष्यतां क्षणमयमपक्रामति । मन्थरिके मन्दभाग्यास्मि न पारयामि बाष्पान्धलोचना महाभागमालोकयितुम् । कुमुद्वति कथममुना विना अतिवाह्यमेतदहः । कमलिनिके तिष्ठतु तावदिदम् । उपायेन केन वा यापयिष्यसि युगसहस्रायमाणां यामिनीमायामिनीम् । वल्लविके कानि वा हृदयदयितवल्लभविरहविनोदनाय प्रभवन्ति । कुन्तलिके नन्वासते यशोदावेश्मनि वेणुशिखिपिञ्छदामानि । सौदामिनि शकुनानि किंनु गमनविघातमाचरेयुः । माहिष्मति कुतोऽस्माकमेवंविधानि भागधेयानि । मकरिके यमुनासरिदुत्कूलं प्रवहेत् । अस्याः प्रमोदाय तदा किमापादयिष्यसि । शीधुमति तथा चेदन्वहमिमां स्वहस्तापचितैस्तामरसशतैरर्चयेयम् इति बहुविधानात्मावलोकनकुतूहलनां गतानां वल्लवीनां संलापानाकर्णयन् विस्मिताननेन्दुरालिङ्ग्यमान इव

---

139. Mañjubhāṣiṇi, Mandāriṇi, Aṃśumati, etc. are forms in the Vocative singular. The portion from here up to *iti...bahuvidhān...vallavīnāṃ saṃlāpān ākarṇayan*, occurring almost at the end, represents the conversation that took place among the *gopikās* on the eve of Kṛṣṇa's departure.

पुरः प्रसारितोदारशाखाभुजै र्मार्गैरुच्चार्यमाणगमनप्रश्न इव कूजता शकुनिकुलेन बृन्दावनभुवमतिचक्राम चक्रायुधः।

अतिक्रान्ते तस्मिन्नाभीर[140]भीरवो रथचक्रमार्गानुसारादागत्य निवृत्ताः कथञ्चिदुत्खातनिधानायामिव किमपि शून्यायां बृन्दावनभुवि पर्यटन्त्यः प्रियसखि स किल सिकतिलेऽस्मिन् सरित्तटे सुखमुकुलितलोचनत्रिभागमवादयद् वेणुम्। अत्र वनकरेणुमुक्तकरशीकरशीतले तमालशाखिनस्तले सुचिरमुषितवान्। अस्यां नवयूथिकायां[141] कुसुमापचयदोहलिनीमलिदंशभिया पलायितामालिङ्ग्य मामाश्वासितवान्। एतस्य बालचूतस्य पल्लवमादाय कर्णावतंसमकरोत्। अस्या नवमालिकाया मालिकां विधाय कलिकाभिर्मत्कण्ठे कृतवान्। अमुष्य कुञ्जकुरवकतरोर्मूले करकमलस्पर्शनात् प्रस्वेदिनि वामपादे विलिप्तमभिनवकदम्बमकरन्दयावकरसं मुखमरुता मुहुराश्यानतामनयत्। अस्य वकुलशाखिनोऽधस्ताद् रक्ताशोकप्रहारजातखेदमुत्सारिततुलाकोटिं समवाहयत् पादम्। अस्मिन् सिन्धुस्रोतसि मञ्जुजबन्धगृहीतः शृङ्गकरयन्त्रवारिभिराहतः सखीभिराकुलाविलकमलनयनोऽभूत्। इह सरसि विहृत्य निर्गताभिरस्माभिस्तटीनीपस्कन्धवर्तिनस्तस्य करतलगोपितरशनादर्शनकांक्षिणो निदेशेन कथमपि परिधानदानाय कथमपि विहितः प्रणामाञ्जलिः। अत्र गिरिगुहागृहे निगूढं तमहमद्राक्षम्। अस्मिन् विलुलितकिसलयशयनीयशालिनि लतामण्डपे तेन मया समं क्रीडितम्। अमुना कदलीदलतालवृन्तेन श्रमजलपृषतप्रतिक्रिया मम निकाममक्रियत। कदाचिदेतस्मिन्नचलतटे गैरिकरसेन मदलिकभुवि रचितं तिलकम्। अस्मिंश्च मृदुपुलिनतलिम[142]जुषि वञ्जुलनिकुञ्जगर्भे मदङ्कविन्यस्तशिरसा प्रसुप्तम्। इत्येवमालपन्त्यस्तत इतस्तदीयमुद्रि-

---

140. *Bhīru* means *aṅganā*. From here the expressions in Nominative plural (Feminine) like *ābhīrabhīravaḥ* are construed with *ity evam ālapantyaḥ* occurring later.

141. Yūthikā is a kind of jasmine.

142. *talima* means *talpa* (bed) also.

तक्षितिरजोऽङ्गरागेण स्तनतटमालिम्पन्त्यः तदाशया तमालानालिङ्गन्त्यस्तदीयबाहु-बुद्ध्या कालिन्दीकल्लोलमवलम्बमानास्तल्लोचनधिया पुण्डरीकाणि पश्यन्त्यः कंचित् कालमनैषुः ।

अत्रान्तरे च निरन्तरोच्चलितं हरिरथतुरङ्गरजः परिजिहीर्षद्भिस्तुरङ्गैरा-कृष्यमाणो रविरन्तरिक्षशिखरमध्यरुक्षत् । क्रमेण च तरुणतरमरीचिमालिनि मरीचिकानुसारसन्नसारङ्गे[143] रसितविकलसारसीनिषेव्यमाणसारसारण्ये पथिक-जनशरण्यमार्गतरौ तरुनीडनिगूढपत्त्रिणि क्रोडावगाढपल्वलक्रोडपाथसि वमथुकण-सिच्यमानवदनवनकरेणुकुले कुकूलरेणुनिभसिकतिलापगाकूले लुलायशृङ्गाहति-जर्जरितशैलनिर्झराम्भसि शैवलिनीलीयमानदूनमीनव्रजे मौनसखशिखिनि दहन-शिखोद्गारिमिहिरमणावनेहसि गोपीरमणस्तरुशिखरारूढवनदेवताविकीर्णविविधकुसु-मोच्चयेन पथा कलिन्दजासविधमाससाद ।

अथ तामहिमकरातपतापविदूनां दिवम् (इव) भुवि निपतितां कालमेघ-कायकान्तिमिव शरदारंभविभ्रष्टाम् अञ्जनगिरिमूर्तिमिव द्रवतामुपगतां नीलोत्पला-वलिमिव विलीनां नीलीरसधाराभिरिव निष्पादितां तमालपल्लवरसैरिव प्रवर्तितां वनगजमदजलपूरैरिव जनितोदयाम् उच्चलच्चटुलशकुनिकुलकलकलाकुलैः कल्लोलैरिव मारुतोद्धूतैः काननैरुपगूढकूलाम् अतिबहलपरिमलोद्गारसूच्यमाननीलोत्पलवनां दशनानुमीयमानसलिलावगाढगजयूथाम् आरसितज्ञायमानकादम्बां प्रतिबिम्बापदेशेन निजोष्मसंतापशान्तये भानुनेव साक्षादवगाढाम् उत्फुल्लकमलनयनाभिः कमलिनी-भिरभितः पतिप्रेम्णेव सततमविरहितां चन्द्रातपशकलैरिव रजनीशङ्कागतैः पुलिनैर्हं-सकुलकेलिसौधधियमादधानां शिक्षितकरिणीमिव ऽनुकूलगामिनीं महाकविवाचमिव बहुविषयप्रवृत्तां प्रलयवेलामिव पुष्करावर्तकोज्ज्वलां पर्यन्तलक्ष्यचित्रशतपत्रहंसयुगां नीलपटीमिव भुवं कलकलमुखरितहरितं मधुकरमालामिव भुवनकमलस्य दुष्कर्म-

143. The expressions in Locative singular like *taruṇatara-marīcimālini* etc. are to be construed with *anehasi*.

भिदुरां कृपाणीमिव धर्मसुभटस्य [144] ……………मदधारामिव कलिन्दगिरिसिन्धुरस्य विविधभङ्गिभासुरां कस्तूरिकाभक्तिमिव क्षीरोदैरावतस्य बन्धुमिव यमुनापगामपश्यत् ।

ततश्च रोधसि रथादवतीर्य विहितावतारयोर्यदुकुलकुमारयोः कृतकुशलप्रश्नेव कलहंसकुलालापैरुपपादितार्घ्यसत्कृतिरिव प्लवमानपद्मपत्त्रेण पयसा शिशिरशीकरस्राविणा च तरलतरतरङ्गतालवृन्तभुवा पवनेनाध्ववहनश्रान्तिमपजहार नदी। तौ च जलधराविव सितकृष्णौ सुधामधुरमास्वाद्य सिन्धुजलं पुनरपि तीरमवापतुः । तत्र च कस्यचित् कपोलकण्डूयनप्रसृतवनगजमदजलसेकादिव श्यामलतमस्य तमालशाखिनः सुखशयितशिखिनि मूले निषण्णयोश्च तयोर्दानवपतिः परिपीतपयसो वाजिनस्तटतरुशाखासु निबध्य सिष्णासुरुष्णांशुसुवमापगामवजगाहे ।

तस्यामुपस्पृष्टजलः पवित्राण्यघमर्षणानि[144-a] जपन्निममज्ज । निमज्जंश्च नीहारगौरमूर्तेः सीरायुधस्य नीलाम्बरधारिणः फणामण्डलाङ्कशिरसो बलभद्रस्य निषण्णमुत्सङ्गे सनकसनन्दनप्रभृतिभिरुदञ्चिताञ्जलिभिरुन्मिषितरोमहर्षैर्महर्षिभिः स्तूयमानमहिमानमभिनवतमालनीलमालीनदिव्यायुधदर्शनीयभुजपरिघमुत्तप्ततपनीयवर्णवाससमासन्नसुपर्णवर्ण्यमानपुराणरणवृत्तान्तम् आवृन्तविकचतरुणतामरसदृशं ददर्श दामोदरम् ।

दृष्ट्वा च तौ कथमत्र वसुदेवसुतावागताविति जातशङ्कस्तौ दिदृक्षुरम्भसः सरभसमुन्ममज्ज । उन्मज्जंश्च तमालमूले यथापूर्वमवस्थितौ विलोकितवान् ।

---

144. Some expressions here are not clear in the MSS.

144-a. This is the reference to the Ṛgveda X. 190. Manu says: *mucyate pātakaiḥ sarvais trir japitvāghamarṣaṇam*. XI.259. Bāna says about Hārita thus: *japan pavitrāṇy aghamarṣaṇāni* etc. (N. S. P. edn. 1948; p. 83), and again about Mahāśvetā thus: *pavitrāṇyaghamarṣaṇāni japantyām* etc. (*Ibid*. p. 374).

विस्मयस्तिमितनयनः पुनरपि निमज्ज्य जलगर्भे बलभद्राङ्कभाजं कृष्णमालोकयत्। नियतमयं फणधरग्रामणीरेव रोहिणीसूनुः। एतदुत्सङ्गगतश्चासौ श्रीवत्सलक्ष्मा देव एव देवकीतनय इति निश्चित्य भगवन् यमिहृदयपुण्डरीकचञ्चरीकस्य[145] शेषहारनीलमणेः कमलाकाञ्चनरेखानिकषोपलस्य निर्गुणस्यापि गुणनिधेरजन्मनोऽपि जनिमतः स्वपतोऽपि जाग्रतः सागरशुक्तिपुटाहृतनिगममौक्तिकालंकृतमूर्तिसमुद्धृतत्रिजगतो[146] मन्दरतरुकन्दायितमूर्त्यन्तरस्य दंष्ट्रामुखोदस्तवसुधामुस्ताग्रन्थेः करनखरकुठारखण्डितद्विषद्विषतरोर्नभःस्थलोत्क्षिप्तचरणनखचन्द्रचन्द्रिकायितमन्दाकिनीप्रवाहस्य कौञ्च[147]भेदापतितराजहंसकुलाकुलीकृतनीराजकक्षितितलस्य दशवदननिधनसंभृतयशसः प्रमृष्टकैलासोद्धरणपरिभवकलङ्कस्य जननानुगृहीतवसुदेवधर्मदारद्वयस्य भगवतः साक्षात्करणं नाम जनस्यास्य चर्मचक्षुषो जात्यन्धस्य चक्षुरागमनं पङ्गोरुपरि [148]भागीरथीनिपातो वन्ध्यस्य स्त्रीजनस्य पुत्रोत्पत्तिर्दुर्गतस्य चक्रवर्तित्वलाभो निरयवर्तिनस्त्रिदशालयप्राप्तिरिति स्तुवतस्तस्य धन्यजन्मनो दर्शितां

---

145. From here, the expressions in genitive singular like *yamihṛdayapūṇḍarikacañcarīkasya* etc. are to be construed with *bhagavataḥ*, occurring later.

146. From here, the expressions beginning with, *sāgaraśukti-mandarataru-*, *daṃṣṭrāmukha-*, *karanakhara-*, *nabhasthala-*, *krauñcabheda-*, *daśavadana-*, and *jananānugṛhīta*-etc. refer, in brief and respectively to the *avatāras* :

matsyaḥ kūrmo varāhaś ca narasiṃho'tha vāmanaḥ,
rāmo rāmaś ca kṛṣṇaś ca......

147. See *Meghasandeśa*: *prāleyādrer* etc. *haṃsadvāraṃ bhṛgupatiyaśovartma* etc. and Pūrṇasarasvatī's comments thereon.

148. Vedāntadeśika says in his *Saṅkalpasūryodaya* thus:

manuvyāsaprācetasapariṣadarhā kvacid iyaṃ
sudhāsiktā sūktiḥ svayam udayam anvicchati jane,
nirundhyuḥ ke vindhyācalavikaṭasandhyānaṭajaṭā
paribhrāntā paṅgor upari yadi gaṅgā nipatati.

I, 16.

यदुपतिरात्मनो दिव्यामाकृतिमुपसंजहार। उन्मज्ज्य सोऽपि निर्वृत्तस्नानविधिरर्घ्यं दत्त्वा भगवते त्रयीमयाय भास्वते तीरमासाद्य तौ वसुदेवसुतावन्याविव सविस्मयं सप्रणयं सविनयं सहर्षं च निष्पन्दपक्ष्मणा चक्षुषा सुचिरमालिङ्गन्निव चुम्बन्निव पिबन्निवावतस्थे।

कृष्णस्तु तदवस्थं तमालोक्य सस्मिताननेन्दुरजानन्निव भद्र किमधुना विलम्बेन। योजय रथे वाजिनो धुर्यानित्यचोदयत्। तेनापि तथेति युक्तधुर्यं रथमधिरूढः सरितमुत्तीर्य भोजविषयसंपत्तिमग्रजाय दर्शयन् मथुरापुरमुपससार। तस्य चोपशल्यभुवि दानवपते भोजपतेरावेदयास्मदागमनम्। द्रष्टारः श्वः प्रभाते एव मातुलमिति प्रस्थाप्य गान्दिनीतनयं[149] प्रथमप्रस्थितैर्नन्दप्रभृतिभिराभीरैरधिष्ठिते नागलतानद्धपूगतरुषण्डमुषितपूषालोकदोषामन्यवासरे महतिकस्मिंश्चिदुद्याने मुहूर्तं विशश्राम।

अक्रूरस्तु पौरैः सत्वरं प्रतिपालितागतिः प्रविश्य राजकुलं विदितवसुदेवनन्दनागमनमकरोदसुरपतिम्। तावच्च वरुणदिशि विलम्बमाने परिणतनारङ्गपिङ्गलत्विषि पतङ्गमण्डले पुण्डरीकनयनः साकमग्रजेन पौरश्रियं दिदृक्षुभिः सुहृद्भिरनुगम्यमानः पुञ्जीभूतपूर्वराजयशस्सन्दोहसन्देहकारिसौधसंबाधमूर्छितध्वजदुकूलच्छुरितकालागुरुधूपलेखाविडम्ब्यमानविबुधसरिदम्बुसंभिन्नकालिन्दीवीचिभ्रमम् अभ्रंलिहतोरणस्खलनपतिततारकाचक्रभ्रमकरोपहारकुसुमराजिराजमानराजपथं पुरं प्राविशत्।

प्रविश्य च सकललोकलोचनचकोरचन्द्रोदयायमानमात्मानमालोकयितुकामाः[150] परित्यक्तारब्धतत्कालोचितनैपथ्यास्तथैवागत्य हर्म्यस्थलेषु मणिवेदिकासु रथ्यासु च कृतावस्थाना दक्षिणकपोलविलिखितमलयजरसपत्त्रमकरिकामकरध्वजविजय-

---

149. Gāndinītanaya is Akrūra. The expression is found as such in the *Bhāgavata* too. X. 41.6.

150. The expressions like *sakala...kāmāḥ* are in the Accusative (plural), and adjectives to *lalanāḥ* occurring at the end.

वैजयन्तीरिव, काश्चित् स्नानावसानविधुतशिखाञ्चलितजलकणिकास्तरलतरतारा-शबलतिमिरकन्दला इव प्रदोषश्रियः, काश्चित् उत्फुल्लकमलकह्लारदामहस्ता हृदयोन्मूलितसरुधिरमन्मथशरशल्यधारिणीरिव, काश्चित् करतलधृतमधुचषका मकरन्दहरितकमला इव कमलिनीः, काश्चित् संभ्रमत्रुटितहारमुक्तमुक्ताफला मारुताकीर्णजलबिन्दुकदम्बका इव कादम्बिनीः, काश्चित् विलासशारिकाधिष्ठित-प्रकोष्ठनालशैवालमञ्जरीपरिचिततनुतरङ्गा इव शरन्नदीः, काश्चित् करकलितकनक-कन्दुकाः परिणतफलभारभुग्नविटपा इव जम्बीरवीरुधः, काश्चित् अन्या अप्येवंविधा ललनाः सस्मितमालोकयामास। तासां च विस्मयानन्दनिष्पन्दपक्ष्मचक्षुषां पश्यन्तीनामात्मापदानगर्भानशृणोदालापान्।

तथाहि - सख्यः सत्वरमालोक्यतामयमाभीरकुमारमध्यवर्ती तमालच्छाय-कायकान्तिः पुण्डरीकायतेक्षणः पूतनापयोधरपयःपाननूतनचातकः। कथमनेन शिशुना कुशेशयारुणत्विषा चरणेन शकटमुत्क्षिप्तम्। एष च कथमारचित-जानुचङ्क्रमणकेलिरभञ्जयदङ्गणभुवि ककुभयुगलम्। अमुना यमुनाया विषदिग्ध-जलभुवः कथमुदहारि कालियो नाम भुजगपतिः। असौ ननु शिरीषसौ-कुमार्यधरः शिलावर्षवारणार्थकेन बाहुना गोवर्धनमधारयत्। एतेन सह वृन्दावन-भुवि नैचिकीभिरिव वृषभेण प्रकृतिमुग्धाभिरन्वभावि यौवनफलं वल्लववल्लभाभिः। किमधुना ताभिरपकृतं विधेर्यदचिन्तित एव तासामक्रूरात्मना तेन क्रूरेणायमे-तावतीं भूमिमानीतः। किमकारि वा सुकृतमस्माभिर्यदखिलजनाभिलषितदर्शनं पुरुषमवलोकयामः। किं नाम तपस्तप्तमस्यां पुरि पुरन्ध्रीषु सैरन्ध्रीप्रधानभूतया मकरिकाभिधानया[151] कुब्जया या तावदङ्गरागोपहारमृदितस्याब्जनयनस्य परित्यक्तकुब्जभावा करतलस्पर्शसौख्यमनुभूतवती। धन्या सा जगतीसुन्दरीषु या लक्ष्मीरिव सततमस्य हृदयमधिवसति। धन्या च देवकी या सकलाभिनन्द्य-चरितमदितिरिवोपेन्द्रमेवंविधमात्मजं प्रसूतवती। पश्यत - अस्याननमनुद्भूतश्रम-

151. According to the *Bhāgavata* (X.42.3) she was Trivakrā by name.

भ्रूलेखतया व्यपगतलक्ष्माणमिन्दुबिम्बं विडम्बयति। तदस्य गण्डस्थलमुच्चावचमणिकुण्डलकिरणखण्डखचितं समयूरमयूरपिञ्छमिव किञ्चित् पर्यस्तमुद्वहति। अयमस्य दृश्यमानसौगन्धिकदामगर्भितः (करः) सन्ध्यारागवलयाञ्चिताभिनवजलधरशङ्काकरो विभाव्यते। इदमस्य चन्दनानुलिप्तमनतिसान्द्रचन्द्रिकापातशबलमञ्जनाचलतटमनुकरोति वक्षःस्थलम्। अयमस्य मध्यभागः शैशवे जनन्या नवनीतचौर्यकुपितयोलूखलनिबद्धस्य दाम्नो बन्धनातिशयादिव वहति कृशताम्। अस्येयमाकृतिर्निवसितपीतांशुकाभिरामा बालातपान्तरितमन्तरिक्षमपहसति। पार्श्वे चास्य सुरगज इव मदखेलगतिः परिहितनीलाम्बरः कुङ्कुमपङ्कस्थासकपिशङ्गभुजशिखरः प्रतिनवपयोदचुम्बितनितम्बदेशः सधातुराग इव कैलासः प्रलम्बहन्ता विलोक्यते इति।

ततश्च ताभिर्हृदयप्रसृमरमदनानलतापविस्फुटितहारमुक्तमुक्ताफलानुकारिभिः जालवर्षिभिर्निश्वासमारुतम्लानकेसरैश्च दलपुटविलुठितमधुकरमधुरालापनिभात् आवेदयद्भिरिव रणरणकमनुक्षणमुपरि निपतद्भिश्च कुसुमाञ्जलिभिरवकीर्यमाणो दर्शनागतेन पुरतः प्रचलता पौरजनेनोपदिश्यमानवर्त्मा धनुश्शालामविशत्। तत्र चैकत्र कवचितैः कृपाणिभिः फलकपाणिभिरारक्षकैः संरक्ष्यमाणं नीलनिचोलकशय्याशालिनि मणिपीठे नवनीरद इव चक्रायुधमवस्थितमुपरि विस्तृतजयातपत्रम् उद्धूयमानधवलचामरद्वितयम् अपरिमितरत्नराजिराजितशिरसमहिपतिमिव बन्दिग्राहं गृहीतम् आलब्धहरिचन्दनस्थासकम् आसन्नशस्त्रदेवताचरणालक्तकरससिक्तमिवोपलक्ष्यमाणम् अतिसुरभिकुसुममालिकावलीनिलीनशिलीमुखप्रकरमलंकृतमिव नीलचामरिकाभिराकारमिवाहंकारस्य भ्रूविक्षेपमिव क्रूरताया उपन्नमिव वीरलक्ष्मलताया दंष्ट्राप्रकाण्डमिव क्रोधसिंहस्यालानमिव दर्पद्विपस्यालम्बदण्डमिव वृद्धयशसो निरस्तानेकमार्गणमपि स्तोत्रैकविषयं शतकोटिसारमपि दृश्यमानकोटिद्वितयं निर्जिताशेषलोकपालमपि सुपर्वश्लाघनीयं महान्तमपि मुष्ट्या ग्राह्यमखिलगुणोत्पत्तिहेतुमपि गुणद्वयोपेतमननुभूतभङ्गमपि समरमुखविरचितावनतिमवनिभुजश्चापमवालोकयत्।

उपसृत्य निवार्यमाणोऽपि रक्षाभटैरारोपितज्यं विधाय प्रभञ्जन इव नलस्तम्बं स्तम्बेरम इवेक्षुदण्डमञ्जसा बभञ्ज कोदण्डम्। अनन्तरमभ्रनिर्घातवात इति मथुरायां पौरलोकेन नवजलदनिनद इति जगति जनताभिरमरसरितः कलकल इति नभसि किंपुरुषकम्बुकण्ठीभिरकुण्ठवैकुण्ठकण्ठीरवकण्ठनिर्ह्राद इति दिवि दिविषत्परिषदा दशरथसुतभज्यमानभार्गवधनुर्ध्वान इति दिव्यर्षिसदसि कुशिकभुवा युगविगमविजृम्भमाणशमनकहकहाराव इति दिक्षु दिक्करिभिर्निजनयनदहनदह्यमानपुरगोपुरशिखरपतनशब्द इति रजतगिरिशिरसि देवेन संवर्तसमयसमुदितजलनिधिकल्लोलकोलाहल इति कलशोदन्वति हरिणा हरिभुजदण्डकुण्डलितशार्ङ्गकोदण्डटङ्कार इति च बलिसद्मनि दनुजकुलैराशङ्क्यमानस्त्रयमपि जगतामवाप चापभङ्गध्वनिः। तावच्च तदाकर्णनचकितनिजरथतुरगाकृष्यमाण इव गगनतलादवततार तरसा तपनः। मधुमथनकरकलितशरासनशकलविक्षिप्तरक्षाभटदेहनिर्भरोच्चलितरुधिरधाराशतेनेव सायन्तनेन शोणिम्ना नभसि भृशमरज्यन्त जलदसंततयः। परिजनमुखविदितधनुर्भङ्गस्य दनुजपतेरिव मुखं प्रधानहरितो जगाम वैवर्ण्यम्। धनुर्ध्वनिश्रवणभिया नयनानीव न्यमीलयन्नम्बुजानि कमलिन्यः। यादवहृदयानीव प्रमोदमभजन्त कुमुदानि।

कृष्णस्तु निर्गत्य तस्या धनुश्शालायाः काल इति कम्पमानमनसा कंसेन शूर इति सुभटवर्गेण भागधेयमिति बन्धुभिर्मन्मथ इति मथुराङ्गनाजनेन मन्यमानस्तदेवोद्यानमाससाद। तावच्च तरुणतमालतरुषण्डेन प्रदोषवेलाया मदकलमातङ्गयूथेन महामहीभृत्कटकानाम् अलिपटलेन कुवलयस्य नीलांशुकेन श्यामायाः परिचितनभसो घनेन धरणितलकृतावतारेण कृष्णेनापि विहिततारकेण तिमिरेण विहितमन्धं जगदखिलमभवत्। अन्तःप्रसुप्तलक्ष्मीयामिनीविभ्रमं बिभ्रदविरतकोलाहलमतिगाढघटितदलकवाटपुटमम्बुरुहभवनमभितो बभ्राम मधुव्रतव्रातः। सर्वतः प्रदीप्तदीपिकाभिर्ज्वलितौषधिशिखरिचक्रवालमनुचक्रे मथुरा सौधवीथिभिः। क्रमेण च काचभङ्गमेचके शकलितकालियकालिम्नि कालिकपोलकान्तिभृति कवलित-

शर्वगलरुचिगर्वे सर्वमपि गलति शार्वरे तिमिरे शनैश्शशधरमयूखविशदितशतमख-दिङ्मुखसविधं तटपरिसरविकचकुमुदवनं ह्रदमनुचकार यामुनं गगनम् ।

अथ मथनसमयसमुदयदमृतकलशतुलितवपुरनुकलविलसितपयसः पयोनिधेः रजनिकरः समुपससार । क्रमेण चोद्गतः प्रणयकलहकुपितकुमुदिनीप्रसादन-विरचितावतार इव कुमुदसरसीषु चन्द्रकान्तपुत्रिकापरिष्वङ्गाय कृतपद इव हर्म्यतलेषु बलिभवनतिमिरदलनाय प्रविशन्निव विमलेष्वपि वापिकाजलेषु प्रतिबिम्बनिभाद-भासत विभावरीनाथः । रजनिकररजतमञ्जूषिकासमुद्धृताभिर्मुक्तामणिविमल-रुचिभिः किरणहारलतिकाभिरलंकृतोपकण्ठा हरिहयहरिदभवत् ।

विस्तारिणि वियत्तमालतरौ निक्षिप्तमण्डमिव निशीथिनीशिखण्डिन्या विरेजे सरोजरिपुमण्डलम् । सर्वतः प्रसर्पता मुकुलितकमलत्विषा तुषारधवलेन विकचनवकुमुदसुहृदा कौमुदीपूरेण जगद्विजेतुः कुसुमायुधस्य यशसेव प्राकाशन्त दिशः । क्रमेण च तुहिनजलबिन्दुशिशिरे चन्दनपङ्कभाजन इव रजन्याः कर्पूरखण्डधवलत्विषि करिदशनकरण्ड इव गगनलक्ष्म्या विमलांशुकनिवहवाहिनी-रजतपेटक इव दिशामुन्मिषति निशापतौ चन्द्रिकापानतुन्दिलेषु संविशत्सु सौधविटङ्कशायिषु चकोरबृन्देषु निष्यन्दमानजलनिर्झरजालधारिषु धारागृहानुकारिषु शशिमणिगृहाचलेषु चन्द्रातपचकितचक्रवाकपरिषदध्यासितकमलिनीदलच्छायासु निरन्तरप्रवृत्तकुमुदमदिरापूरकूलङ्कषपयस्सु गृहदीर्घिकासु प्रतिभवनमङ्गनाजनानना-रविन्दस्पृशि विलुलितालकलताजाले सुरतश्रमसलिलशीकरिणि पञ्चशरविजय-कुञ्जर इव संचरति वेशवाटिकासु मरुति प्रथमप्रहरावसानशंसिनि कनककोण-कोटिताडनोपजातपीड इव रटति पटुपटहे हिमकरनिकरावस्कन्दपलायमानतिमिर-खण्डशङ्काकारिणीषु घटमानासु द्वितीययामकुञ्जरघटासु वल्लभतुरङ्गशालामभितः.... धृतशितशस्त्रेषु मन्दुरापालेषु शिथिलितालानबन्धनेषु हुंकारमुखरमुखैराधोरणैरनल्प-पांसुतल्पमधिशायितेषु विरलकर्णतालताण्डवेषु निद्रायमाणेषु गन्धकरिषु गन्धतैलावसेकज्वलितहस्तदीपधारिणा वृद्धकञ्चुकिजनेन शोधितेषु शुद्धान्त-

कक्ष्यान्तरेषु नरपतिरपि विजृम्भमाणोपहारकुसुमसुरभिपरिमलोद्गारं शयनागारमगात् ।

तत्र च निपत्य शयनतले जलकण इव पुटकिनीदलपुटे विलुठन् भुजग इव मन्त्ररुद्धवीर्यो देवस्य देवकीसूनोरक्रूरनिवेदनानन्तरं सहर्षमागमनं निजादेशमन्तरेण मथुरापुरप्रवेशनिर्भयतां धनुश्शालागमने निश्शङ्कतां धनुर्भङ्गे सहायनिरपेक्षतामारक्षकाभिभवे निरायुधतां च तन्निधने विभावयन् चिन्तानिरन्तरस्वान्तो जाग्रदेव यामिनीमनयत् ।

प्रभातप्रायायां च क्षणमिव निद्रामभजत । संविशंश्च तदा स्वप्ने ददर्श सलीलमुत्प्लुत्य हरिणा तेनापरगिरिशिखरान्निपात्यमानं[152] मत्तमातङ्गयूथपतिं त्यक्त[जीवितम् । तदनु सरभसं विचिन्तयन्न] सुखोदर्कमात्मस्वप्नमुत्थाय ससंभ्रमायातयामिकयोषिदुपनीतामनाक्रम्य मणिपादुकामनाकर्णयंश्च मङ्गलगायनीगीतानि वासमन्दिरान्निरगात् । क्रमेण चोदयदलितगगनान्धकारे गगनरागभाजि विमृदितकुमुदमदे चरमगिरिशिखरपातितहिमरोचिषि सकलजनानन्दकारिणि प्रमुदितचक्रवाकमिथुने पुनरपि लक्ष्म्या योजयति सरोरुहं भगवति हरिहये निर्वर्तितदिवसविधिर्नृपतिः प्रसाधनानन्तरमन्तिकोपसृतमक्रूरमाहूय सोत्साहमवोचत् । भद्र सत्वरमानय मल्लयुद्धदर्शनाय नन्दगोपनन्दनाविति । सोपि तथेति नगरान्निर्गत्य गोपवर्गाध्युषिते तस्मिन्नुपवने समापितसान्ध्यनियममुपसृत्य प्रसाधितं देवकीतनयमारचिताञ्जलिरवदत् । भद्र चतुस्समुद्रमुद्रितवसुन्धराधुरन्धरभुजस्तम्भितारातिडम्भो दम्भोलिपाणिहृदयकम्पहेतुरनुभूताशेषभुवनसंपदवनिपतिर्भवन्तमाह्वयति बाहुयुद्धमुपदर्शयितुमिति । स तु सकुतुक इव यदादिशति राजा भोजपतिरित्युपायनपाणिना गोपवर्गेणानुगम्यमानो बलभद्रानुयायी पुरं प्रविश्य यामवारणसहस्र-

152. MSS read here *vipātyamānamattamātaṅgayūthapatityakta*... ....*na sukhodarkam.* What is given within brackets is only my guess. This is the *sūcanā* of the *Kuvalayāpīḍavadha*, which is going to take place soon.

संबाधतोरणमासाद्य राजकुलं रङ्गद्वारभुवि स्थापितं शार्वरान्धकारमिव दिनकर-किरणावस्कन्दशङ्कया शरणागतं कालमेघमिव मेघवाहनारूढपरिभवनिवेदनायातम् अञ्जनाचलमिव कुञ्जरत्वमुपगतमात्मसादृश्यभजनकोपादिव प्रतिनृपनगरार्गलासङ्ग-कारिणा दुर्दमरिपुसुभटकण्ठपाशेन शुण्डादण्डेन शोभमानम् अखिलदिक्पालपुर-कवाटोद्घाटकुञ्चिकायमानां द्विषदुरःफलकोल्लिखितकोटिकां दशनद्वयीमुद्वहन्तम् [153]अहरहरतितृष्णया निपीतमन्तरतिप्रभूततया तिर्यगिव निस्रवत् स्वेनैव कर-रन्ध्रानुसारेण यमुनावारि मदजलच्छलेन धारयन्तम् असकृदाकम्पितावयव-मामीलिताक्षमास[154]न्नदीर्घनिद्रतया प्रचलायितमिवोपलक्ष्यमाणम् अनुक्षणमुपरि-विक्षिप्तबहुपरागधूसरतया दिक्कुञ्जरमत्सरेण विश्वविश्वंभराभारधारणाभ्यासमिव कुर्वाणम् अभ्रमुवशीकरणचूर्णप्रयोगमिव विदधानं सर्वतः प्रकीर्यमाणेन करशीकर-वारिणा निजगर्जितजनितमूर्छानां दिशामिव मुखानि सिञ्चन्तम् और्वानलशोष्य-माणपयसः सागरानिव पूरयन्तं स्वेनैवात्मानमखिलगजाधिपत्य इवाभिषिञ्चन्तं मदजलपङ्किलकपोलपट्टसंगिभिर्मन्दमन्दं गुञ्जद्भिरलिकदम्बकैरन्यनागमदोत्पत्तिमिव [कथयद्भि]रधिष्ठितकर्णमूलम् अनवरतप्रकम्पितोत्तमाङ्गमदूरविनिपातं स्वामिन-मिवानुशोचन्तं निजगण्डभृङ्गसंगीतमिव श्लाघयन्तम् अधरितजलदध्वानैरकाण्ड-कण्ठगर्जितैरपहसन्तमिव गिरिविवरारण्यचारिणः करियूथपतीन् उपरि स्थितमैरा-वतमिवाक्रष्टुममरापगापय इवादातुममर्त्यतरुपल्लवानिवापचेतुं मुहुर्मुहरुदस्तहस्तम् आयतकरवेष्टनव्याजाद् वामदन्तमेकदन्तत्वार्थमुत्खनन्तमिवानन्तरणसाह्यकरणादा-लिङ्गन्तमिवाहितहास्तिकास्थिकूटपाटनायासितं संवाहयन्तमिव प्रलम्बमानसुरगज-प्रतिमं विजयकटकमासन्नवर्तिने जनाय दापयितुमिव प्रतिकुञ्जरशिरस्सु निक्षेप्तुमिव चरणमेकमुत्क्षिपन्तम् अभ्रंलिहशिरोभागेन दृढतरकपोलभित्तिना पृथुलदन्तस्तम्भ-घटितेन विजयश्रीविहारसद्मना वदनेन विराजमानं नाटकमिव प्रकटचूलिकाबिन्दु-

153. *ahar ahaḥ* is in Accusative by *Kālādhvanoratyantasaṃyoge*.

154. *āsannadīrghanidratayā* conveys the forthcoming death of Kuvalayāpīḍa.

चारुमुखं विन्ध्यमिव महावंशोन्नतं शरदारम्भमिव तिरस्कृताशेषककुभं कुनृपतिमिव बहुशस्तोत्रवर्धितक्रोडं स्वामिहितमपि सततानुभूतनिगलबन्धम् अप्रतिममपि प्रकट-प्रतिमानम् अमीलितनिर्याणप्रसरमपि यमपुरप्रयाणोद्यतं भद्रजातमपि शुण्डाप्रियं दानवन्तमप्यपदानविजृम्भितं भास्वन्तमोजसा शिशिरकरं वमथुपरिचयेन भूनन्दनं विमतबलभारहरणेन सौम्यं वपुषा गुरुं पूर्वभागेन भार्गवमसुराभिनन्द्यतया मन्दं मदतन्द्रीविलासेन राहुं तेजस्विमण्डलविपक्षतया केतुं प्रजाविनाशेन तथाप्यनव-ग्रहतया प्रतीतमाधारमिव धैर्यस्य दर्पणमिव दर्पस्य सङ्केतस्थानमिव चतुरङ्गताया उत्कर्षभूमिमिवामर्षस्य सद्मनमिव मदस्य शरीरमिव शौर्यस्यालंकारमिवालंकारस्य जीवितमिव जयस्याक्रीडमिव क्रूरतायाः कुवलयापीडमद्राक्षीत् ।

उपसृत्य युगविगमारम्भजृम्भमाणसंवर्तकाम्भोदनादगम्भीरया गिरा भर्त्सय-न्निव मत्तवारणस्कन्धभाजमाधोरणमाबभाषे । रे रे हस्तिपक रङ्गद्वारमार्गतः सत्वर-मपसार्यतामसौ हस्ती । नो चेदेनमचिरेण जीवितेन वियोजयामीति । सोऽपि कोपावेगात् गद्गदिकागृहीतकण्ठः सोल्लुण्ठम् अहो बहोः कालान्निर्वाप्यते जलकणेन कालानलो निर्भिद्यते नवशिरीषकुसुमपातेन पर्वतो यदेनमपि दिग्गज-पतिमहिमानं शिशुजनोचितं विकत्थसे किमपि कथमधुनापि । मथिष्यति बालं भवन्तमबलं निखिलद्विरदपीडाकरः करी कुवलयापीडः । तथापि धारयिष्यामि । किमसावनायासादेव विदलितकुलगिरिशिखरोऽपि न दलयति कदलीकाण्डमिति निशिताङ्कुशघातशिरसं चरणाङ्गुष्ठपीड्यमानचूलिकायुगलं[155] मदावलमनुकलं हुंकारमुखरमुखः तदभिमुखं चोदयामास ।

स च समाबद्धपरिकरः क्ष्वेडया[156] विधाय मुखराणि हरिन्मुखानि सलीलमास्फोटितबाहुमण्डलो मुष्टिमुद्यम्य निष्ठुरामस्य पुरस्तादवतस्थे । ततश्च तं द्रुततरमभिद्रवन्तमभिहत्य मुष्टिना मुखे भृशं कुपितं तन्वन् कदाचिच्चलदङ्गुलि-

---

155. In the context of elephant and its limbs, the *Vaijayantikośa* notes thus: *karṇamūle pitalikā cūlikā pippalīti ca.*

156. Amara notes: *kṣveḍā tu siṃhanādaḥ syāt.*

पाणिपल्लवग्रहणलोभप्रसारितकरमतिदूरमपहरन् कदाचिदङ्घ्रिणाक्रान्तवामचरणं हस्तोदस्तेतरपादमात्मानमुन्मोच्य[157] पुरतः स्थितं सिंहनादेन भाययन् कदाचित् कुण्डलितशुण्डादण्डदूरोत्क्षिप्तवपुरुत्पतनेन परिहृतास्फालनाभिलाषमापादयन् कदाचिच्चकित इव निपतितः क्षितौ वञ्चितरदनप्रहृतिश्चरणयोरन्तरेण निर्गत्य करतालरवेण गवेषणपरमभिमुखीकुर्वन् कदाचिदुत्प्लुत्य सलाघवं स्कन्धदेशमधिरूढः प्रौढमुष्टिप्रहारविगतासुमाधोरणमधो निपात्य संचारयन् कदाचित् भुजपाशबद्धवपुषं मन्दरगिरिमिव भ्रमयन् कदाचित् करतलनखरविदारितकुम्भस्थलविलुठदमलमणिनिकरं विरलसलिलकणमभिनवघनमिव पवनः प्रकम्पयन् कदाचित् कमलाकरमिव विपिनकरी पुष्कराकर्षेण पीडयन्कुवलयापीडमतिचिरं चिक्रीड ।

तदनु तेन यदुपतिना वामकरदृढगृहीतशुण्डादण्डेन निबिडनिबद्धमुष्टिना दक्षिणेन जीवितान्तकारिणा करेण निर्दयं निहतः संत्रासिताशेषदिक्करिणा धिक्कृतजलदध्वनिना यमनगरप्रयाणपटहकलकलेनेव निजस्वामिनःसकृदुच्चैरारचितेन कटुना फीट्कारेण सह जीवितमुत्सृजन् कुलगिरिरिव कुलिशदलितवपुः प्रकम्पयन्नखिलमपि धरणीवलयं निपपात कुवलयापीडः ।

पतितस्य तस्य मधुहन्ता रिपुहृदयसंतापकारिणौ दन्तावुदमूलयत् । तस्य चोपरि निपत्य सुचिरमनुभूतदानवसंपदः कूजितापदेशेन शुचेव प्रारुदन् द्विरेफपङ्क्तयः । कर्णतालौ सततमविमुक्तपार्श्वौ शोकादिव त्यक्तताण्डवौ बभूवतुः । उन्नतिमासादिता च कुम्भस्थली मुक्तामणिमिषेण बाष्पबिन्दुसंततिं व्यसृजत् । ततश्च तौ वसुदेवसुतौ दृढनिबद्धकक्ष्याविभक्तमध्यौ मतङ्गजस्य करटकरण्डगलितेन दलितैलाफलपरिमलमुचा मदद्रवेण विरचिततिलकौ रक्तचन्दनकृतस्थासकौ मुक्ताफलार्चितविपुलभुजशिखरौ गृहीतदन्तकोशौ मल्लवेषधारिणौ बभूवतुः । विस्मयस्तिमितचक्षुषा नन्दप्रमुखेन गोपवर्गेणानुगम्यमानो मधुरिपुर्वेत्रिवेत्रप्रहारोत्सारितजनसंमर्देन द्वारदेशेन शोभिताम् आरादुदञ्चितपदैर्नियुद्धदर्शनावतीर्ण-

---

157. *unmocya* is construed with *bhāyayan.*

सुरविमानशङ्काकरैः कैश्चिदवनीपतिमण्डलाधिष्ठितैरनुकृतसपारिजातसुरगिरिकटकैः कैश्चिद् वरवर्णिनीभि[रध्युषितैश्च कुसुमितलतागहननिकुञ्जानां] विडम्बकैर्महद्भिर्मञ्चैरलंकृतां कालायसार्गलरचितप्राकाराम् असितागुरुधूपसुरभिगन्धबन्धुरककुबन्तरां तुषारकरशीकरार्द्रतरुकुसुमविसरशबलां शरत्तारागणशारां दिवमिव विभाव्यमानाम् एकत्र शिलाकठिनकायबन्धैर्गिरिभिरिव पुञ्जीकृतैः सदासारधारिभिः संवर्तक-[वारिवाहैरिव] बहलतरमदोत्सिक्तैरालानैरिव सत्त्वद्विपस्य प्रतनुशिखाशोभिभिरवतारैरिव रोषाग्नेः पृथुलोरुस्तम्भरमणीयैर्दृढतरकक्ष्याबन्धैर्गन्धगजैरिव मल्लतामुपगतैः प्रतिमल्लदृढोरुपीडनादिव कृशमध्यैरसकृदभितश्चरणतलताडनादिव विशङ्कट-[गात्रतटैः] ....भयादिव पुञ्जीभूतमांसभुजशिखरैः समरभग्नरिपुगजरदनरचितगदाचारुपाणिभिश्चाणूरमुष्टिकप्रभृतिभिर्मल्लैरधिष्ठितां [[158]मल्लशालामग्रजेन साकमविशत्। तत्र च मध्य-]मभागभाजि विततसितवितानवति महति मञ्चे विन्यस्तमालक्ष्यसिंहपादमासनमस्ताचलमिव गभस्तिमन्तमधिवसन्तम्आसन्नवर्तिनीभिर्नलिननयनाभिरप्सरोभिरिव स्वयं वरीतुमागताभिर्वारनारीभिः परीतपर्यन्तं बन्धूकबभ्रुपरिधानमभिनवशशरुधिरलोहिताङ्गराग - [मिव वसानं] [विरचित-] मध्यमण्डनमिव विधिना संकोचितसंव्याननीलांशुकविहितपर्यङ्कबन्धं स्वसमयोपस्थितेन मृत्युना संदानितमिव पाशेन सर्वतः प्र-[सृतैः] कालकटाक्षैरिव शारीकृतशरीरम् आयतनिश्वाससौरभाकृष्टैरुपहारकुसुममधुकरकुलैर्दुरितैरिव परलोकसह-[वासार्थमागतैः सूच्यमान-] निर्गमनमाकुलीकृताननं प्रसर्पता पद्मरागकुण्डलालोकेन कुवलयापीडनिधनाकर्णनजन्मना रोषरागेणेव रज्यमानगण्डस्थलम् अभ्यर्ण........उन्नततरक्षुपतनेन रुरुणा सन्निहितवज्रपातेन तरुणा च तुलामुपेयिवांसं कंसमद्राक्षीत्। दृष्ट्वा च तं तृणमिव गणयन् कृतप्रणामेनेव गोपवर्गेण सह नवकुवलयकान्तिरहमहमिकया निरन्तरमुपरिनिपतदखिलनयनमधुकरनिकरः क्वचित् प्रदेशे तस्थौ ।

---

158. The portion here containing the substantive is missing in the MSS. Obviously the description is related to *mallaśālā*. Hence the expressions within brackets.

कंसस्तु तं प[ञ्चाननं] वनगज इवावलोक्य गतजीवित इव विवर्णवदनोऽभवत्। अथ क्षणमिव स्थित्वा तेन भूपतिना भ्रूसंज्ञयादिष्टश्चाणूरस्तौ वसुदेवसुतौ सधैर्यमाबभाषे। [भ]वन्तौ वृन्दावनभुवि सुहृद्भिः सह नियुद्धव्यापारनिरतौ निशम्य राज्ञा दिदृक्षुणाहूतौ। तदिदानीमस्यां रङ्गभुवि देवस्य नः सर्वेषां [च जनयितुम्] आमोदं मिथो वयं बाहुयुद्धमाचराम इति। कृष्णस्तु गूढस्मितः सभय इव तमभ्यधत्त। भद्र कुतः स्वभुजतुलितमन्दरगिरिगरिमाणो दिक्करि-[णो] विख्यातमल्लप्रवरा भवन्तः। कुतो वयमविदितनियुद्धपाण्डित्या नित्यमरण्यचारिणः परिमितबला बाला गोपालकाः। किं वा युष्माकं समानौ [स्यातामावामिति। चाणूर-]स्तु पुनरभाणीत्। अलममुना कार्यनटनेन। प्रागेव नारदमुखादस्माभिरवगतम् [अरिष्टवधेन दर्शितं] भवद्भुजबलम्। तदवश्यमारभ्यतां बाहुयुद्धम्। अस्मासु कौचिद् व्रियेताम् [इति। तदनु] चाणूरमावृणोदादरेण दामोदरः। मुष्टिकं तु हन्ता प्रलम्बस्य। चाणूरस्तु राजाभिमुखो भूत्वा कृतप्रणामो गदागर्भिताञ्जलिः [कृष्णमवदत्।] अचिरादेव कालपाशेनेव बाहुपाशेन दृढपीडितकन्धरारन्ध्रदुःखनिष्क्रान्तजीवितं [त्वां] करिष्यामीति। जनार्दनोऽपि प्रत्यजानीत। सर्वेऽप्याकर्णयन्तु [मम] प्रतिज्ञाम्। अमुष्य राज्ञः प्रमोदाय सुचिरं नियुद्धरङ्गभूमावेनमास्फालनेन विशीर्णसर्वावयवं विधास्यामीति। मुष्टिकस्तु जलधर [ध्वानतुलितेन गर्जितेन कम्पय-]न्निव भुवनतलमाबभाषे। राजन् आकर्ण्यतां ममैषा भाषा। केवलमेतेन कुलिशनिष्ठुरेण मुष्टिना निपातयिष्यामि विद्विषमिति। रो[हिणीसुतस्तु तमवि-] कृतचक्षुरभाषत। राजन् भोजपते विलोकितानि भवता विविधानि बाहुयुद्धानि। इदानीममुना सह युध्यमानो मनसि तव चमत्कारमुत्पादयामि। किं च तथा तलेन ताडयामि तावदस्य शिरो यथा रभसविनिर्गतलोचनं निजोदरे निलीयत इति।

अथ तौ चाणूरमुष्टिकौ मल्लवर्गेण सह सहर्षमुल्ललन्तौ कक्ष्याबन्धाय निर्जग्मतुः। क्षणेन च तावपनीतमाल्याङ्काभरणौ चण्डातकोपरिनिबद्धकक्ष्याविभक्त-

मध्यभागौ निश्शेषविमर्दितागुरुविशेषकस्थासकावुद्वर्तनोपजनितावयवलाघवौ हस्तोदस्तगदादण्डैरसह्यसिंहनादरुद्धरोदोभिर्मदान्धभणनमुखरमुखैर्जय जीवेति वदद्भिरनुचरैरनुगम्यमानावुभयतश्च कुलवृद्धैरुपदिश्यमानविविधनियुद्धरहस्यौ रङ्गं प्रविविशतुः। ततश्चैकत्र विधिवदभ्यर्चितां देवतामभिमतामखिलेनापि मल्लेलोकेन समास्फोटितबाहुमण्डलः प्रणम्य कृतनरपतिप्रणामः पर्यन्तावस्थितौ वसुदेवसुतौ साक्षेपमीक्षमाणो मुष्टिकेन सह रङ्गभुवि विरचितरेचकचक्रं चचार चाणूरः।

ततश्च तौ बलकृष्णौ विहितक्ष्वेडितावनुसरतः सुहृदो निवार्य विकटं परिक्रामन्तौ तयोरभिमुखीबभूवतुः। अथ ते द्वन्द्वीभूय परस्परं प्रचण्डभुजमण्डलास्फोटनावस्फुटितसकलजनश्रुतयश्चतुरं नियुद्धमारेभिरे। प्रथमं मुष्टीकृतपाणयः परिभ्रमन्तस्तदनु किंचिदाकुञ्चितपूर्वकाया निष्पन्दपक्ष्मनयना निर्विकारमुत्कीर्णा इव तिष्ठन्तः पश्चादुपसृत्यालीढविरचितस्थितयः चलदङ्गुलिपल्लवैकहस्तनिघ्नक्षिपास्ततो निर्घातपादनिष्ठुरैः पश्यतामपि प्रकम्पमापादयद्भिरुपर्युपरि मुष्टिभिः प्रहरन्तस्तदनु सुहृद इव गाढोपगूढा दृढसंदानितचरणाः क्षितौ पातयन्तः पातिताश्च निजरोषहुताशनभूताः पिण्डीभूता इव दुर्विभावाङ्गसन्धयः कम्पिताखिलधरातलं विलुठन्तः कठिनोरःपीठघर्षणोद्भूत[- अनल -]निर्वापणनिपुणेन स्वेदाम्भसा कस्तूरिकापरागं कर्दमतां नयन्तः प्रसृमरनिश्वासपवनशोषितं पुनस्तमेव वर्तनैश्चूर्णयन्तः सोल्लुण्ठनभणितिभङ्गिभिरधिक्षिपन्तः समन्तादवस्थितैरनुपजातजयपराजयतया मल्लैर्विश्लेषितबाहुबन्धाः सत्वरमुत्थाय संगच्छमाना यथापुरं कदाचिदुरभ्रा इव शिरसा शिरस्ताडयन्तः कदाचिच्चरणायुधा इव चरणैः[159]—क

---

159. Some portion after *iva caraṇaih* and before *kalalita* etc. seems to be missing here in the MSS, though no gap is indicated, and the writing is continuous without a break.

(क) इतः परं परिशिष्टमल्लयुद्धवर्णनपरो भागः कंसवर्णनपरश्च कश्चिदंशो मातृकायां लुप्त इति प्रतीयते। एतद्भागद्वयसंबन्धी कथांशः परमित्थं भागवतरीत्या पूरयितुं शक्यते—(सम्पादकस्य)

[160][ताडयन्तः कालं कंचिद् बाहुयुद्धमवर्तयन्त। क्रमेण च वासुदेवश्चाणूरं भज्यमानाङ्गजनितग्लानिं बाह्वोर्निगृह्य भ्रामयन् भूपृष्ठे निपात्य विगतजीवितमकरोत्। मुष्टिकश्च बलभद्रेण भृशं मुष्टिभिरभिहतो रुधिरमुद्वमन् विगतासुरुर्वीतले निपपात। इत्थमेव कूटशलतोशलकेष्वपि मल्लेषु हतेषु अन्ये मल्लाः प्राद्रवन् प्राणपरिरक्षणाय। तदनु दुस्सहरोषपरीतमूर्तिः कंसः सकलगोपनिर्वासनं वसुदेवोग्रसेनयोर्हननं च समादिशन् खड्गपाणिरासनादुदतिष्ठत्। उत्तिष्ठन्तं च तं कृष्णो बलादाक्रम्य रङ्गतले निपात्य]

कलितपीवरतरकन्धराकाण्डनिष्फलामर्षदष्टाधरमतिसिरालफालपट्टमुद्वृत्ततारकेण चक्षुषा पश्यन्तमेव परासुमकरोदसुरपतिम्। तदनु मुदितयदुगणोन्मत्तसिंहनादमेदुरेषु विजृम्भमाणेषु वियदध्वनि दुन्दुभिध्वनिषु मधुरगरुदनिलधुतरजांसि दिव्यतरुकुसुमानि विसृजत्सु रङ्गभुवि वैमानिकेषु [161]विमुक्तनिगलबन्धनाभ्यां देवकीवसुदेवाभ्यां वात्सल्यानन्दपिशुनेन स्तननयनयुगलनिस्सृतेन पयसाभिषिच्यमानमूर्तिरालिङ्गितः सकलजगदार्तिहारी स्वयमागृहीतमणिकावर्जिताभिरद्भिरारूढभद्रपीठमुग्रसेनमभ्यषिञ्चत्।

एकदा तु जा(मा)तुराकर्ण्य कंसस्य निधनममर्षसंपदन्धेन जरासन्धेन विक्षोभिताखिलक्षितिभिरक्षोहिणीभिरतिवाहिताध्वभिः प्रत्युषस्यरोधि मथुरापुरी।

उग्रसेनस्तु विष्वक्सेननिर्देशेन सेनापतीन् समरसंनहनाय समादिशत्। अथ समरचण्डिचण्डिकाशूलखण्डितकासरासुरकण्ठनिष्क्रान्तपरुषाट्टहासपुरुषं असह्यनर(सिं)हखरनखरटङ्कदलितसुरकण्टकविशङ्कटोरःपीठरटितभयंकरम् अतिनिशितपुरहरकरपरशुदारणसमयमुक्तवारणदनुजबृंहितध्वानदारुणं रणनिर्याणरणन्निस्साणम्[162] क्षणेन च कल्प्यमानरथा इभघटारोप्यमाणशस्त्रसंभारं सज्जीक्रिय-

---

160. The portion within square is supplied by the Editor.

161. See page 56, lines 10 and 11.

162. Nissāṇa is given in the *Śabdaratnākara*, to mean a kind of drum, perhaps beat before and during battles. *(Contd.)*

माणतुरगमाकर्ण्यमानवीरभाषितं आबद्ध्यमानरणदीक्षाकङ्कणं विरच्यमानवेणिबन्धमामुच्यमानकवचं ध्रियमाणशिरस्त्राणमाह्वियमाणतूणमवनम्यमानचापं निरीक्ष्यमाणबाणमाकृष्यमाणकृपाणमास्फाल्यमानफलकं परीक्ष्यमाणप(रश्वध)मु(द्य)मानलगुडं कम्प्यमानकुन्तमुद्ध्रियमाणच्छत्रमुन्नम्यमानध्वजं वाद्यमानतूर्यम् आपूर्यमाणशङ्खं समनह्यत सिंहनादमुखरमखिलमपि बलम् ।

तावच्च तोरणोपकण्ठभुवि मिलितानामवनिभुजामधरितनिजमण्डलच्छायमातपत्रमवलोकयितुमपारयतीव सरभसमपरपारावारतीरमवतरति चन्द्रमसि निरन्तरोदस्तरथकेतुपटानिलोत्सारित इव चरमगिरिशिरसि पतति तारागणे चमूपालसविधविधुतचमरवालच्छविभर्त्सित इव क्वापि याति तुहिनगिरिमहसि तुरगखुररजःस्पर्शपरिजिहीर्षयेव दृढघटमानदलपुटेषु कुमुदेषु संनद्धगन्धगन्धगजतुण्डगलितमदजलपरिमलक्षोभादिव मुञ्चत्सु कुवलयोदराणि मधुकरकुलेषु आगामिविजयलक्ष्मीकुतूहलादिव दूरोन्नामितकमलवदनासु कमलिनीषु प्रहतपटुपटहकलकलपतिताभिरिव निजवधूभिरालिङ्ग्यमानेषु चक्रवाकेषु वरवारणावतरदमरपुरवासरततरुणीचरणमञ्जीरकिरणमञ्जरीपुञ्जरञ्जित इव पिञ्जरीभवति सन्ध्यया पुरन्दरहरिन्मुखे बडवानलशिखाकलापकपिलरुचा सुभटप्रताप इव प्रसरति दिङ्मुखेषु बालातपे समरालोकनकुतुकादिव सत्वरमुदयगिरिशिखरमारोहति हरितहये रामजनार्दनौ भोजनार्थं पुरस्कृत्य राजकुलान्निर्जग्मतुः । निर्गतौ च तौ निजतेजःप्रतिहतार्ककिरणानि रणविहरणानि रणविहरणागतानि हलमुसलचापचक्रमुख्यानि सिषेविरे रणदिव्यायुधानि। कंसारिरस्त्राञ्जलिपुटोच्चं साभिरामशिरसामस्त्रदेवतानामवनिभुजां च वर्गमवलोकनेन मानयन् प्रासादगर्भनिर्भरोदीर्णबलकलकलप्रतिध्वनिना कृतजयशब्दोद्गारादिव नगरान्निरगात् ।

See also Note 169 and the text connected with it.

Nissāṇa is used by Vidyānātha also. See *Pratāparudrīya* verses *yātrāpravṛṣi* etc. and *yātrārambhavijṛmbhamāṇa* etc. (pp. 269 & 271 in the Bālamanoramā Press edn., 1950).

क्रमेण च प्रचलदलघुबलसंमर्दमसहमान इव क्षितेरुत्पतन्[163] अतिचटुलचक्रधाराहतिकुपित इव रथानधःकुर्वन् निजनाशशङ्कित इव शोषयन् गजमदजलानि कठिनखुरपीठपीडित इव धूसरयन् तुरगस्कन्धकेसरं निर्दयचरणतलताडनावमत इव रुन्धन् पदातिनयनपथं धाराजलपानलुब्ध इव लगन् कृपाणलतिकासु गगनारोहणपर इव दिनकरकरानवलम्बमानः चिरकालतप्तवसुधाप्रोत्साहित इव पिबन्नातपं पटवासपांसुरिव सुभटवारवाणेषु नवरजःप्रसर इव नरपतिवैकक्ष्येषु सिन्दूररेणुरिव सिन्धुरकुम्भभित्तिषु द्विगुण इव परस्परसंघट्टरभसक्षुण्णभूपतिभूषणमणिचूर्णेषु जनितरिपुयुवतिनयनजलो धूम इव प्रतापपाचकस्य दिङ्मुखाधिवासोचितः कर्पूर इव ब्रह्माण्डकरण्डकस्य पिहितपयोधरभरः कूर्पास इव नभःश्रियो गगनतरङ्गलक्षणीयाकृतिर्यवनिकापट इव समरनाटकस्य कलितगजमुखोऽपि शकलिततारकोन्मेषः परिचितपुष्करोऽप्यवारणः प्रसृतविषयोऽप्यपरिमेयो रुरोध रोदस्स्थलीमलीकदिनकरोपरागः परागप्रसारः। तस्मिन् [164]रासभरोमसहसि कलितनभसि विजृम्भिते रजसि सकलद्वीपदीपो दिनमणिर्दीनरुचिरभवत्। किमुत नृपतिमकुटकोटिघटिता मणयः। वेलावनान्यपि विकटतरविटपिचिपिटितवियदाघातानि[165] कदाचिदपि (न) नयनपथमवातरन्। किंपुनः पताकालताकाननानि। परिचितहरिदन्ता अपि दन्तिनः क्षणमुच्छ्वसितुमपि न शेकुः। किमुत चमूमध्यचारिणः करिणः। युगविगमरविगभस्तिभिरप्यशोष्यसलिलानि सरांसि जम्बालतां जगाहिरे। का गणना जयकरेणुमदकणिकानाम्। तदनु शूरपरिग्रहणमिलितानामप्सरसां रणमाल्यलुलितेन मन्दारकुसुममकरन्ददुर्दिनेन ध्वजलताशिखरकोटिपाटितजलधरोदरस्रुतेन सलिलासारेण सेनारजोनिकायः शममियाय।

---

163. The expressions in Nominative singular (like *utpatan*) are construed with *rurodha parāgaprasāraḥ*.

164. MSS read tasmin *rārabharomahāsikalalitanabhasi*. What is given in the text is my guess.

165. See Note 39.

अपगतक्षितिक्षोदरोधे राहुमुक्तरविमण्डलानुकारिणि धूमोज्झितपावकोपमिते नीहारत्यक्तकाननानुकृति जाते जगति मधुरिपुरभिमुखमापतितं यदुपृतनाभारभुग्न-भूतलोद्वेलमुदधिजलममंस्त मगधबलम् ।

अथ [166]रणकरणधृतरणरणकम् अमितबलसुभटवलयितधनुरुदरघटित-विशिखम् अभिमुखचलनचतुरतुरगम् अपहृतमदकरटिमुखपटम् अतिरभसचलित-रथवरम् अनभिमतदलनसकुतुकनरपतिकरविलसदसिलतिकम् अखिलभुवनविहित-भयम् अमिलदलघुबलवलयुगलम् ।

ततो मदोद्भटसुभटदोर्दण्डकुण्डितकार्मुकच्युतानामलघुना शराणां शात्कृ-तेन[167] निशिततरकृपाणकृत्तानां कनकशिरस्त्राणभारोत्तानपातिनामुत्तालपवनपातित-तालफलध्वनिनिभेन शिरसां ध्वानेन समन्ततो विहरमाणदेवताचरणमणितुलाकोटि-रणितानुकारिणा धनुषां गुणघोषेण संमुखागतसुभटाह्वानतत्पराणामरे-रे-कारेण[168] निजबलविजयजनितमुदा मधुरितमुरजध्वनिना धन्विनां सिंहनादेन मुसलाहति-लब्धमूर्छानां कुलिशदलितकुलभूधरनादसोदरेण पततां मदकरटिनामाटोपेन विघटितगजघटाबन्धसुभटश्लाघाविधायिनाम् अविरतविमुक्तसुरतरुकुसुमावलीनिलीन-मधुकरकलकलसुहृदा दिविषदां साधुवादेन परस्परजयोत्कर्षसमयताडितानां नि[169]-स्साणानामुन्मिषता निस्स्वनेन वर्मितविमतवीरमर्मप्रहारमुदितचमूवर्गनिर्मितास्फालन-फलकजन्मना तुमुलेन प्रचण्डभिण्डिपालखण्डितानां वेतण्डदन्तकाण्डानां निर्घातघोषघोरेण पतनध्वनिना धौतासिधेनुधाराविद्धगन्धर्व[170]कन्धरासिरान्तराल-

---

166. There is not a single *guru* vowel in this passage. See the Introduction. See Bāṇa's *H.C. ajam, ajaram*, etc. on page 100 of N.S.P. edn., 1897.

167. The expressions in Instrumental singular (like *śātkṛtena* etc.) are construed with *mukharitanikhilaharinmukham*.

168. This is the *anukaraṇa* of the utterance of *are* and *re* used in calling.

169. See Note 162.

क्षरितानां रुधिरझरीणां झात्कृतेन मणिकवचपातितानां च मुद्गराणामुरुणा खणात्कारेण मुखरितनिखिलहरिन्मुखम्[171] अभिमुखहतशूरगणवशीकरणसफलसुर-युवतिकरमणिवलयरणितमुखरतरतरणिसरणौ[172] अहमहमिकारोहदमरीभूतमहारथ-प्रचारघण्टापथायमानमघवन्नगरगमनपथे सर्वस्वदानतोषितवनीपकापनीयमानगाढ-प्रहारवेदनादूनसेनापतौ नानाविधायुधविघट्टितसुभटकण्ठोदीर्णदहनस्फुलिङ्गसंपाति-पावकास्त्रसंपदि प्रशस्तोदस्तकेतुदण्डखण्डनोदीरितस्वामिनामवल्गद्धानुष्कहननप्रति-ज्ञातरथिनि बहलवसामज्जजम्बालमज्जदविरलरथचरणाकर्षणायस्यदश्विनि निश्वास-मारुताश्वासितपतितसंशप्तसंमुखागताहितप्रहारमुदितचारभटारब्धहाहाकारदारुणे रणे विजृम्भमाणे रथिनौ माधवमागधावुद्भटभ्रुकुटिभङ्गभीषणाननोत्थितेन रोषाट्टहासेन कर्णान्ताकृष्टगुणलताकरालकार्मुकान्तरालनिःसृतेन विष्फारेण दिङ्मुखानि मुखरयन्तौ पुङ्खानुपुङ्खप्रसरैरतिपरुषैर्वचोभिरिषुभिश्च परस्परस्य मर्माणि भिन्दानौ निरर्गल-प्रसरदूष्मणावीरश्रियमिव शौर्येण शोणितेन भुवमनुरञ्जयन्तौ जयपराजयेषु श्लाघाकृतां सभियामुभयेषामपि चमूचराणां शिरसि मनसि च कम्पं संपादयन्तौ साम्परायमातेनतुः ।

तदनु भूरिशौरिशौर्योष्मतापिते सत्वरं द्रवति विरथे बृहद्रथसुते रभसज-नितभङ्गम्[173] भङ्गुरजयोदग्रवल्गदुग्रसेनसैनिकाक्रान्तम् अनिलबलनिरस्यमान-जलदपटलोपमानम् अपगताभिमानमाधोरणमुच्यमानाश्यानरुधिरपङ्कमग्नमातङ्गम्

---

170. *Gandharva* is a synonym of *haya*.

171. *mukharitanikhilaharinmukham* is construed with *sāmparāyam ātenatuḥ*.

172. The expressions in Locative singular (like *abhimukhahata*... ...*taraṇisaraṇau* etc.) are construed with the Locative Absolute *raṇe vijṛmbhamāṇe*, occurring later.

173. The expressions in Nominative singular (like *rabhasa-janitabhaṅgam* etc.) are adjectives to *vimatabalam*, the last expression in the passage.

भग्नाक्षशताङ्गलङ्घनायस्तपादातं निजतुरगवालकर्षणकुपिताश्ववारकरवालखण्डितानुधावदरिकरिशुण्डादण्डम् अनुक्षणकशाघातविरतकबन्धशेषसुभटसंचार्यमाणभयम् उत्तानफलकशायितशस्त्रप्रहारमूर्छितस्वामिवहनकर्मठचर्मिवर्गम् इषुपातरुष्टसिन्धुरनिवर्तनविहस्तहस्तिपकम् हतसारथिरथिगृहीतसारथ्यम् इतस्ततः प्रकीर्णचामरविडम्बितसुभटोज्झितकीर्तिखण्डनिकुरुम्बम् अन्योन्यसैन्यसंमर्दचूर्णितातपत्रम् अनुसरदमित्रसंमुखसुभटजन्यविघ्नितराजन्यहठहरणम् अवपातितशस्त्रक्षतपादखञ्जरकुञ्जरावरोहदधिरोहम् अनुयायिविरोधिदृष्टिरोधिवाजिरजोराजिरचितराजकोपकारं वनतरुविटपाकृष्टरथकेतुपटम् अखिलमपि पलायिष्ट विमतबलम् ।

कृष्णस्तु तत्कालकृताविर्भावं[174] स्वर्भानुचूषितसुधारसमधरामृतलाभलोभादिन्दुबिम्बमिव शङ्खतां यातम् अभितः प्रसर्पता मरीचिनिचयेन निचोलकमिवात्मनो रचयन्तं त्रिदिवमरुद्व्यतिकरश्लाघ्यं सत्कविकाव्यमिव ध्वनिसारम् अवनिपतिमिवानारतलब्धवर्णोत्कर्षं हृदयमिव धर्मस्य भासमिव दुग्धजलधेः फलमिव कीर्तिलतायास्तनमण्डलमिव शुद्धेः प्रतिनिधिमिव लक्ष्मीकण्ठस्य पाञ्चजन्यमपश्यत् ।

आदाय तमुभयपाणिपुटधारितमरुणारविन्दयुगलान्तरालवर्तिनमिव राजहंसं समुच्चितमिव मणिमयोर्मिकामयूखपल्लवावलीभिर्विस्मृतबल्लववनितारदनच्छदोपमर्दं निधायाधरमणौ मारुतापूरणोत्फुल्लगण्डमण्डलसमुच्छ्वासदरारालपक्ष्माग्रपातिकरेण रेणुकणारुणोपान्तनिभृतोत्तानतारकेक्षणेन वदनेन्दुना यदुनाथः पूरयामास । तस्य च जयकुञ्जरडिण्डिमेन दनुजभुजदण्डचण्डिकामखस्वाध्यायजलदध्वनिना दिविषदभ्युदयजन्मदिष्टिवृद्धिकलकलेन जगदवनोद्यत[स्वय]शोमार्गदेशिकेन महता स्वनेन मगधबलानुयायिनीं निवर्त्य निजवाहिनीं यादवेशः पुरं विवेश । इत्थं मुहुरागत्य कृतसमितिमेनमष्टादशद्वीपविजयिनमष्टादशवारान् पराजेष्ट ।

---

174. The expressions in Accusative singular (like *tatkāla-kṛtāvirbhāvam* etc.) are adjectives to *Pāñcajanyam* (*apaśyat*).

अथ कदाचिदभ्यर्थितेन प्रचेतसा दत्ते पश्चिमपयोनिधिमध्यमण्डनायमाने महति कस्मिंश्चिदन्तरीपे विश्वकर्मनिर्मितां जगतीमिवापरां द्वारवतीं नाम नगरीं गरीयसीममित्रकुलदुस्साधां यदुभिः सममध्युवास। या च हर्म्यशिखरोज्जिहान-जलधरपङ्क्तिरमरावतीं जेतुमुत्पतन्तीव गगनतलम् उदधिजलप्रतिबिम्बिता भोग-वतीमभिभवितुं प्रविशन्तीव रसातलं ददृशे। यस्याश्च सालमूलमभिभूय जल-निधितरङ्गा भङ्गमङ्गीचक्रुः। कुतः प्रतिबलतुरङ्गघटाभिभवः। यत्र च ताण्डवितगृहशिखण्डिमण्डलो मुखरीचकार हर्म्यगर्भदरीरम्बुधिकल्लोलकोलाहलः। पुनरुक्ततामवाप मङ्गलमृदङ्गनिस्स्वानः। यस्यां च यादवीनामदवीयान् एलापरि-मलाकर्षिवेलाकाननपवनः कबलीचकार मकरकेतुकेलिखेदोदकम्; निष्फल-स्तरलतालवृन्तव्यापारः।

एकदा तु मन्मथमातङ्गमदसमये माकन्दामन्दानन्दकारिणि कोकिलकुल-कुशलङ्करे कोरकितकुरवकतरौ अशोकशोकापनुदे वकुलवनमुकुलदायिनि मलया-निलवैजनने मासे मधावुदयमासेदुषि नन्दगोपकुलमागत्य कामपालश्चिरकालदर्श-नोदितमुदा सुहृज्जनेन सह बालक्रीडासाक्षिषु कालिन्दीकूलकाननेषु विजहार। तत्र जातु मलयमरुदुद्धूतरेणुवितानितमलिकुलकेलिचक्रमिलितं कङ्केलिधूलियवनि-कापरिष्कारमवपतितचम्पकप्रसवसंपादितोपहारसौरभ्यमभ्यर्णकर्णिकारमुकुलमङ्गल-प्रदीपशोभितोद्देशं वसन्तवासभवनं बृन्दावनं प्रविश्य गोपिकाभिः सह पुष्पाप-चयमाचरतस्तस्य पुरस्तान्मूर्तिमास्थाय दरविकचदाडिमीगुच्छपाटल[175]च्छविरभितः प्रसर्पतालिपटलेन परिभूतसकलकुसुमपरिमलेन वासन्तीवकुलपाटलामोदसंवादिना कषायगन्धेन दिङ्मुखानि वासयन्ती वरुणालयमणिकुट्टिमसंचरणादिवारुणतर-चरणतला सहवाससंस्तवादिव सक्तामैरावतकरसंपदमूरुद्वयेन बिभ्रती मथनगिरि-वलनवेगविक्षिप्तेन वासुकिनिर्मोकशकलेनेव नितम्बदेशलग्नेन मन्दारदुकूलवाससा

---

175. The expressions in Nominative singular (like *daravikacadāḍimīgucchapāṭalacchaviḥ*, *vāsayantī* etc.) are construed with *vāruṇī devatā* (*prādurāsīt*).

प्रसाधिता हारकुरुविन्दकिरणकन्दलिनौ हरिचन्दनपञ्चाङ्गुलचर्चितौ चषकाविव कुचौ धारयन्ती कण्ठावसक्तामाजानुलम्बिनीं लीलालसगमनदोलायितां स्वयमपि संपर्कजां मदघूर्णनामिव महिषासुरमर्दनोत्साहदानतोषितया देव्या चण्डिकया प्रसादितामम्लानपङ्कजमयीं मालामुद्वहन्ती पारिजातपल्लवनिर्माणमातृकयेव दोर्लतया द्योतमाना शैशवलालनविरचितचुम्बनालीनकौस्तुभमणिशोणिमानमिव स्वभावपाटल-मधरममन्दरागमिव पृथग्भूतमाविष्कुर्वती मन्दहसितेषु दशनालोकमधिवासकर्पूर-चूर्णमिव विकिरन्ती स्निग्धारुणकान्तिना शश्वदपाङ्गचूषितयोषिज्जनप्रणयरोषराग-रूषितेनेव चक्षुषा वासनादत्तरक्तोत्पलपलाशश्रियं प्रत्यादिशन्ती तृणीकृताभ्यर्थ-नरोहिणीमानभङ्गविज्ञापनाय कुमुदिनीनायकप्रहितया चन्द्रिकयेव श्रवणान्ति-कोपसर्पिण्या मौक्तिककुण्डलप्रभया भासयन्ती भुवनं प्रत्यग्रभङ्गसुरभिचूताङ्कुर-मवतंसितमुपदेशार्थमिव (?) कस्यचित् सुकृतिनो दधती निरवधिमदश्रमस्फुरितान् विलुलितकुङ्कुमतिलकानलकाग्रपातिनः स्वेदवारिकणान् मधुबिन्दूनिव वर्षन्ती सौरभान्धमधुकरवृन्दसुदिग्धधम्मिल्लबन्धभासुरा सुरासुरसिद्धगन्धर्वचारणश्लाघनीय-गुणा भैरवाट्टहासकैरवोल्लासकौमुदी कालीजिह्वाकन्दलोच्छ्वासकालिका मातङ्गीवदन-सरोजवासभृङ्गी समुदितमदसंपत्तिः पञ्चदशीव पञ्चायुधकुञ्जरस्य संभृतरविरागशेषा प्रभातवेलेव हृदयकमलप्रबोधस्य सर्वातिशायिरसभरिता[176] मञ्जरीव तारुण्य-तरोरापानसंगीतमर्दलस्तनितगर्भिणी रतिकेलिनाटिकानाम् अनुग्रहशान्त्याहुतिः शोकान्धकारदीपशिखा लज्जाशङ्कुला धृष्टा दिष्टिवृद्धिर्वारुणी देवता प्रादुरासीत् ।

अभिमुखविस्मरसुरभिपरिमलाघ्राणसुखमुकुलितापाङ्गमनङ्गमिव साक्षादङ्गी-कृताङ्गमालोकयन्ती तमुपसृत्योपहृतपानपात्रा मात्राधिकश्वसितमारुताश्यानस्वेदार्द्र-कुचशिखरपत्रभङ्गमृगमदामोदिन्युरसि पद्मरागभक्तिसंपुटानुकारिणमञ्जलिं घटयित्वा रदनरुचिप्रत्युद्गतकरनखमयूखरेखा व्यजिज्ञपत् । नाथ नदीनायकस्य दुहिता

176. MSS read *sarvadiśādhirasadharitā* ! ! !

वरुणस्य सोदरी सुरभिसुधासुधाकरसुरमहीरुहाणां हालाहमिह वने बालाभिः सह विहर्तुमागतस्य भवतः सेवार्थमस्मिन् कदम्बतरुकोटरे विदधामि संनिधानमिति ।

मधुभिदग्रजोऽपि तद्वचनमधु श्रुतिशुक्तिपुटेनास्वाद्य हृद्यमुद्यदामोदस्तथा विधेहीति तामन्वमंस्त । तदनु तत्र मृदुलचैत्रमारुतप्रमृष्टनूतनचूतरजसि मधुलक्ष्मी-संपादितवकुलमधुसेकसंपदि वनदेवताविकीर्णविविधोपहारकुसुमसुरभौ मदचपल-मधुपकुलगानमुखरदिशि पानभूमावुपविश्य कण्ठावसक्तरक्ताशोकदामप्रतिबिम्बित-कर्णपूरदाडिमीकुसुमं पानात् प्रागेव मदरक्तमिव कपोलमुद्वहन् हरिचन्दनपुण्ड्-कालंकृतविशालफालफलकः कामपालो नीपतरोर्निष्पतन्तीं हालां समीपस्थितानां सविस्मयमवलोकयन्तीनामाभीरयोषितामर्चितामिव प्रतिमानयनपङ्कजावलिभिर - खिलेन्द्रियतृप्तिकारिणीमपिबत् ।

अपाययत चात्मनिश्वासविहितनिधान[177]विशेषामशेषा गोपयोषितः । क्रमेण तस्य चेतसि कपोले च कमपि रागमुन्मीलयन् दृशि वपुषि च घूर्णनं कलयन् वचसि चरणे च परिस्खलनमारचयन्नाविरास मदः । तस्य च मुखचन्द्रोदयरागेण कपोलदर्पणारुणनिचोलेन भुजशिखरिसान्ध्यवारिमुचा वक्षःस्तटगैरिकपरागेणोद-ज़म्भि मदरागेण । सभ्रूविलासभङ्गिस्वीकृतहसितवदनेन्दुश्चतुरतरालसगति-र्युवतिरिव हलधरमतिरक्तमाततान मदलक्ष्मीः । तदनु मदरञ्जितेषु माणिक्यमु-कुरानुकारिषु गोपवधूफालकपोलफलकेषु प्रतिबिम्बितमात्मानं कस्त्वमिह निवससीति पृच्छन् मणिचषकधिया तरणिमण्डलजिघृक्षुरुत्क्षिपन् हस्तं निजसिचयशङ्कया मुहुरम्बरमवलम्बमानो हसितप्रतिरवमुखरीकृतदरीमुखं गोवर्धनमचलमनुकलं किं मामपहससीति निर्भर्त्सयन् अयि कलिन्दनन्दिनि सलिलकेलिदोहलिनमनादृत्य

177. MSS seem to read *ātmaniśvāsanihitavidhānaviśeṣām*. What is given in the text is purely my guess. The idea intended, perhaps, is that Balarāma could make, by mere sighing, the flow (or the storing) of the *vāruṇī* inexhaustible so that there was plenty of it to serve all the *gopa* ladies.

मामुत्थितं कुतः प्रस्थितासीति कुपितो मगधरुधिरारुणितमुखेन क्रुद्धेनेव स्वयमपि महता हलेन यमुनामाचकर्ष संकर्षणः ।

तदा मदालसाघूर्णितलोचनान्तः कालिन्दीपूरमाकर्षन् गमनवेगानीतनववारिवाहनिवहः सुरसिन्धुरिव रराज सीरायुधः । हलधरहस्तिपकनिशितसीरसृणिमुखप्रहारदूना करिणीव तरङ्गिणी दूरविधुतोर्मिहस्तमुन्मुमोच घोरमारावम् । तावच्च यमुनाया दुहितुरुदन्तमावेदयितुमिव पश्चिमोदधये गभस्तिमाली नभस्स्थलादवततार ।

अस्तमिते महसि कमलसर्वस्वे नीलाम्बररञ्जनाय संनिहितजनकदम्बदर्शिताकृतिर्विकचजपाकुसुमरेणुश्रोणिर्वारुणीव रुरुचे सन्ध्या । अहमहमिकया मुकुलितमरविन्दविपिनमपहाय मधुकरवृन्दमाननकमलेषु घोषयोषितामासवाधिवाससुरभिषु वासमातेने । विकस्वरमुखस्फुटितमधुरमदिरामोदः केसरमालापरिष्कारो यदुपुङ्गवमनुचकार कुमुदाकरः । अनवरतसुरभिमपरिमितं रौहिणेयवदनसौरभमिव चोरयितुं मन्दमन्दगमनो वृन्दावनमाविवेश यामिनीपवनः । दिवसावसानवेलाहालामदघूर्णनायासगलितोपरिवाससे हलिने सिचयमिव सितेतरं तिमिरपटलमभिनवं प्रकटयामास । अनन्तरमन्धकारातिकन्धराकान्तिसहचरान्धकारकवलिते जगति कर्पूररेणुगौरं यदुवर इव मदवासितोद्गारमिन्दुप्रकाशमाबभार पूर्वदिग्भागः । तत्क्षणादुदयरागचारु मदारुणीकृतगोपतरुणीकपोलमुखमण्डलमिव विडम्बयितुमम्बुजरिपुबिम्बमम्बुधेरुदगात् ।

अथोदयमुदितरोहिणीकेन रेवतीजीवितेशेन हिमकरहलिना निर्दयमभिहत चटुलकिरणहलमुखेन तिमिरयमुनापूरः । अभङ्गलाङ्गलप्रहारवेदनादूनयमुनादर्शनायातमन्दाकिनीपूरमतिक्रान्ता चन्द्रातपेन प्लावितायां वृन्दावनभुवि यदुवृन्दारकः शीधुपानशिथिलमानमन्दाक्षभाजनं व्रजकामिनीजनं रमयन् क्षणमिव निनाय यामिनीम् । इति सततमङ्गलानां दृढपरिष्वङ्गसुखविलुण्ठमकुण्ठकुरवकाभिलषि-

तानि[178] वदनमधुग्रहणविफलवकुलदोहलानि चरणतलताडनोत्सवभरहरणवञ्चिताशोकवाञ्छितानि निर्विश्य वसन्तवासराणि द्वारकामगात्।

अथैकदा रथाङ्गपाणिर्जरासन्धबन्धुना बद्धवैरेण रुक्मिणा शिशुपालाय दास्यमानां निजगुणहृतहृदयां[178a] रुक्मिणीं हठादादातुकामः कामपालतिलकितेन महता बलेन यदुपुरान्निरगात्। निर्गतश्च निरन्तरोदस्तकुन्तमुखदलितनालिकेरफलगलितशीकरारब्धदुर्दिनेन[179] सुभटभुजविलसदसिलतामरीचिनिचयमेचकतमकीचकतमालषण्डेन वेतण्डकुम्भसिन्दूरलम्बितिलकायमानबालत्वक्सारपत्रेण करेणुकारूढवारवरवर्णिनीमुहूर्तकर्णपूरायमाणकर्णिकारकुसुमेन गन्धानुसारधावितरुण-

---

178 There is a reference in this passage to some items of the well-known *kavisamayas* conveyed by the following verse.

strīṇāṃ sparśāt priyaṅgur vikasati vakulaḥ sīdhugaṇḍūṣasekāt
pādāghātād aśokas tilakakuravakau vikṣaṇāliṅganābhyām
mandāro narmavākyāt paṭumṛduhasanāc campako vaktravātāccūto gītān namerur vikasati ca puronartanāt karṇikāraḥ,

As Balarāma received all the *pariṣvaṅgas* from the *gopavanitās*, the Kuravaka tree did not get the chance to have their much needed *āliṅgana*. Similarly, Balarāma got the *madhu* (or *madhugaṇḍūṣa*), & the *caraṇatāḍana*, but not the Vakula tree and the Aśoka tree respectively.

178-a. See Note 214. In the *Bhāgavata* (X. 52. verse 26) Rukmiṇī conveys secretly through a messenger (a Brahmin) her request to Kṛṣṇa, Who sends back (X. 53. verse 28) through the same person His promise to rescue her from the enemies. Our author seems to skip over some minor details. See the Introduction.

179. The expressions in Instrumental singular (like *nirantara-* etc.) are construed with *velāvanavartmanā*, occurring later,

योधगृह्यमाणकस्तूरिकाहरिणयूथेन सरभसकरभकबलितसरलकिसलयेन बडवाधिरूढसुभटवधूटीकुचतटकुङ्कुमपाटीरपङ्कभावितचम्पकलतागुच्छेन तुरगखुरखनित्रचूर्णितैलाफलक्षोदवासितरोदसा वेलावनवर्त्मना लवणोदमतीत्य पञ्चषैरेव वासरैराससाद कुण्डिनपुरम् ।

तत्र च मगधपुण्ड्रकाधिपप्रभृतिबन्धुवर्गपूरितेन चेदिपतिना श्वोभाविनि शुभे लग्ने परिणेष्यमाणामयुग्मबाणास्त्रदेवतामिव शरीरिणीं रुक्मिणीं रथमधिरोप्य यदुपुरमभिप्रतस्थे ।

प्रयान्तं च तं कन्यकारत्नहारिणमपरे कल्पितरथकरितुरगपदातयः शिशुपालमुखा महीपतयः सुमनस इव सुधां हरन्तमुदायुधा रुरुधुः । अथ तयोरुभयोरपि सैन्ययोर्विस्मरवितानरुध्यमानरजःप्रसरं[180] विजृम्भमाणध्वजपटपरिमृष्टरागसुरयुवतिचरणलब्धरुधिरालक्तकशोभम् असिभिन्नकुम्भनिपतितमणिशर्करिलधरणितलकृच्छ्रकृतपदद्विरदम् अस्तगरुणनेमिरथचरणाचरितसपरिवेषपूषबिम्बविडम्बनम् इभदशनशकलविरचितसुभटयशोऽङ्कुरशङ्कम् अङ्गदव्यक्तकरिकरभङ्गव्यतिकरितराजभुजदण्डखण्डं मुसलप्रहारमूर्छितशूरशताश्वासदायिशरगरुदनिलम् उरगशङ्किकङ्कगृध्रगृह्यमाणयोधबाहुच्छेदम् अस्रसरःप्रतरदिभकर्णपद्मिनीपत्रं प्रहरणघट्टनविस्फुरदनलकणदीपसूचितरणदेवताराार्तिकमप्सरोभिः मृतचारभटपरिषदभ्यसूयितामरसमरं समरमभवत् । तत्र च शार्ङ्गबलाहकविसृष्टविशिखासाराभिवृष्टमतिशितहलिहलविलुठितमङ्कुरितमयमखिलमजनि विमतबलम् ।

क्षणेन समराजिरात् पराचीनेषु वीरेषु कान्दिशीकेषु पारसीकेषु सन्त्रासतन्द्राजडेषु गौडेषु शरदलितरथे विदूरथे विष्णुपथशिथिलगतौ शाल्वपतौ भीतिपरिग्रहलोले शिशुपाले विद्रवति विपक्षपाटितहृदये पतितसत्त्वे जरासन्धे सोऽहमाहवभुवि रुक्मिणीचोरमभिजित्य नन्दसुतं प्रवेक्ष्यामि कुण्डिनपुरम् इति कुण्डलितचापदण्डो रुक्मी रुक्मपुङ्खैरसंख्यैरिषुभिरभिववर्ष यादवर्षभम् ।

---

180. The expressions in Nominative singular (like *visṛmara... prasaram* etc.) are construed with *samaram* (*abhavat*).

कृष्णस्तु तान् नवकुवलयपत्रकान्तिभृतः कटाक्षानिव जयश्रियः प्रतीच्छन् पञ्चषैरेव सायकैः विरथीकृतं जिघांसुरवप्लुतो रथे गृहीत्वा कचेषु वैदर्भम् अग्रतः कृतसांनिध्यम्[181] उत्सृष्टधवलकोशतया मुक्तकञ्चुकमिवोरगम् अपगतशरदम्भोदनिकायमिव विहायसम् अन्तिकपर्यस्तफेनराशिमिव यमुनाप्रवाहम् अतिविमलतया दूरप्रतिबिम्बितबिम्बमात्मकुलप्रभवराजन्यकाभययाचनार्थमागतमिव भानुमन्तम् उद्वहितससीमकनकत्सरुखचितपद्मरागरुचिपरिचितावयवतया तृष्णातिशयनिपीतमन्तरमान्तमसुररुधिरशीधुमिव वमन्तम् अमरगिरिमिव रमणीयमेखलाभाजं विन्ध्यमिव बहुलवनभयंकरं विपश्चितमिवावगाढविविधसमितिं विषवह्निधूमनीलं जिह्वापल्लवमिव शौर्यशर्वस्य लक्ष्मीनिवाससदनमुत्पलमिव वाहिन्या रक्तासवपानदुर्ललितमलिसंतानमिव प्रतिभटमुखकमलानां धाराधरमप्यचञ्चलोन्मेषं शैत्ययुक्तमपि भास्वन्तं महान्तमपि मुष्टिग्राह्यं पुत्रमिव कालरात्रेर्मित्रमिव कृतान्तदंष्ट्रायाः सच्छात्रमिव कालकूटस्य प्रदोषमिव यशश्चन्द्रोदयस्य मदनिष्यन्दमिव क्रोधनिष्यन्दस्य नन्दकं खड्गमग्रहीत् ।

अत्रान्तरे सत्रासम् आर्यपुत्र परित्रायस्व मम कृते कृतापराधमपि भ्रातरमसुमेकम् इति विदर्भराजसुतयाभ्यर्थितो निवृत्तनन्दकव्यापारः शिततरभल्लमुखरचितपञ्चचूलिकं सपराजयव्यलीकं विसृज्य विद्वेषिणमधिरूढरथो रिपुरुधिररूषितायुधया यदुसेनया परीतः पुरीं निजामुच्छ्रितध्वजामाविशत् ।

तत्र तत्कन्यकारत्नमुद्वोढुमना महितेऽहनि महनीयगुणः प्रसाधितो बन्धुजनाभरणकलकलस्थगितमङ्गलमृदङ्गतुमुलस्य महतः कौतुकागारस्य मध्यभागपरिष्कारमुन्नतमणिवेदिमध्यमध्यतिष्ठत् । अनन्तरमन्तःपुरात् कुलपालिकाभिरुपानीतनूतनदुकूलधारिणी[182] कदलिकेव विभ्रमद्विपस्य मलयजरसपाण्डराकृतिः

181. The expressions in Accusative singular (like *kṛtasāṃnidhyam* etc.) are construed with *nandakam khaḍgam* (*agrahīt*).

182. The expressions in Nominative singular (like *upanīta*-

कीर्तिरिव सौभाग्यसार्वभौमस्य मणिनूपुररणितनिभादुरुभारवहनखेदमुक्ताक्रन्दमिव चरणारविन्दयुगलं दधती विसृतबिसखण्डरुचिना मधुरविराविणा च नितम्ब-पुलिनहंसमण्डलेन रशनाकलापेन भासमाना रशनारवापदेशात् त्वमिवाहमप्य-न्तर्वक्ष्यामि मनसिजमिति हृदयं प्रति कृतस्वालापेनेव कनीयसोदरेण कमनीया नाभिह्रदोदीर्णरोमलतैकनालविधृतौ शैशवविनाशपिशुनावुत्पातयमलकमलकोशाविव कुचकलशौ बिभ्रती संनिहितदयितकरग्रहणोत्सवदक्षिणबाहुरुषेव स्फुरन्तीं वामबाहुलतां सस्मितमवलोकयन्ती तनुबन्धुरेण सौन्दर्याम्बुनिधिकम्बुना कण्ठेन स्तनगिरिनिर्झरधारां हारलतां धारयन्ती अमृतातिशायिरसभाजस्तरुणिमतरुफलस्या-धरमणेररुणिम्ना प्रवालमयमिव नानाभरणमौक्तिकं रचयन्ती नानाविधानां कर्णा-भरणमणीनामनणीयांसमंसविलम्बितमंशुप्रसरमपरमिव वर्णांशुकं दधाना नवलोध्र-परागपाण्डुना नयनकमलविलासोपनतेन शरदागमेनेव कपोलरुचिपूरेण विशदयन्ती ककुभः कनीनिकाकान्तिविजितेन मधुकररवस्तुतिमता कृतलोचनसेवाविधिनेव कर्णोत्पलेनाध्यासितकपोलपर्यन्ता निर्मलललाटलग्नं प्रतिबिम्बमिव सीमन्तमणे-र्गोरोचनातिलकमुद्वहन्ती विरोचनाभिभूतिभियाभिमुखशशिनं शरणमुपगतमन्ध-कारमिव सनक्षत्रमीषदालक्ष्यगर्भकं धम्मिल्लमाबिभ्रती विदर्भराजदुहिता यदुभर्तुरलं-चकार पार्श्वभुवम् ।

यथाविधि पुरोधसा हुतं हुतवहं यदूद्वहः प्रतिनवकिसलयताम्रमाम्रतरुं वनकरीव वधूसहायः परीयाय । प्रत्यूषसि रविप्रभया क्षिप्त इव सगैरिके चरमगिरि-शिरसि तारकानिकरो विदर्भराजतनूजया तनूनपाति पातितो रराज लाजावलिः । तदा च तस्याः स्तनपरिसरे कस्तूरिकापत्रभङ्गशङ्कामङ्कुरयन्नाननपङ्कजसविधे भृङ्गभङ्गीमङ्गीकुर्वन् कपोलस्थले कर्णपूरतमालकिसलयकलामाकलयन्नलिकभुवि चूर्णकुन्तलभ्रान्तिमुद्भावयन्नुज्जगाम होमधूमपल्लवः । इति विधिवन्निर्वर्तितपाणि-

---

nūtanadukūladhāriṇī etc.) are adjectives to *vidarbharāja-duhitā, occurring at the end of the passage.*

पीडनविधिर्विविधगुणगणश्लाघ्यां विपञ्चीमधुरस्वरां सुकृतशतलभ्यां वैदर्भीं रीतिमिव विचक्षणः स्वीचकार कमलेक्षणः।

तस्य च बन्धुभूतः प्रहृतसुत्रामभूमा सत्राजित् वृष्णिपुङ्गवो भगवति पूष्णि भक्तिमानभवत्। एकदा तु पाकविस्फुटितशुक्तिमुक्तमौक्तिकालोकपुनरुक्त-पुलिनधवलितधवलिमनि सविधभुवि पयोनिधेर्विहितदिवसमुखविधेरस्य जपतः पुरस्तात् उदयरागपाटलमण्डलादवतीर्णः[183] प्रतिदिवसविकासमुदितरक्तकमलवदनदन्तराग-संपद इव निसर्गारुणस्य पादपल्लवस्य रोचिषा सान्ध्येनेव महसा सततविहिता-नुबन्धो निजनायकमण्डलम्लापननिवारणाय शरणागतमुडुगणमिव चरणलग्नममल-नखनिभेन बिभ्राणः चटुलरथतुरगखुरटङ्कदलितहाटकगिरितटविटङ्कच्छुरितमिव बालातपकपिशमंशुकं वसानः त्वष्टृटङ्कोल्लेखलेखानुकारिवलित्रयालंकृतमध्यभागः प्रभा[184]नुलिप्तवियदाभोगमेकावलीमध्यगतं नक्षत्रमालान्तरवर्तिनमिव लोहिताङ्गं सत्पुरुषमिव हृदयधार्यं ग्रीष्ममिव तरुणप्रवालपाटलं कालमिव बहुलक्षणोपेतं यातुधानमिवोन्मिषितलोहितरुचिं शूरमिव त्रास[185]शून्यं निवातह्रदमिव फेनबिन्दु-रहितमधरमिव निधानदेवताया हृदयमिव रोहणस्य जीवितमिव रत्नाकरस्य पत्तनमिव शेषमौलिरत्नानां कूटस्थमिव कौस्तुभस्य सन्तानमिव चिन्तामणेः प्रतिनिधिमिव निजमण्डलस्य भद्रपीठमिव दिवसलक्ष्म्याः स्यमन्तकाभिधानमुरसा मणिं दधानः छायाकपोलकस्तूरिकापत्रमकरिकाङ्कमांसलांसकूटः केयूरकोटिधृतया रथवाहदेहकान्त्येव चिरपरिचयलग्नया गारुडमणिप्रभया कमलिन्येव गाढमालिङ्गित-बाहुः वलयप्रत्युप्तबलभिदश्मरश्मिरञ्जिततलेन वारं वारमन्धकारप्रहारलग्नकालिम्नेव

183. The expressions in Nominative singular (like *avatīrṇaḥ* etc.) are construed with *bhānuḥ* (*āvirabhūt*).

184. The expressions in Accusative singular(like *prabhā...bhogam* etc.) are adjectives to *maṇim* (*dadhānaḥ*).

185. *trāsa* has two meanings, (1) *bhaya*, and (2) a *ratnadoṣa*, which are applicable respectively to *śūra* and *ratna*.

करद्वयेन कमलिनीनिमीलनामर्षहठहृतां ज्योत्स्नामिव नखमयूखरेखामाकर्षन् मदेभदेहरुधिरबिन्दुसन्दोहमिव कपोलसंक्रान्तं कुण्डलकुरुविन्दकिरणबृन्दमुद्वहन् कुवलयारण्यलावण्यमुषा चक्षुषा करुणापूरमिषाच्चुलुकितमिव तुषारवर्षं पुनर्विसृजन्नुच्चावचानामुत्सर्पिणा मकुटमणीनां मरीचिमण्डलेन परिवेषेणेव भूषितोपरिभागो भानुराविरभूत्। स च तं प्रदोषयुगसंवर्तकं विवर्तमाम्नायानां धाम्नामाधारमालोकयन्नष्टाङ्गस्पृष्टभूतलः प्रणम्योत्थाय हृष्टश्चिरं तुष्टाव। दृष्ट्वा च तस्योरसि रत्नवर्यमर्यम्णस्तदादित्सुरासीत्।

चण्डद्युतिरपि वरदानशौण्डमना विज्ञाय तदीयमभिलषितमुन्मिषदमलदशनप्रकाशापदेशात् पुनरपि कवलितमिव कुमुदवनहसितमुद्वमन्निदमब्रवीत्। भद्र भवता विहितया मयि भक्त्या भवति मदीयमिदमपरिमितसंमदवशंवदं हृदयम्। लज्जाकुला कुलयुवतिरिव तव मतिरभिलषति यादृशं वरं वितरिष्यामि तादृशमिति। स तु घटिताञ्जलिः प्रत्यवादीत्। भगवन् भवदाविर्भावमात्रादेव ममायमात्मा भुवनाभोग इव तमसा दूरमुज्झितः। सरसिजमिव प्रबोधमापद्यते चेतः। रथाङ्गमिथुनानीव चिराय सुघटितानि समीहितानि। सूर्यकान्त इव जातोऽस्मि किमपि तेजस्वी। किं च सर्वेषां ज्योतिषां वरं भवन्तमेव लब्धवतो मम किमन्यवरलोभेन। तथापि भुवनेऽस्मिन् भवत्प्रभावं प्रकाशयितुं प्रभवति केवलमिदमेव फलमिव भक्तिलतायाः कण्ठभूषणं महद् रत्नमिति।

अथ दिनमणिरधिविबुधमणिच्छायाकुचकर्कशत्वसहं तदुन्मुच्य कण्ठाज्जातोऽयमभिजातो मणिग्रामणीरनर्घसारः शुचिना येन ध्रियते तत्सद्मनि प्रतिदिनमष्टापदाष्टभारवर्षी भवति। अमुना चाधिष्ठितं राष्ट्रमनवग्रहदुरितपरिग्रहमनातङ्कमपगतपराभिभवशङ्कमनामयमामोदमयं च जायेत। तद् उपर्युपरिसरदपरिमितप्रभावमप्रतिहतधामानमेनं मामिव हृदयेन धारयेत्यभिधाय स्वयमेव तस्य सुलभकमलगन्धाभ्यां पाणिभ्यामधिकन्धरं बबन्ध। आपृच्छ्य प्रतिष्ठिते तस्मिन्नानन्दमन्थरगतिः सुकृती मणिमहःपुञ्जदुर्विभावाकृतिः पुरुषोत्तमं दिदृक्षुरायाति पूषेति

पौरैराशङ्क्यमानः पुरं प्राविशत् । प्रविशंश्च समन्ततः प्रसर्पता स्यमन्तकालोकेन पल्लवितानिवोपवनपादपानापादयन् बालातपावलीढा इव प्रासादमालाः कलयन्नरुणांशुकवितानितामिव राजवीथीं वितन्वानो हरिचन्दनचर्चितमिव पुरजनं रचयन् कुङ्कुमपङ्काङ्किनानीव युवतीकुचतटानि कुर्वाणः स्वभवनं जगाम । तं च मणिं नियतमिमं दाशार्हो महार्हमभ्यर्थयिष्यत इति प्रसेनाय ज्यायसे व्यतरत् ।

अथ कतिपयदिवसावसाने वसुदेवसुतः कदाचिद् विगतप्रतिपक्षतया विनोदमपरमपश्यन् रैवतकासन्नकाननेषु मृगयां विधातुकामः प्रत्युषस्युत्थाय तदधिकृतानादिक्षत् । तत्क्षणादुपतोरणमाधोरणनिवर्त्यमानयामवारणगहनबृंहितोपबृंहितप्रसरः सरभसप्रयुक्तवल्लभकौलेयकाकर्णितः सौधगर्भकन्दरानिव पूरयन् मृगयुमनोरथानामन्त्रणशब्द इव पिशितग्रासाय शुनामुत्पातितनिर्घात इव वनचरयूथिकस्य मृगयासंनाहशंसी वियदध्वनि वितस्तार शंखध्वनिः ।

तस्मिन् विजृम्भमाणे भयतरलनयनमुत्संगशायिनं कुरङ्गमसकृदाश्वासयन्निन्दुर्मन्दतामुररीचकार । त्रासवशरभसविद्राणदानमुद्राः समुद्रान्तरेषु मिमंक्षवो दिग्गजा मंक्षु दिक्षु चुक्षुभुः । रजतगिरिलताकुञ्जपञ्जरभुवि शिलाशयनमधिशयानः किमिदमिति किंचिदुन्नम्य वदनमुन्मील्य निद्राभङ्गकलुषे दृशौ पुनरपि सुष्वाप चण्डिकासिंहः । अचिराच्च विरचितदिवसमुखविधि र्यादवाधिपति र्गृहीतमृगयोचितसमायोगः प्रजविनमारुह्य वाजिनम् आलोलधवलचामरं परिभ्रमयन् ससंभ्रमोपसृतराजपुत्रसहस्रपरिवृतः सोपानद्भि[186]रनवरतव्यायामक्षीणपिण्डिकातनुदृढजङ्घाकाण्डैरुपान्तघटितकर्बुरिकामुखरवैयाघ्रचर्मचण्डातकमण्डितोरुदण्डैरुरुकवचरुचिरवक्षोभिरुपासंगभूषितापराङ्गैरारोहैश्चापधारिभिरङ्गुलिदलभ्रमितभल्लैः इतरेतरविहितमृगवधप्रतिज्ञालापैर्मृगयुभिरनुगम्यमानः कुलिशनिशितनखरकोटिपाटितभुवो[187] वामपादकटकडोलायमानहाटकमयहरिकरिवराहशरभप्रतिमान् केसरिसटारचित-

186. The expressions in Instrumental plural (like *sopānadbhiḥ*) are adjectives to *mṛgayubhiḥ*.

187. The expressions in Accusative plural (like *kuliśa...bhuvo* etc.) are adjectives to *kauleyakān*. (*ālokayan*)

मण्डनचापभृतो वनकरिमौक्तिकनिर्मितग्रैवेयकान् नवरोहितलोहितास्वादलोभादिव लोलजिह्वालतान्....शृङ्खलाधारकानपि बलादाकर्षतः कौलेयकानालोकयन् गन्त्री[188] संचार्यमाणान् धावदेणग्रहणकौशलश्लाघ्यान् अन्तर्हितरक्षकवांशिकच्छलसंछाद्यमानवदनान् तरक्षून् निरीक्षमाणो गव्यूतिमात्रमयनमतिवाह्य यवनिकानिकायवेष्टितदिग्भागमेकदेशविहितप्रदेशम् अन्तःप्रविशतां लुब्धकानामभङ्गशृङ्गध्वनिमांसलेन युगविगमजलधरध्वानशङ्काकरधनुर्ध्वनिवहलेन क्ष्वेलाकोलाहलेन संक्षोभितम् इतस्ततः क्रोडकुलमुच्यमानप्रबलक्रीडम् उन्निद्रकरियूथपरित्यक्तकेतकीधूलिपुलिनशयनतलम् असमयप्रबोधकुपितहरिनखरटङ्कशिखरोट्टङ्कितनिजपर्यङ्कपाषाणम् अन्योन्यविषाणकर्षणखणखणारावसूचिततरुषण्डान्तरितमहिषमण्डलप्रस्थानम् उड्डीयमानशकुनिकुलकलकलाकुलसनीडतरुनीडम् उद्भ्रान्तहरिणीगणमृग्यमाणपुरोनिषण्णतर्णकं मृगयारण्यमाससाद ।

प्रसेनोऽप्याखेटकौतुकाकृष्टचेताः प्रसरद्भिरग्रतः स्यमन्तकाभीशुभिरन्तकपाशैरिव कृष्यमाणस्तमेवोद्देशमगमत् । तत्र च क्षणादितस्ततः पलायमानस्य वनचरयूथस्य चरणक्षोभसंभवः प्रत्युद्गम्यमान इव पवनोत्क्षिप्तेन केतकीरजसा परिष्वज्यमान इव वनमहिषविषाणघट्टनोद्धूतवल्मीकधूलिपटलेन घनप्रसररुद्धरविकिरणो जलधरसमय इति शिखण्डिमण्डलेन संछादिततरुलतागहनो दवदहनधूमइति हरिणयूथेन तिरोहिताशेषगिरिशिखरो नीहार इति वलीमुखावलिभिः अन्धकारितहरिन्मुखः प्रदोषारंभ इति शकुन्तसंततिभिराशङ्क्यमानो रुरोध रोदःकटाहं वनक्षितिक्षोदः ।

स च क्रमेण मृगयामाचरतो राजकस्य सर्वतः प्रसर्पतां पृषत्कानां पक्षपवनेन सहचरनिधनोपजातशुचां करिणां शोकशूत्कारमरुता परिहृतभल्लप्रहाराणां भल्लूकयूथानां गमनवेगसंभवेन वायुना कृतानुसारसारमेयाभिमुखनिवृत्तानां पोत्रिकाणां घुरघुराघोषमिश्रेण निश्वासमातरिश्वना निशातनाराचविद्धमर्मणां

---

188. *gantrī* means a car drawn by oxen. (See also Apte.)

केसरिणां स्कन्धकेसरसटापटलधूननभुवा गन्धवाहेन चक्रचङ्क्रमणमार्गणवञ्चनाय चतुरमपसर्पतश्चमरयूथस्य वालव्यजनानिलेन वागुरावलयपतितानामितस्ततो विलुठतां शिखिनां गरुत्पुटप्रभूतेन च नभस्वता नभस्थले वितस्तार ।

अथ मदभरविधुरमधुकरकुलचलनपर्यस्तानां वनतरुकुसुमस्तबकानामन्तः-प्रसरता मकरन्दबिन्दुदुर्दिनेन वियदन्तरदन्तुरेण कासरसंक्षोभ्यमाणकासार-तरङ्गशीकरासारेण समीरदूरोद्धूतेन समीपगिरिनिर्झराम्भसां सरिद्भिः परितो मृगरुधिरस्रोतोभिश्च प्रशममुपजगाम रजः । अनन्तरममोघपरिघातनघातमोमुह्य-मानसिंहे[189] संभृतस्वैरसंचारसैरिभे परश्वधप्रहारपतितश्वसच्छरभे........सन्नसारङ्गे शङ्कुकृतातङ्करङ्कुकुले....निबर्हितबर्हिणि भल्लनिर्लूनभल्लूके खड्गवित्रुटितखड्गिनि शरमर्दितशार्दूले निशितशिलीमुखपरिहृतिवलितमुखवलीमुखव्राते रुरुगलरुधिरा-स्वादगृध्नुगृध्रमण्डलारब्धरेचकरुचिरविहायसि मृगयुगणमृग्यमाणरोहिणारण्यतिरो-हितरोहिति गवयगवेषितगर्ते तोमरहतचमरसंततौ निधनाभिनयननिपुणनिमीलित-नयनजम्बुकजनितजनपरिहारे यूथनाथपतनदूयमानकरिणि करिणीमार्गितकलभे तरुशिखरावरूढवनदेवताविलोकितविविधमृगपथे मृगयाविधौ प्रवृद्धे यदुपरिबृढः स्वयमप्याचरितुमाखेटमारेभे ।

तथा हि कुण्डलितशार्ङ्गटङ्कारभरितहरिन्मण्डलः क्वचिदेकैकेन शरेण मुहुः खमुत्पततां वातहरिणानां चरणांश्चकर्त कृतहस्तः । क्वचिदाकलितकुवलयदल-कान्तिभिः सहस्रसंख्यैरिषुभिरभीशुभिरिव तिमिरमंशुमाली मदपङ्कमलीमसम् अभि-नदिभयूथम् । क्वचिद् वालभारलवनेन पलायमानस्य लाघवं चकार चमरजालस्य । क्वचिदभिमुखधृतया शक्त्या रोषभृशस्तब्धरोमाणि निष्कम्पकर्णकोशानि सरभसमभिभवन्ति वराहयूथानि मनोरथेन सह द्विधा विदधे । क्वचित् परिहृत-विषाणशिखरप्रहृतिः कृपाणधारया मृणाललावं लुलाव विपुलानि लुलायस्कन्ध-

---

189. The expressions in Locative singular (like *amogha...simhe* etc.) are construed with *mṛgayāvidhau pravṛddhe*.

पीठानि। क्वचित् प्रविश्य कुञ्जोदराणि वेष्टितोत्तरीयवाससा वामप्रकोष्ठेन वाञ्छित-तदीयनखरप्रघातः क्षिप्रं क्षुरिकामुखेन चुक्षुदे तरक्षुकुलम्। क्वचिदवधीरितसैनिक-क्षोभानचलगुहागर्भवर्तिनः स्कन्धकेसरसटानाकृष्य निजकरनखपञ्जरैरेव पञ्चता-मानिनाय पञ्चाननान्।

प्रसेनोऽपि श्रमफेनोद्गारिणा जवनेन वाजिनानुपत्य मृगकुलं निघ्नन् इतस्ततो मृगयानिघ्नचेतोभिरननुगतोऽनुचरैरेकाकी वध्यस्रजमिव विधिवितीर्णां कण्ठविलम्बिनीं स्यमन्तकमयूखसंततिमुद्वहन् कृतान्तमुखकन्दरामिवान्यां वन्यामविशत्।

तत्र चाश्रुतचरहेषारवश्रवणजातरोषावेशेन गिरिकुञ्जरपञ्जरान्निर्गत्य वनकुलविजयवैजयन्तीविडम्बिलाङ्गूलमुन्नमयता गजमदजलगन्धवासितमाधुन्वता स्कन्धकेसरसटाभारम् प्रत्यग्रहतहरिणासृगरुणायतदशनकोटिदारुणं वदनं व्या-ददता केनचित् केसरिणा साश्वो निघ्नसुतः[190] परासुतामनीयत। निशितनख-मुखक्षुण्णवक्षःस्थलपिशितपिण्डमतिक्रूतम् आननेनादाय मणिवर्यं मणिवर्यनिर्य-दंशुजालमापीतमिव मृगरुधिरवारि भूयो वमन् स सौहित्यमन्थराणि कतिचिद् पदानि(गच्छन्)कुञ्जाभिमुखं चचाल पञ्चाननः। तत्र च संततासन्नकिन्नरमिथुन-गीयमानरामायणश्रवणनिष्पन्दहरिणबृन्दायामरण्यभुवि निवसन् जाम्बवान् व्यापादि तस्य[191] तस्य हरेरास्यान्तरापतिताश्चर्यमादाय रक्षन् रत्नवर्यम् ऋक्षपतिः कमपि निबिडं बिलं प्राविक्षत्।

---

190. Nighna was the name of Prasena's father.

191. Though the expression in this context is *vyāpāditasya* (instead of a clear one like *siṃhaṃ vyāpādya*,), yet the lion was killed by Jāmbavān himself, and this fact becomes clear by the gerund *hatvā* found in the *ārya* noted later, which is related to the same incident. See Note 192 and the *ārya* there.

तावच्च पातालतलप्रविष्टमाहर्तुकाम इव स्यमन्तकमन्तरिक्षतोऽवततार तरसा तपनः। यदुभटशरशतशकलितशशलोहितसेकादिव शान्तोष्मा शोणतां जगाम जरठातपः। कैटभरिपुरपि विरताखेटविनोदः स्वेदलवलाञ्छितललाटदेशः सरभसम् अवरोपयत धनूंषि। धावयत मृगरुधिरपङ्किलान्यायुधानि। आह्वयत गिरिगह्वर-चारिणो भषकान्। आश्वासयत मृगपतिनखप्रहारविह्वलान् राजवल्लभशुनः। कलयत करिदशनकाण्डान्। आहरत चमरवालान्। उच्चिनुत कुञ्जरवरकुम्भ-मौक्तिकानि। कर्षत तरक्षुचर्माणि। भजत पिशितभारम्। आनयत सिंहशावान्। उद्वहत वराहघोणाभिघातविवशान् पारश्वधिकान् इति विविधानि यदुसैनिकभाषि-तानि शृण्वन्नरण्यभूमे र्न्यवर्तत।

तदनु मृगयुमण्डलाग्रकृत्तमत्तकरिकुम्भमण्डलाकारे पारावारमपरमवतरति रवौ परितः प्रसर्पता मृगलोहितपूरेणेव सन्ध्यारागे लोहितायति वियति विदलित-वनहस्तिमस्तकस्खलितमौक्तिकस्थूलतारे परिस्फुरति तत इतस्तारकानिकरे गहन-वनलताकुञ्जगर्भेषु हतशेषवराहयूथ इव दृश्यमाने निशीथिनीतमसि यदुपतिरारुह्य वाजिनम् अनन्तरतुरगवर्तिना सात्यकिना सह विहितमृगयाविषयालापः समन्ता-दुदस्तेन हस्तदीपिकासहस्रेण दावपावकशिखानिकायेनेव प्रकाशयन्नरण्यवर्त्माव-काशम् आत्मोत्संगकुरङ्गहननभीत इवानुदित एव तुहिनरुचौ मणिप्रदीपालोक-शोभिताभोगपारमिव सागरं नगरमविशत्।

अपरेद्युरदृष्टे सत्राजिदनुजन्मनि सर्वत्रापि पुरे मणिरत्नाभिलाषिणा कृष्णेन हतः प्रसेन इति सत्राजिदुपज्ञः पप्रथे परीवादः। तं च कर्णाकर्णिकयाकर्ण्य विषयीकृत इव विषादेन विलुप्त इव वैवर्ण्येनाधिकृत इवाधिना यदुवंशमौक्तिक-विषक्तमयशः पङ्कं परिशुद्धिजलैः प्रमार्ष्टुकामः कामपालानुजः सह सैनिकैस्तदेव मृगयावनं प्रविश्य प्रसेनाश्वपदवीमनुससार। गत्वा गव्यूतिमात्रमन्यत्र गिरे-रुपत्यकायां हरिनखविनिर्भिन्नवक्षसमुपरतं प्रसेनमनुसरते बन्धुवर्गाय दर्शयित्वा शोकसमये हृष्यन्नन्तिक एवाच्छभल्लपातितमालोकयामास केसरिणम्।

अपश्यच्च परितो विकटवेणुविटपाकृष्टनीलायतरोमाणम् अचलतटगैरिकच्छुरणशुष्कशोणितकरणसंतानम् अतिप्रमाणाभिः पदपङ्क्तिभिरनुमितदेहबृहत्त्वस्य बिलगोचरम् ऋक्षस्य कमपि पन्थानम्। दृष्ट्वा च हृष्टचेता बहिरवस्थाप्य सकलमपि यदुबलं बिलं प्राविशत्। प्रविशन्नेव शुश्राव सुकुमारनाम्ने जाम्बवतः कुमाराय रुदते स्यमन्तकक्रीडनकं प्रदर्शयन्त्या धात्र्या गीयमानामिमामार्याम्।

सिंहं हतप्रसेनं [192]हत्वानीतं बलेन जाम्बवता।
पश्य स्यमन्तक[मिदं सु-]कुमार सुलक्षणं रत्नम्॥

श्रुत्वा च विस्मितस्तिमितनयनः प्रमदभरविसंस्थुलानि कतिचित् पदानि गत्वा भवनाङ्गणभुवि शिशुं रुदन्तमुपलालयन्त्यास्तस्याः करतले स्थितम् आत्मतेजःप्रसरमुषितबिलतिमिरम् अहिलोकाय वेधसा सृष्टमिव विवस्वन्तमपरं स्यमन्तकमपश्यत्। तं च जिघृक्षुमुपसर्पन्तमदृष्टपूर्वमवलोक्य पुरुषमुद्भूतत्रासवेपथुः स्वामिन् ऋक्षपते परित्रायस्वेति धात्री मुहुराचक्रन्द। जाम्बवानप्यनाकर्णितचरमार्तरवमाकर्ण्य ससंभ्रममभ्यन्तरान्निर्गतो निरन्तरामर्षनितान्तताम्रनयनः सविषविस्फुलिङ्ग इव रसातलान्निष्पतन् भुवं निश्वासधूमभरो गमनरयसीमन्तितावयवरोमजालः प्रबलरोषस्फुटितदैतेयशस्त्रव्रणविवरसहस्रनिःसृतक्षतजनिर्झरेण वक्षसा गुहामुखक्षरितगैरिकरसरञ्जितमञ्जनपर्वतकटकमधःकुर्वन् नलपथ[193]निर्माणभूधरोद्धरणनिष्ठुरतरप्रकोष्ठो लङ्कासमरोन्मीलितसुवेलसालजालसंपर्ककर्कशतलो दशमुखपृतनाकुञ्जरकुम्भकूटकुलिशभूतकुटिलनखरपञ्जरो धारयन् क्रोधं भुक्कारभरितबिलगर्भो मणिहस्तया च धात्र्या राजन्य पुरुषः कोऽप्येष सुकुमारक्रीडनकरं रत्नमादित्सत

192. See Note 191, and the text connected therewith.

193. *Nalapatha* seems to be used by the author in the sense of what is known as *Nalasetu*, the bridge that was built by Nala, the son of Viśvakarman, over which Rāma and His army are said to have passed to Laṅkā. In the construction of this bridge Jāmbavān, says our author, had contributed his share.

इति पुरतः प्रदर्शितमुद्वीक्ष्य यदुपरिबृढम् अयि मूढ मनसापि दिशामधीशानां दुष्प्रवेशमिमं प्रदेशमागतं भवन्तमन्तकभवनोद्देशगामिनमचिरादमुना जरदजगर-भोगायामभाजा भुजपरिघायुधेन विदधामीति नियोद्धुकामो दुद्राव। कृष्णोऽपि विकत्थनस्यास्य बाहुयुद्धनिर्जितस्य दोर्दण्डदर्पमिव मणिप्रकाण्डं हरिष्यामीति तदभिमुखं चचाल। चिररात्राय यदुभल्लूकमल्लयोरिव हस्तव्यापारनिरतयो र्नियुद्धमुद्धतामर्षयोरभवत्।

जाम्बवांस्तु भुजसाम्परायजातश्रान्तिरतिमानुषसत्त्वोदितवासनया अपास्त-रोषकालुष्यस्तत्क्षणमम्बुरुहेक्षणमचार्मणेन चक्षुषा विबुधकार्यसिद्धये भूतलकृतावतारं पुरुषं पुराणमवधार्य भगवन्तम् तिरश्चा मया स्थाविरसुलभक्रुधा प्रवयसा यदनार्य-माचरितं तदशेषमपि क्षमस्वेति दयापयोधेः पादयोर्निपत्य दुहितृरत्नमुपनिन्ये। पश्चात् स्यमन्तकरत्नम्। तत्र च विधिवत् परिणीतामादाय जाम्बवतीं मणिमरीचिपूरधौतवर्णवैवर्ण्यः सपदि बिलगर्भतो निर्गत्य मुदितयदुसैन्यसहितः पुरं द्वारकामाविशत्। ददौ च प्रसेनाग्रजाय मणिवर्यम्। स च तस्मै मिथ्याभिशापाधिरोपणापराधनिर्वासनाय सर्वातिशायिसौन्दर्यामात्मजां सत्यभामां यथाविधि वधूं प्रसाधितां [प्रादात्]। सा च तस्य बहूनामपि शुद्धान्तसुन्दरीणां ताराणामिव रोहिणी कलानिधेः सरितामिव मन्दाकिनी रत्नाकरस्य परं प्रेमपात्रमभूत्।

अथ कदाचिदुदयमचलमारूढे रूढरोचिरङ्कुरालवालमण्डले पुण्डरीकसुहृदि मृदितकुमुदिनीमुदि कौमुदीमदमलिम्लुचे मरीचिमति यदुपतिरारचितदिवसमुख-विधिः अवरोधसद्मनि प्रसाधितो निवसन् पर्यङ्कपार्श्वस्थितया स्कन्धावसक्तवालव्य-जनया सत्यभामया वितीर्णां वीटिकामाददानः जटामणिभूषणरटितमुखरिताद् अम्बरतला[194]दवतीर्णां मङ्गलदीपांशुपिङ्गलेन तेजसा सौधगर्भावकाशं प्रकाशयन्तीम्

194. The expressions in Accusative singular (like *avatīrṇām*) are construed with *animiṣapuradevatām* (*apaśyat*).

असितागुरुधूपभावितेन भवनशिखिबर्हभारेणेव कैशिकेन भासमानां सुरभिखुरधूलिधूसरालिक्रयालकलेखया वृत्ररिपुविजयातपत्रवृन्तं मलयजरसतिलकमुद्वहन्तीम् अभिनववन्दनमालानुहारिणा बाहुयुगलेन ध्वजलताकान्तिमाविष्कुर्वतीम् शक्रशरासनशालामुच्चावचरत्नमयीं कामपि कर्णभूषां तोरणस्रजमिव बिभ्राणाम् उद्ग्रीवलोकदृश्येन कुचकुम्भयुगेन वैजयन्तकलशवैभवमाविर्भावयन्तीम् मधुकरमालामधुरां रोमावलीमैरावतमदराजिमिव मध्यभागे बिभ्रतीं सुरगुरुक्रतुकुण्डसनाभिनाभिमण्डलाम् इन्द्राणीगृहमणिवेदिकारामणीयकभृता श्रोणिबिम्बेन शोभिताम् अभितः काञ्चीकलापं परिहितेन कनकप्राकारपरिसरप्रवृत्तसुरसरित्स्रोतसेव वाससा प्रसाधिताम् तोरणस्तम्भपृथुलोरुसंपदम् जयन्ततूणीरजङ्घाकाण्डाम् अनवरतममरगिरिवासलग्नगैरिकपङ्कशङ्काकृता यावकेनालंकृतपादपङ्कजाम् अमलचरणनखमयूखजालच्छलादुपहारकुसुमपटलमिवाग्रतो विकिरन्तीमनिमिषपुरदेवतामपश्यत् ।

सा चोपसृत्य दैत्यरिपुं सीमन्तरत्नकिरणावलीरञ्जितप्रणामाञ्जलिः शुनासीरशुद्धान्तकामिनीपाणिपरिवादिनीनादानुनादिव्याहारा व्यजिज्ञपत् । भगवन् अखिलजगदवनजागरूकभुजगरिमा भवानवधारयतु माममरगिरिशिखरोद्भूषणाञ्चितां मणिमञ्जूषाम् उच्चैःश्रवःखुरमृदङ्गनिनदरङ्गभूमिम् ऐरावतमददुर्दिनप्रावृषं कामधेनुगोष्ठभुवम् अनघमघवद्बाहुपरिघपालिताम् अमरावतीम् । आगतास्मि भवदन्तिकं ममापि बिडौजसोऽपि दुस्साधमुपनतमुपप्लवम् असुरकुलधूमकेतवे देवाय निवेदयितुम् । अधुना नरकासुरेण ग्रहेणेव भौमेन चक्रचारिणा सकलोऽपि कदर्थ्यते लोकः । स्वभुजवर्गगरिमापहृतानि सुपर्वगन्धर्वसिद्धसाध्यदनुजभुजगरक्षोयक्षराजन्यकन्यकारत्नसहस्राणि षोडश युगपदुद्वोढुमनसा अवरोधसद्मनि न्यरोधिषत । पयोधिशायिनो नारायणस्य भगवतो नाभिपुण्डरीकमिव वरुणाच्छत्रमानीतम् । अमरपतिचरितवर्णनामूक्तमिवामृतस्राविसुमनोमौक्तिकशुक्तेरदितेः श्रवणरत्नमपहृतं कुण्डलद्वितयम् । अपि च सकलभुवनकण्टकः (सः)त्वद्भ्रूविक्षेपलब्धप्रतापमिव बलभिदो बहुमदोष्माणमैरावतमाहर्तुकामः त्रिचतुरैरहोभिरुपरोत्स्यति

माम्। न शक्ष्यामि सज्जनश्लाघ्या कुलपालिकेव परेणापाद्यमानम् उद्भटकरका-वृष्टिदन्तक्षतान्तरं सोढुम्। अतः परं बद्धत्रिभुवनरक्षणदीक्षाकङ्कणो देव एव वेत्तीति।

शौरिस्तु तस्या वचश्श्रुत्वा सुलभस्मिताननेन्दुश्चिरकालोपनतसमररसवि-तीर्णमवयवेषु रोमाञ्चकञ्चुकमामुञ्चन्निदं जगाद। अमरावति पराभिभूति-भुवा भयेन तावदलम्। अम्बुकाले रजस इव धरणिजन्मनः क्षणेन तस्य दिवमभिभवितुमुद्यतस्य शमयिष्यामि प्रसङ्गमहं शार्ङ्गवलाहकविसृष्टेन विशिखासारेणेत्युक्त्वा तां सबहुमानं व्यसर्जयत्। तत्क्षणादेव विधृतरणोचित-वेषो निर्गत्य सौधगर्भाद् अङ्गणभुवि संनिहितममराचलमिव तटिता बलाहकः समरालोकनसकुतुकया सत्यभामया सह विहगनाथमधिरूढस्तदीयपक्षरोचिषा प्रतापेनेव दिङ्मुखव्यापिना प्रसाधितपुरोभागः प्राग्ज्योतिषं जगाम। ततः पतत्पतिः प्रभञ्जनाधिकजवो दवदहन इव गिरिकटकविषलताविपिनम् अति-चटुलनखशिखाभिः सुररिपुपुरपरिसरप्रततम् मुरपाशजालमखिलं प्रणाशयामास। तदनु चिरकालोपनताभिषङ्गभीषणभ्रुकुटिभङ्गकलङ्कितनिटिलचन्द्रमसा दैतेयसार्व-भौमेन संदिष्टैर्मुरपञ्चजनप्रभृतिभिरधिष्ठितमनीकिनीपतिभिः इतस्ततो मन्थानशि-खरिविलुलितकलशसिन्धुहलहलितबन्धुना सङ्ग्रामदुन्दुभिध्वनिना दिङ्मुखानि रुन्धानमसुरबलमखिलमपि नभसि यदुभर्तुररुन्ध पन्थानम्।

तस्मिन् यदुमल्लविकृष्टशार्ङ्गनिष्ठ्यूतभल्लपटलप्रवृष्टे नरकासुरनाशाय कतिचिदौत्पातिका जलमुच इव सुभटाः क्षतजासारेण पुरोपशल्यभुवमभिववर्षुः। कतिचन करटिकबन्धानि निर्घात इव कम्पिताखिलधरातलं पेतुः। इतस्ततश्च पिशितकांक्षिपिशाचकुलोक्षिताः क्षितावपतन्नुपला इव विमुक्तघोररवा वीर-मूर्धानः। वैनतेयस्तु लीलया नवजलधरमालामिव करतलखरनखरकोटिभि-र्विपाटयन् कुञ्जरघटाः कुलधरकूटानिव चरणपुटाभ्यां शताङ्गानाक्रामन् उदधि-तरङ्गानिव पक्षपवनेन विक्षिपंस्तुरङ्गान् कुण्डलिन इव कुटिलाग्रेण तुण्डेन

खण्डयन् सुभटभुजदण्डान् सुरबलमिव पुरा सुधाहरणे दैतेयसैन्यमखिलं विलोडयामास ।

क्रमेण च विक्रामता शार्ङ्गधन्वना धर्षितमद्धानुष्कनिर्भिन्नवर्मणि प्रवासितप्रासिके खण्डितखड्गधारिणि पातितपारश्वधिके शकलीकृतशाक्तिके निष्पिष्टयष्टिपाणौ त्रुटिततुरगघट्टे हतहस्तिनि मन्दस्यन्दनचारे जातावसादसादिनि निषूदितनिषादिनि मथितरथिनि भग्नग्रीवहयग्रीवे[195] लब्धपञ्चत्वपञ्चनदे मुरमुण्डोपहारदत्तमृत्युमुदि निसुन्द[196]कबन्धनृत्तकम्पितावनीके विलभाजि दानवानीके मानव्रतामग्रणीरहीनबाहुमहिमा महीसूनुर्दिक्कुञ्जरकर्णज्वरायमाणरणनिर्याणतूर्यनिस्स्वानः तूर्णममराहवार्णवप्रवहणं[197] शतशश्शक्रेभदानतैलनिषेवणचिक्कणचक्रयुगम् अनुक्षणं वरुणपुरगोपुरकवाटपुटकर्षणमसृणयुगकोटिम् असकृदभिमुखापतितयममहिषनिश्वासपवनपोषितोरगप्रग्रहम् प्रतिमुहु[197a]रायोधननिरतधनदसैनिकपृष्ठरुधिरमाञ्जिष्ठकेतुपटं रथमधिरूढो रुद्रत्रिशूलघातमामुच्य वर्म वासरपतिरथतुरगकेसरसटाकृतावचूलचामरं चापमधिज्यमातन्वानो रुषा कषायितेक्षणः प्राग्ज्योति-

195. Hayagrīva was a *daitya* (see Monier M. Williams) who was killed by Viṣṇu as given in the story of *Matsyāvatāra*. The present one is a namesake of the other. Though not in the *Bhāgavata*, the *Harivaṃśa* mentions him thus: *dvārapālāś ca catvāras tasyāsan yuddhadurmadāḥ, hayagrīvo nisundaś ca vīraḥ pañcanadas tathā*. etc. (*H. V.*, Viṣṇuparvan, 64. vv 18 etc., Lucknow edn.)

196. The portion is not clear in the MSS here.

197. The expressions in Accusative singular (like *amarāhava... pravahaṇam*) are adjectives to *ratham* occurring later.

197-a. Viśvanātha, a nephew and a student of Agastyapaṇḍita, too uses the word *pratimuhuḥ* in his *Saugandhikāharaṇa* (verse 37, N. S. P. edn., 1934). I do not find any note on this word in the Dictionaries available to me. It seems to be in the sense of *muhurmuhuḥ*.

षान्निरगात्। निर्गतं च मुररिपुरवतारान्तरात्मजं वत्सल इव महता केनचिदादरेण प्रत्युज्जगाम। तत्क्षणमुभयोरपि देवकीमेदिनीसुतयोरसह्यशौर्यसिंहहुंकारशङ्काकृता चापटङ्कारेण दिङ्निकुञ्जानि[198] निजभुजकदम्बपुलकोद्गमहेतुना बाष्पवर्षेण गगनपथं विकटमुखविपाठपातोरश्छेदोच्चलदनलस्फुलिङ्गभङ्गभ्रमकारिणा शोणित-कणासारेण समरक्षोणितलम् अभ्यर्णलक्ष्मीकलापिनीवलाहकध्वनिना प्रतिज्ञा-लापेन परस्परस्य श्रवसी प्रतिवारविजयस्फारविस्मयविस्फारितचक्षुषा मुखेन जलजौ[199] च पूरय[200]तोरभूतपूर्वो बभूव सङ्ग्रामः।

अथ दानवमथनः शौर्योत्कर्षजातामर्षलोहितलोचनाम्बुजया प्रियया चोदि-तस्तस्य दनुजभर्तुः शिरो हर्तुकामो हस्ताग्रकृतावस्थानम्[201] अभितः प्रसर्पता विबुध-द्विषदवरोधनवदनमदहसितकौमुदीबालातपेन तेजसा मुष्णन्तमिवोष्णरोचिरवलेपम् असुरगुरुनिर्जराभिचारहोमप्रत्यूहम् स्वर्भानुकबन्धताण्डवोपदेशदेशिकम् अनलमिव समिदुज्ज्वलाकारम् प्रावृट्कालमिवामन्दारस्फुरणम् प्रायोपविष्टमिवासुरक्षणविमुखम् दानवसेनावनैकदाहनिपुणं स्फुलिङ्गमिव कोपानलस्य बहलरुचिविलग्नं नाभिचक्रमिव शस्त्रदेवतायाः स्फुरदग्निशिखाकरालं जिह्वाफणमण्डलमिव भुजभुजङ्गस्य सुदर्शनं ददर्श।

प्रहितेन तेन नभसि भ्रमता हुतवहकणधूलिमुचा शस्त्रवर्येण संवर्तवात्या-वर्तेन शिखरमिव सुरशिखरिणः कृत्तम् उत्तमाङ्गमसुरपुङ्गवस्य भुवो मातुरुत्सङ्गे

---

198. The expressions in Accusative case (like *diṅnikuñjāni*), with separate expressions in Instrumental case, are construed with *pūrayatoḥ*, occurring later. See the Introduction for an example on *Dīpakālaṃkāra*.

199. *jalaja* here stands for *śaṅkha*.

200. The passage here is a case of *Dīpakālaṃkāra*. See Note 198.

201. The expressions in Accusative case (like *hastāgrakṛtāvasthānam* etc.) are construed with *sudarśanam* (*dadarśa*).

निपपात । तस्य च कर्णाभरणीकृतमदितिकुण्डलद्वितय[202]मादाय प्रत्यागता चासुरक्षतार्ददंष्ट्राङ्कुरे सृक्विणी चटुलशिखया जिह्वया लिहति चक्रायुधे [भू-]देवता विक्रमातिशयतोषितया वीरलक्ष्म्येव मूर्तया दयितया दत्तपरिष्वङ्गपारितोषिकं पुरुषं पुराणमुपतस्थे ।

स तु तत्क्षणमाहवभुवमागतानि वीरशय्याशायितं नाथमालिङ्ग्य विविधं विलपन्ति नरकावरोधनानि पश्यन् गरुडगरुत्पवनकम्पितभवनपताकालतावनम् प्राग्ज्योतिषं त्रिभुवनलक्ष्मीनिवासभूतं क्वचिदनुनादितमन्दुरोदरेण हर्षहेषितेन भर्त्सयतामिवोपरि हरतो हरिदश्वरथतुरङ्गान् अमरसमररङ्गायातगन्धर्वमिथुनाभिवृष्टसुरतरुकुसुमगन्धवासितस्कन्धकेसरभृताम् उरुतरखरशिखराहतिमूर्छितामुर्वीं वीजयतामिव वालव्यजनानिलेन वाजिनाम्, स्ववग्रहैरेकत्र शालागतैः[203] गरिमारचितगम्भीरगर्जितध्वनिभिरपहसद्भिरिव दिङ्नागदन्तमुसलक्षतानकिंचित्करान् कुलशिखरिणः क्षणमनादृतमृणालकवलग्रहैर्मदमुकुलितदृष्टिभिः ध्यायद्भिरिव मानसविहारसौख्यानि ब्रह्मस्तम्भभञ्जनायेव शुण्डादण्डानुदस्यद्भिः अभ्रपटलपरिणमनकेलिलग्नविद्युद्वलयानुकारिकनककटकघटितकोटिभिः कोटिसंख्यैः करिभिः[204], अन्यत्र वासवबलरक्तासवपानदुर्ललितैः असुरयशःकेतकोन्मेषविद्युदुद्योतैः खण्डितकालदण्डचण्डिमभिः निराकृतकृतान्तपाशैः मृत्युदंष्ट्रापमृत्युभिरायुधैः क्वचिदैरावतरदनरचितपादेन पादपीठखचितशेषफणारत्नरश्मिपुञ्जीरञ्जितपुरोभागेन महता सिंहासनेन, अपरत्र मकरलक्ष्मणा क्षीरोदपूरेणेव छत्रतामुपगतेन

---

202. See page 123, line 12.

203. The expressions in Instrumental plural are adjectives to *karibhiḥ*.

204. The expressions in Instrumental (like *karibhiḥ*, *āyudhaiḥ*, *siṃhāsanena*, *candramasā*, *śāradābhreṇa*, *puṇḍarīkeṇa*) are to be construed, it seems, with a missing portion, which may be tentatively supplied in the context, thus: *nivedyamānasamṛddhisambhṛtam* (*puram*.) See also Note 205.

तपनातपवारणानभिज्ञेन चन्द्रमसा सान्द्रच्छायारहितेन शारदाभ्रेण असोढहिमवर्षेण च पुण्डरीकेण [निवेद्यमानसमृद्धिसंभृतम्[205] विलोक्य किंचित् प्राग्ज्योतिषं क्रमेण] हठहृतकुमारिकाहस्तोत्सृष्टपिष्टातकाश्मीरकरजःपिशङ्गनिर्मोकभुजङ्गकन्यकालोकम् क्वचित् मुखनिहितखरखलीनाकृष्टतुरगमुखीहासितपुलोमजासखीवर्गम् क्वचित् प्रदेशे शक्र [कीर्तिवर्णनविलस-]द्गानगोष्ठीहृष्टविश्वावसुविलासिनीपारितोषिकापदेश-दत्तकञ्चुलिकामोचनविलज्जमानकिंपुरुषयोषिज्जनम्[206] क्वचिदानन्दनृत्तविश्लथदिव्यर्षिजटाकर्षणनिरतशम्भलीनिवारणव्यग्रवेत्रिशतम् अशेषवैमानिकवर्ण्यमान-निजपौरुषं पुरं[207] प्राविशत् ।

पुरन्दरस्तु सत्वरागतनारदमुखादाकर्ण्य तमायान्तं भवनान्निर्गत्य तत्काल-सेवागतवृन्दारकवृन्दपरिवृतो मातलिकल्प्यमानमप्रतिपाल्य स्यन्दनम् , अप्रतीक्ष्य ससंभ्रममाधोरणानीयमानमैरावतम्-अनारुह्य परिवर्धकप्रदर्शितमुच्चैःश्रवसम् उत्सारितमणिकङ्कणमुत्तरीयांशुकच्छन्नमवलम्ब्य चित्रसेनकरं चामरच्छत्रताम्बूलकरङ्क-भृङ्गारकलशिकामुकुरधारिणा परिजनेनानुगम्यमानः पौराञ्जलिमुकुलजालदन्तुरे राजवर्त्मनि पद्भ्यामेव प्रत्युज्जगाम ।

---

205. Some portion seems to be missing here, though there is no indication in the MSS. In this context, the *Bhāgavata* has (*dattvābhayaṃ*) *bhaumagṛhaṃ prāviśat sakalarddhimat*; (X. 59. verse 32). On this basis, I surmised the expression *nivedyamānasamṛddhisaṃbhṛtam*, occurring in the context. See also Note 204.

206. The *kiṃpuruṣas* are demi-gods, said to have human head and the body of a horse. On the occasion of singing the glories of Indra by *Kiṃpuruṣayoṣits*, some *kañculikās* (bodice) seem to have been presented to them as gifts for their fine performance. But as the *kañculikās* are not suitable for them (because of the horse-body) they felt very awkward (*vilajjamāna*) at that time. This seems to be the significance intended.

207. *pura* is here the Animiṣapura.

मुररिपुरपि गरुडात् संकोचितैकपक्षपुटादवतीर्य मणिकुण्डलघृष्टधरणितलं प्रणमन्तमाखण्डलमुत्थाप्य नरकासुरजर्जरकनकपत्रमकरकोटिकटकभृता भुजगराजायामभाजा भुजयुगेन गाढं परिषस्वजे। अपहृत्य च मकुटतटघटितकरपुटम् अभिजातभुजापदाननुतिमुखरमुखं मखभुगधिभुवम् अनुयुज्य कुशलम् आरोह गन्धकुञ्जरम् इत्यादिशन्नारुरोह विहगपतिम्। आरुह्य जयन्तधृतमङ्गलच्छत्रो मतङ्गजस्कन्धलग्नेन मरुत्वता सविधगेन सनामग्राहं प्रदर्शितान् अहमहमिकया नमतस्त्रिदशान् प्रसादसरूया दृशा निशामयन् उभयतश्च निशमयन् प्रासादशृङ्गभाजः प्रमदाजनस्य सत्यभामासौभाग्यवर्णनप्रायमालापं पौरकृतलाजवर्षभाजमतिचक्राम राजपथम्। ततो दयितया सह तोरणभुवि सुपर्णतोऽवतीर्णमिमम् ऐरावतकृतावतारो वृत्ररिपुर्वेत्रशतोत्सारितजनसंमर्देन कक्ष्यान्तरस्थापितसेवकजनवर्त्मना स्वभवनं प्रावेशयत्।

तत्र च पुण्डरीकलोचनः क्वचित् मणिमण्डपमध्यमण्डनम् किमपि भद्रपीठमधितिष्ठन्तीम् अहिमकरमूर्तिमरीचिजन्ममान्यां मधुलक्ष्मीमिव सकलसुमनोजननीं भागीरथीमिव महामुनिसेविताम् शरदमिव विमलाप्सरस्सहस्रसंस्तुताम् अग्रतः स्थिताय नरकाहवशंसिने नारदाय नन्दनवनदेवतोपहृतं कल्पतरुवल्कलद्वयं ददतीम् अयि सहजन्ये सह सखीभिः सन्निधे विधेहि सर्वतोभद्रमासनं बलभद्रानुजन्मने। रम्भे सुवर्णकुम्भेनानय पादावसेचनजलम्। घृताचि समुपाहराचिरेण हरिचन्दनाङ्गरागम्। मेनके शीधुपानलम्पटषट्पदकानि स्थापय पार्श्वभुवि सन्तान कुसुमदामानि। चित्रसेने विचित्राणि पटलकेषु प्रसारय मन्दारदुकूलपटलानि। प्रम्लोचे विरचय पुरतो भूयिष्ठरोचींषि भूषणानि। तारे गृहाण तालवृन्तम्। उर्वशि शर्वरीशशकलशङ्काकरकर्पूरवर्तिकाभाञ्जि सज्जीकुरु विजयारार्तिकहेमपात्राणीति सुरवारविलासिनीरादिशन्तीम् अदितिमुपसृत्य भामया सप्रश्रयं प्राणंसीत्।

सा तु ससंभ्रममासनादुत्थाय प्रस्नुतस्तनयुगप्लुतं पयः प्रतिकलं पतन्तीभिः प्रमदाश्रुबिन्दुसंततिभिर्द्विगुणयन्ती उपहृत[२०४]कुण्डलद्वितयमुपेन्द्रमालिङ्ग्य नरका-

हवमिलितसिद्धमिथुनाभिवृष्टसुरतरुकुसुमसुरभिमणौ मूर्धन्याघ्राय सविधभाजि भद्रासने निवेशयामास। तां च कृतप्रणामां परिष्वज्य वधूम् अयि सौभाग्या[209]तिशयलब्धपारिजातोपभोगा शचीव नमुचिद्विषो यदुभर्तुरर्धासनभागिनी भवेत्युदीरिताशीरनिच्छन्तीमपि बलादुत्सङ्गे तां निवेश्य तस्याः सरसिजधूलिधूसरान् अभ्रगङ्गानिलविलुलितान् अलकान्नियमयन्ती क्षणमात्रमासांचक्रे। मुररिपुरपि परिगृहीतार्घ्यादिसत्कृतिरमरपतिमग्रतः प्रसारितेन शार्ङ्गगुणघातरेखाशताङ्कितप्रकोष्ठेन करेण कुलिशग्रहणातिकर्कशे पाणावाकृष्टमर्धासनाध्यासीनमाततान।

अदितिस्तु दितिसुतारातिमिदमवादीत्। वत्स नरकासुरनिधनावसानवेलायां भुवनप्रसादकृति भवतः कीर्तिशरदि जृम्भमाणायां पलायिताः क्वचित् चिररात्राय गतभियो हंसा इव महर्षयो निजवासस्थानानि यथापुरं प्रतिनिवर्तन्ते। अद्य खलु माद्यति निरन्तरोद्भिद्यमानदानपङ्कमृगमदालंकृतकपोलभागश्चिरादैरावतो नागः। सम्प्रति प्रतीच्छन्ति मन्दहाससंवत्तिमासवामोदसुरभीणि वासवपुरवारसुन्दरीमुखारविन्दानि। बध्नन्ति सख्यमधुना विकासेन निर्यदानन्दसलिलमकरन्दानि पुरन्दरस्य चक्षुरिन्दीवराण्यनिमिषाणि। मधुमदानीयमानसरसोदयरागडम्बरं चुम्बति कामपि रुचिं शचीवदनशशिबिम्बम्। इति वदन्तीमिमां यदुपतिः अयि विबुधजननि तावकेन प्रसादलवेन मम समजनि दनुजविजयसंपदित्यवदत्। दाक्षायणी तु पुनरपि पुण्डरीकाक्षमाचचक्षे। भद्र न केवलमियमेव। भाविनि शोणितपुराहवे भक्तवत्सलतया सगणेनागतेन भगवता पुरारिणा त्रिशूलधारिणापि रक्ष्यमाणस्य बाणस्य बाहुदण्डतरुषण्डखण्डनः सुदर्शनस्ते लघयिष्यति कार्तवीर्यभुजङ्गविभङ्गवर्यभार्गवीयस्य परशोरपदानं

---

208. The *kuṇḍalas* were stolen or taken away by force by Narakāsura previously. They are now recovered and restored to Aditi by Kṛṣṇa. See page 100 line second from bottom.

209. Though this expression here is connected with *śacīva*, or is intended to convey the desire of Aditi, yet it seems to hint at the subsequent acquisition of Pārijāta by Satyabhāmā,

भारं च भूतधात्र्याः[210] । तदधुना गगनाध्ववहनायासविधुरां वधूमिमां नन्दनारण्यसीमासु हरिचन्दनामोदिना मारुतेनापनीतश्रमां विधाय मामिव देवकीमपि भवदाननशशिदर्शनमुदितविलोचनचकोरयुगां विधेहि इति ।

मधुरिपुरपि तथेति कृतादरः प्रणतः प्रणयिन्या सह निर्गतो भवनाद् अनुसरन्तं निवर्त्य मघवन्तममर्त्यपरिवारम् आरूढखगपरिवृढः परितश्च शृङ्खलितैर्गम्भीरगर्जितध्वनिभिर्जलदैर्द्विरदैश्च मुखरशालाशताद्[211] अभङ्गसङ्गीतमृदङ्गरवभरितगर्भैरुच्छ्रायहसितपुरहरशिखरिशिरोभिर्विमानैर्निकेतनैश्च सङ्कुलाभोगाद् असितागुरुधूपवासितदुकूलधारिणीभिः सहस्रसंख्याभिरप्सरोभिः पताकाभिश्च परिष्क्रियमाणहर्म्यनिकराद् अनिमिषनगरान्निर्गत्य माधुर्यतुष्टसकलनयनमधुकरपटलां मधुधारामिव निजचरणपङ्कजस्य समीरणतरङ्गितां मण्डनचामरिकामिव हिमवदैरावतस्य जगत्त्रयव्यापिनीं कीर्तिमिव भगीरथस्य विबुधसरितं विलोकयन् नन्दनाभिमुखमगमत् ।

अथ[212] सततम् ऋतुभिरविरहितम् अविरलसरलतिलकपनसलिकुचनिचुलनिचुलितगगनम् अभिनवयवसकवलमुदितसुरभिखुरपुटमृदितपरिसरम् अतिचटुलदवदहनमतिसभयसमुपसृतघनसलिलपरिहृतविटपिगतभुजगफणमणिकिरण-

---

210. Like Kārtavīryārjuna, Bāṇāsura also is said to have had one thousand arms. Kārtavīrya was vanquished by Paraśurāma. Bāṇāsura received a crushing blow at the hands of Kṛṣṇa, though S'iva was supporting the *asura*. Only four arms were allowed to remain by Kṛṣṇa, at the request of Śiva whose devotee the *asura* was. Other arms were cut off. This passage is a reference to this story. See the *Bhāgavata* X. 63. for the *Bāṇāsuravṛttānta*.

211. The expressions in Ablative case are adjectives to *animiṣa-nagarāt*, occurring later.

212. This entire passage contains only short syllables. See the Introduction.

पटलम् अतिचपलहरिदिभकरधृतकनककलशमुखगलितसुरसरिदुदकभरभजनतरुण-
धरणिरुहम् उपरिरतनिरतधनदपुरसुतनुगलरवगुणितकलरवम् कलकलमुखरकदल-
गहनम् अहरहरमरपतिकुलयुवतिकरनखभृतकुसुमफलजननकुरवकम् अलिकुल-
कलहचपलसुरतरुविटपनिचयपवनशिशिरम् उपवनमभजत ।

तत्र चाश्चर्यजनकेन[213] कनकलतामेनकाचरणयावककङ्केलिपादपेन तिलोत्तमाविलोकनस्मेरतिलकतरुणा[214] तरुणिमगर्ववशीकृतोर्वशीवदनशीधुवासित-वकुलभूरुहेण रम्भापरिरम्भादरकोरकितकुरवकशाखिना सुरतखिन्नकिन्नरमिथुन-सनाथपुन्नागलतानिकुञ्जेन साध्यावरोधवनिताध्यासितस्थलनलिनधूलिपुलिनेन विद्याधरीगीतगर्भचम्पकोद्यानचारुणा चारणीचरणलाक्षारुणीकृतशशिमणिशिलातलेन लताडोलाधिरूढगन्धर्वकुमारिकाभिनन्दितवासन्तिकगन्धवाहेन सिद्धपथिकापीतबाल-वीरुदालवालपाथसा पथा किंचिदन्तरमतिक्रम्य दरकुञ्चितपक्षतिना खगपतिना मन्दगतिना संचरमाणः क्वचित् मज्जनचटुलशचीकुचतटाहतिपराचीनवीचीनि[215] मरतकमयकमलिनीपलाशकान्तिशैवलितमणिसोपानपर्वाणि मधुपानमिलितविधि-विमानहंसकुलकलहकदर्थनासहकनककमलकाननानि केलिसरांसि कटाक्षयन् क्वचित् कुङ्कुमपङ्कमयधातुद्रवार्द्रदृषदो नीलोपलांशुपालीकृतालीकनीरदव्यतिकरान् गण्डोदकनिर्झरभृतः कृत्रिमगिरीन् निरीक्षमाणः क्वचिद् अङ्गरागचित्र........ ....पत्रललिततमानि नालिकेरासवामोदिचामीकरकदलीदलचषकमण्डनान्या-खण्डलोपभुक्तानि लतामण्डपानि पश्यन् दयितायाः कदाचित् निश्वासपरिमला-कृष्टमधुकराभिभूतिजातभीतेरयत्नलब्धमङ्कपालिसुखमनुभवन् कदाचिदवतंसकुसुम-

---

213. The expressions in Instrumental are construed with *pathā* *(kiṃcidantaram atikramya)*.

214. Some of these expressions contain the ideas of *kavisamayas* noted in the verse *strīṇāṃ sparśāt* etc. See Note 178.

215. The expressions in Accusative plural (like...*vīcīni*) are construed with *kelisarāṃsi (kaṭākṣayan)*.

मपचेतुमवलम्बितचूतशाखाया मन्मथसर्वस्वभूतम् अन्तिकालक्ष्यदन्तक्षतं बाहुमूलमवलोकयन् कदाचिदावर्जितमाधवीकुसुमपतितमधुरसलवमार्जनव्याजादङ्कुरितपुलकमुकुलं कुचकलशयुगलम् अविरलघर्मोदबिन्दुसेकमृदुलनखाङ्गुलिदलेन पाणिना परिमृशन् कदाचिद् ईषदिव दूषितापाङ्गकर्णपूरशिरीषकेसरापनयननिपुणवदनपवनाविष्करणमिषेण नयनाम्बुरुहं मुहुर्मुहुश्चुम्बन् मन्दानिलचलितमन्दारदुकूलपल्लवप्रमृष्टसन्तानकुसुमरजसि हरिचन्दनमकरन्दस्यन्दसेकसुरभौ कल्पभूरुहतले विहरन् कमलेक्षणः कतिचन क्षणाननयत् ।

अदूरे च दयितायै दिविषदभिनन्दितेन कुसुमगन्धेन यशसा च दिङ्मुखान्यश्नुवानम् कुसुमितशाखावलम्बिनीभिर्लताभिरुद्यानपालिकाभिश्च परिवृतम् मत्सरश्रवणधारणार्हेण पल्लवप्रकारेण गुणगणेन च श्लाघ्यजन्मानम् अभिमतफललाभलोभलुलितैरर्थिभिः पत्रिभिश्चाकुलाभ्यर्णम् अमलमुक्ताफलमञ्जरीमरीचिपुञ्जमध्यगतम् अद्यापि दुग्धोदधिगर्भवर्तिनमिव दृश्यमानम् अनिलोच्चलितविटपितया समुत्पतन्तमिव व्रह्मस्तम्बमधः कर्तुम् आलवालाम्बुबिम्बिताकारतया प्रतीतजम्बूजयार्थमवतरन्तमिव धरणीतलम् उदीरितभ्रमररवमन्त्रम् अभितःप्रसूनधूलिम् अनिभृतमन्दपरभृतकुलकेलिविधुताम् लतावधूमोहनमुष्टिचूर्णमिव विकिरन्तम् आलोलदुकूलपल्लवाभिस्त्यागध्वजलताभिरिवोच्छ्रिताभिः अग्रशाखाभिरावर्जितपक्वफलरसस्रुतिभिरभिषिच्यमानमिव सर्वद्रुमसाम्राज्ये पर्यन्तविलम्बमानमुक्ताजालं मङ्गलातपत्रमिव नन्दनदेवतायाः प्रकीर्णपुष्पोपहारचारुतलम् आस्थानमण्टपमिव मधुश्रियः कुसुमसुरभिमधुरसामृतगुञ्जागृहमिव मधुलिहाम् अभिलषितकुसुमदामदायिनं मालाकारमिव पुलोमजायाः वितीर्णविविधांशुकाभरणं भौरिकमिव सुरभर्तुः अप्रकम्प्यमूलबलं चक्रवर्तिनमिव सकलपादपानाम् पारिजातमदर्शयत् । अवोचच्च ताम् । अयमपि पुरा सुरासुरमथितजलधिजातः सुधासुरभिसुधांशुसोदरः पारिजात इति जगति विख्यातः क्षितिरुहामधिपतिः । प्रतिदिवसममृतगन्धिभिरमुष्य सुमनोभिः प्रसाधयति शचीं प्राचीनबर्हिरिति ।

सत्यभामा तु सप्रणयमारचिताञ्जलिर्व्यजिज्ञपत् । नाथ संगृहीतसकलभुवनरत्नजातेन भवता सुजातकुसुमामोदमिदमपि पादपरत्नं यादवीं राजधानीमानीयताम् । तत्र च भूषितमदीयभवनोपवनभुवो नवोन्मेषसुरभिभिः कुसुमैरस्य त्वया ग्रथितां धारयन्ती स्रजम् ईर्ष्याकुलमखिलमपि सपत्नीकुलं धारयिष्यामि रुजम् इति ।

कमलनयनस्तु तत्प्रणयभङ्गकातरमनादिविषदभिलषितदानदीक्षितेन दिव्याभरणधारिणा हस्तेन दक्षिणेन स्पर्धयेवोद्धृतमुर्वीरुहसार्वभौममुपरि दर्वीकरद्विषो निदधे । दयितायाश्च चेतसि प्रमदम् । ह्रियमाणे च तस्मिन् तत्पूर्वविरहकातरैरनुरुद्ध्यमान इव पवनानमितशिरोभिश्चतुर्भिरपि हरिचन्दनादिभिस्तरुभिः निरुद्ध्यमान इव विटपासक्तोत्तरीयपल्लवो वल्लरीभिः अमर्षादवबद्धहुंकारैरलिभिरभिमुखापतितैः आकुलीक्रियमाणदयितालकलताजालः कुपितैरिव पुलकितैर्वकुलैरविरलप्रसवपांसुवृष्टिभिः आच्छाद्यमाननयनपथः कुन्दमुचुकुन्दकुसुममकरन्दवर्षमिषात् मुञ्चत इवाश्रु नन्दनान्निरगात् ।

निर्गतं च तम् उपवनपालिकाः पुष्पकरण्डकमण्डितस्कन्धाः कुसुमरसपङ्किलतलैः पाणिभिरवलम्बितवल्गत्कुचभरमनुद्रुत्य सरभसं जगदुः । यदुत सकलसुरमकुटमणिमयूखजालबालसखचरणनखकिरणनिकरेण मखशतावभृथाप्लुतपूतवपुषा पुरुहूतेन समम् अनुभूतभुवनत्रयाधिपत्यपट्टाभिषेकायाः शचीदेव्याः परिग्रहोऽयं महान् महीरुहप्राग्रहरः पारिजात इति तदाज्ञयामुष्य पुष्यन्मदनिष्यन्दः पुरन्दरगन्धकुञ्जरोपि स्कन्धे त्वगुद्वासभिया न स्वप्नेऽपि करोति गण्डकण्डूयनम्। नन्दनवनदेवतापि सदयं नखशिखाभिर्लुनाति कर्णपूराय पल्लवम् । इन्दिन्दिरबृन्दमपि बिभेति कुसुमगन्धमाघ्रातुम् । मन्दमरुतापि मन्यते मकरन्दबिन्दुहरणेन सापराधमात्मानम् । तत् न साम्प्रतमशेषदिविषद्वन्द्योरस्य तरोरपहरणम्। अप्यसौ पुरा सुधाहर्ता न जानाति विनतायाः नन्दनस्त्रिभुवनभुजो वज्रपाणेर्भुजोष्माणम् इति ।

सत्यभामा तु किंचिदिव रोषस्मिताञ्चिताधरकिसलया स्तनदुकूलपल्लवमं-सश्लथं यथाप्रदेशं निवेशयन्ती नूतनचूतमधुपानकषायकण्ठकलकण्ठगामिना गद्गदालापसुहृदा स्वरेण का नाम शची को वा देवाधिपोऽपि लक्ष्मीसुधा-हरिणलक्ष्मवदखिललोकसाधारणस्य पारिजातस्य शाखिनः। किं च मद्वचना-दित्थमुच्यतां शची। यदि त्वं मरुत्वतः प्रियतमा स च ते वशंवदश्चेत् मयामुना यदुवरेण हार्यमाणममरद्रुमवर्यमिमं झटिति सज्जनिर्जरबलान्वितेन वज्रिणा तेन वारयतु भवती इत्यभिधाय ता विसर्जयामास।

ताश्च गत्वा यथावृत्तमग्रतो वृत्रद्विषः पुलोमपुत्र्यै निवेदयामासुः। जम्भदमनस्तु जृम्भमाणेन मन्युना माञ्जिष्ठैः सहस्रशस्तक्षणस्फुटितैः शस्त्रव्रणैरिवा-स्रस्राविभिरीक्षणैर्भीषणाकृतिः अयि सम्प्रति समिति सत्यभामाया विजित्य भर्तारं प्रत्याहरामि पारिजातम् इत्यभिहितया प्रोत्साहितः शच्या सत्वरमासना-दुत्थाय पर्यङ्कभ्रष्टं चरणलग्नमुत्तरीयांशुकं क्षिपन् कोपकम्पतरलेषु चक्रप्रभाचकि-तेष्विवावयवेषु वारवाणमामुञ्चन्नन्तरितपरिजनोदितजयशब्दमाकर्णयन् निर्घात-घोरमनीकसंनाहकलकलं च तोरणभुवि संनाह्यमानमाधोरणसंज्ञानिकुञ्चिताग्रचर-णमारुह्य वारणपतिं प्रावर्तत प्रस्थातुम्।

अनन्तरमतर्किताायातसमरदरसंभ्रान्तैरार्तैरयथोपनीतहेतिभिरदत्तपर्याण-तुरगारूढैः प्रतिवीथि निष्पतद्भिः क देवः क देव इति पृच्छद्भिः अप्रति-पालितपरस्परैः मद्वाजिनः पुरस्तात् क याति भुजगारातिः। द्वारवतीमपि नीतममरतरुमानयामि इति कृतप्रतिज्ञापालैरिवाश्ववारैरधिष्ठिताग्रभागानि गमनरय-शिथिलसुभटकण्ठसुमदामपांसुवृष्टिगहनानि रथकेतुयष्टिदर्शिताकाण्डतटिद्दण्डताण्ड-वानि संघट्टभ्रष्टकरिकुम्भनक्षत्रमालानि दर्पोद्धतशूर्पश्रुतिशुण्डाशूत्कारचण्डानिल-चलितकदलिकाषण्डानि मिथः संमर्दवित्रुटितवीरभूषणशिलावर्षभीषणानि निर्जर-बलानि निर्जग्मुः। सप्तापि लोकपालाः दिग्भ्यः सत्वरमागता युगविगम इव विबुधगिरिमुदधयश्चलितजलसलिलपूराः सुरवर्यं पर्यवारयन्। शौरिस्तु सुरशोणित-

पानकौतुकिभिरहमहमिकयायातैः सुदर्शनप्रभृतिभिः प्रहरणैः प्रसाधिताभ्यर्णः शार्ङ्गमधिज्यमाकर्णमाकर्षयन् विविधायुधवर्षमुचो विबुधान[-ायु-]धसेनयाभिदुद्राव ।

अनन्तरमहंयुशार्ङ्गटङ्कारभिन्नाहंकारविबुधमातङ्गम् उद्रिक्तदर्परुद्रप्रहितशूलमुखानलशिखाजालदूनशरदुर्दिनान्धकारम् गन्धर्वपरशुच्छिन्नपन्नगरिपुकन्धरारोमसूत्रितानभ्रविद्युदुद्योतविभ्रमम् अदभ्रकौमोदकी....[-रण-]हृतनलकूबरालोककुपितकुबेरमुक्तगदापातचकितक्लृप्तापसारचारणभटम् उद्भटमयूखमतिकरदिनकरबाणसहस्ररुद्धदिक्चक्रम् इषुविद्धतुषाररोचिरलिकसिराविगलदमृतशीकरासारसिक्तजीवत्प्रमीतरथतुरगम् उरुगरुडनखमुखाहतहुतवहावयवनिस्सृतकीलानुकारिकीलालम् अतिपरुषपाञ्चजन्यनिर्घोषमुषितकिंपुरुषपौरुषम् सुदर्शनस्पर्शविह्वलजयन्ताश्वासनायस्यदप्सरोवर्गम् अनर्गलप्रसरपृषत्कपक्षपवनघूयमानपृषदश्ववृषद्वर्षम् अमर्षदुर्विषहयममहिषविषाणकोणकर्षणोत्तेजितवैनतेयपत्रपुटम् उरस्तटविसोढनन्दकप्रहारयातुधानवर्धितानन्दनारदम् उच्चण्डसुपर्णतुण्डखण्डितवरुणपाशम् फणिफणामणिखणत्कारदारुणं प्रवर्तयामास किमपि रणम् ।

तदनु निशितबाणवृष्टिनिर्वाणतेजस्सु विद्राणेषु [लोकपालेषु], रुधिरसिन्धुगर्भमवगाहमाने भयकम्प्रे वेधसि,[216] जयशिथिलजटाभारगलितसुरसरित्स्रोतस्सु पलायमानेषु सलाघवमुज्झितमानमुद्रेषु रुद्रेषु, निजमनुशोचति निर्गतसुरभ्रमदभ्रशस्त्रक्षतजातरुजि हुतभुजि, गिरिनिर्झरशङ्कया करिकर्णचामरश्रेणिमुपसर्पत्सु समिदङ्गणभ्रमणसुलभोदन्येषु चित्रसेनसैन्येषु, तृणमिति कबलयति विरथतुरगकेसराणि जिजीविषति मरुति, परिजनमनुधावन्तमात्मदिङ्मार्गमनुकलं पृच्छति भयभ्रान्ते कृतान्ते, संभ्रमभ्रष्टहरिणगवेषणपरे हतकरटिघनघटासु तिरोहिताकृतौ रजनिपतौ, विबुधपतिः प्रजविनैरावतेन नीलनीरदनिचोलकाकृष्टं रोहितधनुरधिज्यमातन्वानः शार्ङ्गधन्वानमद्रवत् ।

---

216. MSS read *bhayakampracetasi*.

उभौ च तौ निजदयिताकांक्षितपारिजातहरणकौतुकिनौ कमलाक्षसहस्राक्षौ अविरतवलयितधनुरुदरनिस्सृतैरञ्जनस्निग्धमेचकजालै[217]रपाङ्गैरिव समरदेवतायाः स्फुरदुरुगरुन्मरुद्भिः क्रीडाविहङ्गैरिव वीरलक्ष्म्याः दैतेयप्राणपवनदोहलिभिर्भुजङ्गैरिव गगनवल्मीकस्य दनुसुतकबन्धनर्तनाचार्यैः परिचितसङ्गरङ्गैर्निशिचरबलशस्त्रोपलतुषारवर्षैरशेषकम्पकारिभिरुच्छिन्नरिपुकुन्तकान्तारदावदहनज्वालैः अलघुज्योतिस्स्फुलिङ्गदुष्प्रेक्ष्यैरिषुभिः आच्छादितदिक्चक्रं समरमतिमहच्चक्रतुः ।

तदाच नगरिपुनागपुङ्गवयोः मेरुकैलाससन्निभयोरुभयोरपि[218]गरुत्पटास्फोटनस्फुटितकरटस्रुतमदरुधिरद्रढिमारचितानुभूयमानमृगमदसंभिन्नघुसृणरससेकविभवम्[219]पृथुदशनमुसलघट्टितोरःस्थलोदीर्णदहनस्फुलिङ्गखद्योतिताभ्यर्णम्[218]अतिनिशितनखकुलिशकोटिपाटितकुम्भकूटोच्चलितमौक्तिकतारकित सत्यभामामुखेन्दुपर्यन्तम्[218]उदस्तहस्ताहतिदलितपक्षतिक्षोदकडाररोदःकटाहक्रोडम्[218]अनघनखपुटामोटनप्रकीर्णकर्णतालशकलदर्शिताकालशारदजलदलवशारहरिदन्तव्यतिकरम् - अदृष्टचरमतिशयितपरस्परम्[220] समरममरयोषितो ददृशुः ।

शक्रस्तु विक्रामता तेन विष्टरश्रवसा मनोरथेन सह नीते वैवन्ध्यमिषुजाते, साकमहंकारभाषितैर्वितथीकृतेषु सर्वास्त्रेषु, समरोत्साहेन समं छिन्ने शरासनगणे, सकलगिरिपङ्गुभावकरम् असुरकुलहृदयशङ्कुमग्रहीदस्त्रम् । वसुदेवनन्दनोऽपि नन्दकत्सरुकिणाङ्केन शार्ङ्गगुणाकृष्टिकर्कशाङ्गुलिना करेण नरकासुरकण्ठशोणिता-

---

217. The expressions in Instrumental (like *añjana...jālaiḥ* etc,) are construed with *iṣubhiḥ*.

218. In this passage the three long expressions, beginning with *garutpaṭa—*, *atiniśita—*, and *anaghanakha—*, describe the performance of Garutmān in the battle with Airāvata.

219. The two long expressions, beginning with *pṛthudaśana—*, and *udastahasta—*, describe the performance of Airāvata in the battle with Garutmān.

220. MSS read *atiśayitayuvarasamaram*. *atiśayitaparasparam* is only my guess.

रुणघोरमायुधमाजहार। तदा च वज्रचक्रधारिणाविन्द्रोपेन्द्रावुद्वीक्ष्य सन्त्रस्तेष्वलमलमस्त्रप्रयोगेणेति वदत्सु वैमानिकेषु भयतरलहृदयनिहितकरतलासु हाहेति व्याहरन्तीष्वप्सरस्सु मुहुर्मुहुरुदस्तमुखमब्रह्मण्यं ब्रुवाणे दिव्यर्षिगणे सकलानि चकम्पिरे चराचराणि भूतानि। ततः सत्वरममर्षदष्टाधरोष्ठपुटो लक्ष्यीकृत्य लक्ष्मीनिवाससद्म कौस्तुभस्तबकितमुरस्स्थलम् अमररिपोरशनिमुत्ससर्ज निर्जराधीशः। यदुपतिस्तु संहृतनिजास्त्रवर्यो दूरादेवाञ्चन्तं तम् अहतः प्रतीयमाणतेजःकणकिरणकिञ्जल्कपुञ्जपिञ्जरितदिङ्निकुञ्जं शतपत्रमिवाजहार शतकोटिम्। सत्यभामा तु स्मितलवलाञ्छितमुखकमला पलायनोद्यतं बलारातिमाबभाषे। त्रिदिवपते न खलु ते सदृशं शचीभर्तुः कान्दिशीकतां स्वीकर्तुम्। कथमधुना समरतलात् पलायितं त्वाम् ऐरावतमिवाभ्रमुः शची पतिवर्यं क्षतावयवमवलोकयिष्यति वज्रशून्यकरम्। त्वमपि कथं द्रक्ष्यसि ताम् अपारिजातामपाकृतच्छायामपरामिव नन्दनारामभुवम्। तदलं व्रीडेन। गृह्यतामसौ। स्वगृहमागतां भर्तृमाहात्म्यगर्विता मामनादृतवतीति हारितः पारिजात इति।

सुत्रामा तु तद्वचः श्रुत्वा सत्यभामां प्रावोचत्। अयि मधुरिपुपत्नि क्षम्यताम् चिराय तव सख्या मधुमदमूढधिया कृतोऽयमपराधः। न च मे मनसि व्रीडा जगदुपकृतये गृहीतमर्त्यरूपेण पुंसा पुराणेन पराजितस्य। प्रभवन्ति खलु नियतदुर्नीतिभाजनं जनं विधेयं [कर्तुम्] प्रभवः। तदयं तावदमरतरुस्तव भवनोपवनसविधमधिवसतु। यावदसौ यादवाधिपतिर्द्वारवतीं पुरं परिष्करोतीति। मधुरिपुरपि कुलिशार्पणतोषितमापृच्छ्य वृत्रहणम् ऐरावतरुधिरारुणचरणेन महता पत्ररथेन विलङ्घितवियत्पथः चिरकालायातपारिजातपरिरम्भणायेव दूरप्रसारितोदारतरङ्गबाहुमम्बुराशिमिवालोकयन्नापूरितपाञ्चजन्यप्रतिस्वनापूर्यमाणहर्म्योदरं पुरं प्राविशत्। तत्र च निष्कुटभुवि सत्यभामया निखातः सुरतरुरिव पुरोभवनं भृङ्गमालानामिवाङ्गनाजनदृशामेकलक्ष्यतामगमत्।

तदनु नरकनगरानीतानि कन्यकासहस्राणि जलधिरिव सरित्कुलानि विधिवदुपयेमे। स खलु यौवनप्रौढगाढदर्पभरः सन्ततमन्तःपुरनारीणामरीणीं च

बाहुलतया श्रृङ्गारवीररससुलभानि सुखान्यनुभवितुकामः कदाचित् [221]मदचपल-शकुनिकुलशकलितसरससहकारकिसलयानुरक्तमत्तकलकण्ठखण्डितरत्नाशोक - मञ्जरीषु प्रमदवाटिकासु प्रमदाजनेन कुसुमान्यपचिन्वन् [222]कदाचिदतिचटुल-विशिखदलितप्रशस्तराजन्यहस्तासु अभीरुभारुण्डलुण्ठितसुभटपिशितचण्डासु रिपुपताकिनीषु शूरशिरश्छेदमादधानः [221]कदाचित् काञ्चनशृङ्गप्रेरितकुङ्कुमजलधाराहति-कूणितापाङ्गाभिरङ्गनाभिः सह समन्तादुत्तरत्तरङ्गपटलम् अपविद्धपङ्कजवनम् उद्धूतमृणालदण्डम् विदलितकुवलयजातम् विद्रुतमरालयूथम् अखिलमपि जल-क्रीडया केलिसरस्सलिलमालोडयन् [222]कदाचिद् अतिकरालशस्त्रव्रणोदीर्णरुधिरवृष्टि-रुद्धदृष्टिपथैर्वृष्णिकुमारसहस्रैः सार्धमुत्पथप्रधावितुरगघट्टम् अवपातितातपत्रशतम् उन्मूलितकरिविषाणपरिघम् शकलितशस्त्रनिकायम् प्रचलायितभूमिपालकुलम् अहितबलम् क्रमेण विक्षोभयन् [221]कदाचिद् विचकिलमुकुलोपहारचारुषु पान-भूमिषु मदिरां मणिशुक्तिभिर्मदिरेक्षणाजनं रसयन् [222]कदाचित् निशितशरनिकृत्त-करिकुम्भमौक्तिकप्रोतशबलासु समरस्थलीषु प्रतिनवमस्रम् अजस्रं नृकरोटिभिर्निशा-टीकुलं पाययन् [221]कदाचिद् विभ्रष्टहारपारिहार्येषु शयनेषु रतिकेलिखेदशयिताः शिशिरपादालंकृतावयवा मृदिताङ्गरागचर्चा मृगेक्षणा वीक्षमाणः [222]कदाचित पाशचक्रार्चितेषु शरतल्पेषु रणविहरणश्रान्तिपातितान् अमित्रायुधक्षतपरिष्कृत-सर्वगात्रान् विलुण्ठनविलुलितलोहितास्रफेनभृतः प्रतियोधान् विलोकयन् [221]कदा-चिद् विश्वकर्मनिर्मितेषु निर्भरमुरजरवभरितगर्भेषु नृत्तागारेषु वरवर्णिनीलास्यानि

---

221. The five long expressions, beginning with (1) *kadācin-madacapala,—*, (2) *kadācid kāñcana—*, (3) *kadācid vicakila—*, (4) *kadācid vibhraṣṭahāra—*, and (5) *kadācid viśvakarma—*, describe Kṛṣṇa's activities related to *Śṛṅgārarasasulabhasukha.*

222. The five long expressions, beginning with (1) *kadācid aticaṭula—*, (2) *kadācid atikarāla*, (3) *kadācin niśitaśara—*, (4) *kadācit pāśacakra—*, and (5) *kadācit savyasāci—*, describe Kṛṣṇa's activities related to *vīrarasasulabhasukh a*

निर्वर्णयन् [222]कदाचित् सव्यसाचिपरिचितेषु वृकोदरारब्ध [-प्रबलप्रतिपक्षोरुगदा-संचूर्णननिर्घोष-[223]] मुखरोदरेषु समरकूटेषु[224] कौरवकबन्धताण्डवानि पश्यन् यथामति सुमनोगणस्तूयमानगुणराशिरभजत महान्तमानन्दम् ।

इत्यगस्त्यकृतिः कृष्णचरितम् समाप्तम् ॥



223. The portion within squre brackets is only my guess. MSS seem to lack some expressions here, though there is no indication.

224. MSS seem to read *śarakūṭeṣu*, of which I am unable to make out the significance clearly. In order to account for Bhīma's association which is also mentioned in the context, I simply surmised that it might be *samarakūṭeṣu*. Bhīma was also not unaware of archery. In the *Saugandhikāharaṇa* in fact, Viśvanātha, who was a student of our Agastyapaṇḍita, describes Bhīma's proficiency in the use of bow and arrows (See verses 119, 120 & 121, N. S. P. edn. 1934). Yet his special field was *gadāyuddha*. I therefore tentatively surmised *samarakūṭeṣu*.

श्रवश्शूलस्थूलंकरणभणितिग्रन्थनिपुणैः
कविम्मन्यैरन्यैः किमिह बहुरोमन्थहरिणैः ।
विमर्शादर्शान्तःप्रतिफलदलंकाररचनै-
रगस्त्यः पौरस्त्याननुसरति सूक्तैः सुमनसः[225] ॥

अनादृत्य श्लाघ्यान् भुवि कविनिबन्धानभिरतिं
कृतौ वैयासक्यां[226] रचयितुरगस्त्यस्य विदुषः ।
वसन्ती वाग्देवी कृतिनि रसनाग्रे वितनुते
न पर्यङ्के पङ्केरुहि महति शङ्के विहरणम्[227] ॥

---

225. These two beautiful verses are preserved only in the Grantha Manuscript. In the Telugu Manuscript, the folio containing these verses is missing.

226. Nāgeśa notes that *vaiyāsaki* is the correct form (and not *vaiyāsiki*). See *Uddyota* on *Sudhātur akañ ca* (IV. 1.97), and the *Bhāṣya* (N. S. P. edn. 1942, Volume IV, pp. 134 and 135).

227. The Grantha Manuscript reads after these two verses thus: *śrīvighneśvarāya namaḥ*, which was probably written by the scribe. Also this verse, which is generally found, I am told, in other Manuscripts too, is given thus :

bindudurlipivisargavīthikāḥ
śṛṅgapaṅktipadabhedadūṣaṇam |
hastalāghavam abuddhipūrvakaṃ
kṣantum arhatha samīkṣya sajjanāḥ ||

Obviously this was also given by the scribe.

ERRATA

Page	Line	Read
xxxviii	16	Page 54
34	7	Delete the word *anusvāra*
38	10 & 11	Square brackets for the portion *atha* to *jagāda*
40	Footnote line 1	*āśiṣuḥ*
48	Footnote line 1	From here
54	2	*praṇanāma*
109	heading	—*varṇanam*
113	heading	*indrasyābhiyānam*
118	(Footnote 226);	1 *Vaiyāsakī*
118	(Footnote 226);	2 *akaṅ*